ISSN : 0975-1769

# संस्कृतविमर्शः

## नवोत्कर्षः

UGC-CARE Listed International Refereed &
Peer-reviewed Research Journal

अङ्कः 24 - वर्षम् 2024

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
देहली

# संस्कृतविमर्शः

**UGC-CARE Listed International Refereed & Peer-reviewed Research Journal**

## नवोत्कर्षः

अङ्कः 24 (जनवरी 2023 - जून 2023) वर्षम् 2024

प्रधानसम्पादकः

**प्रो. श्रीनिवास वरखेड़ी**

कुलपतिः

कार्यकारी सम्पादकः

**डॉ. गणेश ति. पण्डितः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

**देहली - 110 058**

प्रकाशकः
**कुलसचिवः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
emial : res-pub@csu.co.in
website : www.sanskrit.nic.in

© केन्द्रीयसंस्कृतविश्वविद्यालयः

ISSN : 0975-1769

CARE ID - 101000019

प्रकाशनतिथिः - 13.06.2024

मूल्यम् - 300.00

**ग्राहकताशुल्कम्**
त्रैवार्षिकम् - 1800.00
पञ्चवार्षिकम् - 3000.00

मुद्रकः
डी.वी. प्रिंटर्स
97-यू.बी. जवाहर नगर, दिल्ली-110007

# SAṂSKṚTA-VIMARŚAḤ

**UGC-CARE Listed International Refereed &**
**Peer-reviewed Research Journal**

## NAVOTKARṢAḤ

**Vol. 24** **(January 2023 - June 2023)** **Year 2024**

Editor in Chief
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

Executive Editor
**Dr. Ganesh T. Pandit**

**CENTRAL SANSKRIT UNIVERSITY**
(Established by an Act of Parliament)
**Delhi**

Publisher:
**Registrar**
**Central Sanskrit University**
56-57, Institutional Area, Janakpuri,
New Delhi - 110058 (India)
E-mail : res-pub@csu.co.in
website : www.sanskrit.nic.in

© Central Sanskrit University

ISSN : 0975-1769

CARE ID - 101000019

Publication Date : 13.06.2024

Rs. 300.00

**Subscription**
Three Years : 1800
Five Years : 3000

Printed by :
D.V. Printers
97-U.B., Jawahar Nagar, Delhi-110 007

## परामर्शदातृ-समितिः

1. **प्रो. बनमाली बिश्वालः**
   अधिष्ठाता, शैक्षणिकवृत्तम्,
   केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

2. **प्रो. ललित कुमार त्रिपाठी**
   शोधाधिष्ठाता निदेशकश्च
   गङ्गानाथझापरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः
   प्रयागराजः, उत्तरप्रदेशः

3. **प्रो. गोदावरीमिश्रः**
   सङ्कायाध्यक्षः - SBSPCR, नालन्दाविश्वविद्यालयः,
   राजगृहम्, बिहारः, पिन-803116

4. **प्रो. शशिप्रभाकुमारः**
   अध्यक्षा, IIAS, शिमला, हिमाचलप्रदेशः, पिन-171004

5. **प्रो. रमेशकुमारपाण्डेयः**
   कुलपतिचरः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली,
   पिन-110016

6. **प्रो. राधाकृष्ण सि.एस्.**
   संस्कृतविभागः, पाण्डेचेरिविश्वविद्यालयः, पाण्डेचेरी
   पिन- 605014

## सम्पादकसमितिः

**प्रो. काशीनाथ न्यौपाने**, निदेशकः, प्रकाशनम्
**प्रो. सुज्ञानकुमारमाहान्तिः**, संयुक्तनिदेशकः, प्रकाशनम्
**डॉ. गणेश ति. पण्डितः**, संयुक्तनिदेशकः, प्रकाशनम्
**डॉ. पवनव्यासः**, संयुक्तनिदेशकः, प्रकाशनम्

## Advisory-Board

1. **Prof. Banmali Biswal**
   Dean, Academic Affairs,
   Central Sanskrit University, New Delhi

2. **Prof. Lalit Kumar Tripathi**
   Dean, Director,
   Ganganath Jha Campus
   Central Sanskrit University,
   Prayagraj (U.P.) Pin - 211002

3. **Prof. Godavri Mishra**
   Dean, SBSPCR,
   Nalanda University, Rajgir (Bihar) Pin - 803116

4. **Prof. Shashi Prabha Kumar**
   President, IIAS Society,
   Shimla, Himachal Pradesh, Pin-171004

5. **Prof. Ramesh Kumar Pandey**
   Ex-Vice Chancellor, LBS National Sanskrit University
   New Delhi, Pin - 110016

6. **Prof. Radhakrishna P.**
   Deparment of Sanskrit, Pondicherry University
   Pondicherry-605014

## Editorial-Board

**Prof. Kashinath Nyaupane,** Director, Publication
**Prof. Sugyan Kumar Mahanty,** Joint Director, Publication
**Dr. Ganesh T. Pandit,** Joint Director, Publication,
**Dr. Pawan Vyas,** Joint Director, Publication

# सम्पादकीयम्

**विश्वविद्यालयस्य मुखं प्रकाशनम्** इति कुलपतिवचनम्। प्रकाशने शोधपत्रिका-प्रकाशनमपि अन्तर्भवति। संस्कृतविमर्शः इत्येषा षाण्मासिकी शोधपत्रिका भारतीयविद्यायाः विश्वतोमुखत्वं प्रदर्शयति। इयं शोधपत्रिका राष्ट्रियशिक्षानीतेः संसूचनाः अपि नियतरूपेण प्रसारयति।

तत्र हि एकविंशतेः शताब्दस्य कौशलानि भारतीयैः तरुणैः अधिगन्तव्यानीति शिक्षानीतौ निगदितम्। भारतीयशिक्षाव्यवस्थायाम् अर्थात् आधारभूतस्तरात् उच्चस्तरं यावत् आमूलचूलं परिवर्तनं कर्तुं समागता नीतिरेव राष्ट्रियशिक्षानीतिः इति प्रोच्यते। शिक्षायाः अनुसन्धानकार्याणां सेवासौकर्याणां च भारतीयत्वसम्पादनम् अस्याः एकं लक्ष्यम् अस्ति। अतः तदर्थं पूरकाः अंशाः सर्वे अत्र योजिताः सन्ति। नवशताब्दस्य कौशलानाम् अर्जनाभावे युवानः सामयिकाः न भवन्ति इति तु स्पष्टमेव। पूर्वतन-शिक्षाप्रणाल्यां कलाविज्ञानवाणिज्यगणकविषयाणां पार्थक्येन अध्ययनाय अवसराः प्रचुरमात्रेण आसन्। अद्यापि क्वचित् सन्ति, इतोऽपि कानिचन (2030) वर्षाणि एतादृश्यः व्यवस्थाः भविष्यन्ति। अद्यावधि एकमुखशिक्षा अथवा निर्दिष्टविषयैककेन्द्रिता शिक्षा बहुत्र प्रचलिता। परं न भविष्यति अग्रे। अधुना तु अन्तःशास्त्रीयम् अध्ययनं कर्तुं विविधविद्याशाखासु नामाङ्कनार्थं च विपुलावसराः प्रकल्पिताः। एकोपाधिधारिणाम् एकमुखविद्याधारिणां वा अपेक्षया नैकोपाधिधारिणः बहुमुखविद्याधारिणः वा सफलाः सम्भवन्ति इति नीतिनिर्धारकाणामपि अभिमतं वर्तते। विविधविद्याधराणां सर्जनाय सर्वविद्याविशेषैर्युक्तस्य पाठ्यक्रमप्रारूपस्य परिकल्पना नवनीतौ कृता। तदाश्रित्य भारतीयोच्चशिक्षाकेन्द्रैः अधुना नवशिक्षानीत्याधारितशिक्षाप्रणाली बहुत्र प्रयुक्ता अस्ति।

भारते व्यावसायिकशिक्षायाः व्यवस्था सामन्यशिक्षया सह सहजरूपेण एव सर्वत्र स्यात् येन व्यावसायिककौशलानि अर्जयितुं बालाः सुखेन शक्नुवन्ति इति शिक्षानीतेः षोडशे अध्याये उल्लिखितम् अस्ति। प्राचीनभारते लोकविद्यायाः अपि महत्त्वम् आसीत् इत्यतः व्यावसायिकशिक्षायाः पुनः परिकल्पनार्थं तत्र सूचनाः सुष्ठु प्रदत्ताः सन्ति। मुख्यधारायां व्यावसायिकशिक्षायाः समन्वितः सञ्चारः भवेत्। पुनश्च स्वाभीष्टव्यावसायिकशिक्षाम् अवाप्य स्वाभीष्टव्यवसायं चेतुम् अपेक्षितानि कौशलानि

शिक्षाकेन्द्रैः एव प्राप्तुं शक्यन्ते इत्यतः एषा संसूचना प्रदत्ता। Vocational Education and Training - VET इत्येषा व्यवस्था सर्वत्र पाठ्यक्रमे भविष्यति चेत्तर्हि कोटिशः कुशलाः सिद्धाः भविष्यन्ति इति नीतिनिर्धारकाणाम् अभिमतमेव।

एतदनु केन्द्रीयसंस्कृतविश्वविद्यालयः नवनीत्याधारितान् एव शैक्षिकक्रिया-कलापान् प्रोत्साहयति। विश्वविद्यालये प्रवचनप्रशिक्षणप्रकाशनपरम्पराः आबहोः कालात् सुष्ठु प्रवर्तन्ते। एताः परम्पराः अधुना अभिनवरूपापन्नाः सन्ति। विशिष्य प्रकाशनक्षेत्रे विशिष्टैः शोधलेखैः संस्कृतविमर्शः इत्येषा षाण्मासिकी शोधपत्रिका लब्धप्रतिष्ठा एव। विश्वविद्यालयानुदानायोगस्य रक्षितसूच्यां वर्तमाना एषा शोधपत्रिका भारतीय-ज्ञानपरम्परायाः द्योतकान् एव लेखान् नैरन्तर्येण प्रकाशयति। एतदनु अस्मिन् अभिनवे अङ्के विशिष्टैः आङ्ग्लसंस्कृतहिन्दीभाषोपनिबद्धैः शोधलेखैः पाठकानाम् ध्यान-माकर्षतितमाम्।

भारतस्य सुविख्यातानां शिक्षाविदां सारगर्भितान् लेखान् पाठकगणः आस्वादयतीति दृढविश्वासः अस्माकम्।

सन्दर्भेऽस्मिन् प्रकृताङ्कस्य समीक्षकान् प्रधानसम्पादकान् परामर्शप्रदायकान् प्रकाशकान् च सम्पादकगणः साधुवादैः समर्चयति। **विश्वविद्यालयस्य मुखं प्रकाशनम्** इति आचार्यैः **श्रीनिवासवरखेडीवर्यैः** प्रोक्तां परिभाषां मनसि निधाय प्रकाशनोत्कर्षं सम्पादयितुं प्रकाशनानुभागः संसिद्धोऽप्यस्ति। शोधपत्रिकाप्रकाशनकार्याणां प्रोत्साहनं कुलपतयः प्रतिपदं कुर्वन्ति इत्यतः तेभ्यः कार्तज्ञ्यं समर्पयामः। पुनश्च संस्कृतविमर्शस्य पाठकाः यथापूर्वं समधिकमात्रेण सदस्यतां स्वीकृत्य शोधपत्रिकायाः प्रचारे प्रसारे च सहकुर्वन्तीति विश्वासः नः।

**–सम्पादकसमितिः**

# विषयानुक्रमणिका


परामर्शदातृ-समितिः, सम्पादकसमितिः *v*

**Advisory Board, Editorial Board** *vi*

सम्पादकीयम् *vii*


## संस्कृत-विभागः


1. **कारकाणि अपि च अर्थस्वरूपाणि-साम्यं भेदश्च** 1
   –Zahorulko Andriy

2. **अभिनवदृशा-ध्वन्यालोके दीपशिखालोकः** 12
   –डॉ. पवनव्यासः

3. **द्वैताद्वैतवेदान्ते मोक्षसाधनम्** 23
   –अर्घ्यदीप राय

4. **समासभेदविवेकः** –डॉ. प्रसेनजित्-नियोगी 35

5. **धर्मस्य प्रमाणानि** –गोपालकृष्णमिश्रः 45

6. **संस्कृतसाहित्येषु राजनीतिः** 50
   –डॉ. वेणुधरदाशः

7. **प्रश्नमार्गानुसारेण देवकोपविमर्शः** 59
   –अनिलकुमारदेसायिः
   –गिरीशभट्टः बि.
   –दिनेशमोहनजोशी

8. **विविधशास्त्रदृशा उपसर्गपदार्थसमीक्षणं तदनुप्रयोगश्च** 71
   –डॉ. बिपिनकुमारझाः
   –डॉ. दीपिकादीक्षितः

9. **श्रीमद्रामायणे त्रिजटास्वप्नवृत्तान्तः-एकमनुशीलनम्** 80
   –पूर्णम वेङ्कटा नागा किशोर

10. **विशेषपदार्थलक्षणसम्बन्धिवैशेषिकाशयविमर्शः** 84
–सुजन-दासः

11. **साङ्ख्ययोगन्याय-वैशेषिकदर्शनदिशा सुखस्य तुलनात्मकम् अध्ययनम्** 93
–पूर्णचन्द्रमण्डलः

12. **योगसूत्रभगवद्गीतयोर्योगपदार्थपर्यालोचनम्** 101
–डॉ. संजयकुमारः

13. **कठोपनिषद्दिशा अध्यात्मयोगस्वरूपपरामर्शः** 109
–प्रलय-नन्दी

14. **निरुक्ततः सामाजिक-सांस्कृतिकः प्रतिबिम्बम् अवगमनानि च** 118
–आतिरा. टि.

15. **महाभाष्यसिद्धान्तरत्नप्रकाशदिशा महत् कष्टं श्रितः इत्यत्र वृत्तिनियामकत्वविमर्शः** 127
–उत्तमघोषः

16. **एकविंशशताब्द्या वङ्गीयकवेः सीतानाथस्य काव्यमूल्यायनम्** 136
–डॉ. शुभ्रजित् सेनः

17. **उपमानप्रमाणम्ः अवधारणा समीक्षा च** 150
–रमेशचन्द्रः नैलवालः

18. **एकविंशतितमशताब्दीय-अधिगमकौशलानि** 160
–डॉ. जी. सूर्यप्रसादः
–अमित रुइदासः


## हिन्दी संभाग


19. **वक्रोक्ति और ध्वनि-आपसी संबंध** 172
–डॉ. रेणुका बोकारे

20. **भारतीय ज्ञान परंपरा में मानसिक स्वास्थ्य प्रबंधन की संकल्पना** 179
–डॉ. ज्ञानेन्द्र कुमार

21. **पद्मपुराण में वृक्षारोपण एवं पर्यावरण संरक्षण** 187
–प्रो. अजय कुमार झा

22. **शुक्राचार्य की प्रशासनिक शिक्षाएँ** 196
–सन्ध्या कुमार जैमिनी
–प्रो. नीरज शर्मा

23. **प्राचीन भारतीय न्याय व्यवस्था-राजा, न्यायालय, न्यायाधीश एवं सभ्य** **204**

-स्मिता यादव

24. **अलिविलासिसंलाप का महाकाव्यत्व** **214**

-डॉ. अंकित सिंह यादव

25. **मानव शरीरम् : आध्यात्मिकी एवं भौतिकी स्वरुप में ब्रह्माण्डीय अवधारणा** **228**

-चन्द्रशेखर श्रीवास
-डॉ. एन.के. कश्यप
-डॉ. शीला खुंटिया
-डॉ. एन.के. स्वामी
-डॉ. जी.आर.जाटव

26. **सकारात्मक व्यक्तित्व निर्माण में श्रीमद्भगवद्गीता का अवदान** **240**

-डॉ. कुसुमलता टेलर

27. **शास्त्रोक्त दान का शाश्वत महत्व** **244**

-संगीता राठौर

28. **महाभारत में शान्तिपर्व में पठित लघुकथाओं का नैतिक सन्देश** **256**

-डॉ. छोटी बाई मीणा


## English Section


29. **Connecting Purushasuktam and the IT World : Bridging Ancient Wisdom with Modern Technology** **264**

-Prof. Manish R.Joshi
-Prof. Shivani V.
-Aruna Vayuvegula

30. **Importance of Water - Āyurvedic Perspectives** **272**

- Dr. Ajitha T.S.

31. **Vedic Prospect of Plant and its Life as Revealed by Jagadish Chandra Bose** **278**

- Dr. Dinesh Kumar Das

32. **New Education Policy : The Gandhian Way** **285**

- Dr. Pankaj Gupta
- Dr. Deepshikha Parashar

33. **Modern relevance of Mīmāṃsā axiom in law : A Psychological study** **302**
-Mr. Supriya Roy

34. **Madhura-Bhakti-Rasa in John Donne's Poetry** **309**
-Dr. Richa Biswal

35. **Some Scientific Approaches in Sanskrit, Multimedia and Globalization** **318**
-Dr. Ajay Kumar Mishra

36. **A Comprehensive Study on Buddhist Tourism in Uttar Pradesh** **337**
-Dhananjay Kumar Jha

✦✦✦

# कारकाणि अपि च अर्थस्वरूपाणि-साम्यं भेदश्च

-Zahorulko Andriy[1]

**शोधसारः**

अस्मिन् शोधलेखे कारकाणाम् अपि च आधुनिक-भाषाविज्ञानस्य अर्थस्वरूपाणाम् (semantic roles) तुलना क्रियते। वाक्यरचना-सिद्धान्तानां माध्यमेन कारक-सिद्धान्तस्य सारः स्पष्टीकृतः भविष्यति चेत्, कारक-व्यवहारः अन्यासां भारोपीय-भाषाणाम् विभक्ति-पद्धतीनां विश्लेषणार्थं प्रयोक्तुं शक्ष्यते। भिन्नानि लक्षणानि प्रस्तुत्य अपि च कारक-अर्थस्वरूपाणां परस्परसम्बन्धे पाश्चात्त्यविदुषां मतं प्रदाय अन्ते अयं भेदः स्पष्टरूपेण उपन्यस्यते। कारक-अर्थस्वरूपाणां परस्परसम्बन्ध-प्रदर्शनाय स्तर-कल्पनायाः (concept of the different levels) स्थाने अन्यत् प्रतिमानम् (model) प्रस्तुतम्। तस्य प्रतिमानस्यानुसारेण प्रतिकारकम् गोलरूपेण (ball sphere) प्रदर्शयितुं शक्यते, गोलस्य अन्तर्भागः (core, nucleus) तु semantic hyperrole भवितुमर्हति।

In this article the comparison of Sanskrit karakas and semantic roles of the modern linguistics is made. If the karaka theory is explained in the frames of modern syntactic theories, then karaka approach could be used for the analysis of the case systems of the other Indo-European languages. After providing definitions of karakas and semantic roles and introducing several points of view on the interaction between karakas and semantic roles an attempt is made to explain the main difference between two concepts in an understandable way. In place of the concept of the "levels of representation" another model is proposed, according to which every karaka could be presented as a sphere or a ball, where the semantic hyperrole would be a core/nucleus.

**प्रमुखशब्दाः** – आधुनिकभाषाविज्ञानम्, कारकाणि, वाक्यरचना, विभक्तिपद्धतिः, अर्थस्वरूपाणि (semantic roles).

## प्रस्तावना

संस्कृतवाक्यरचनायाः सामान्येन अपि च कारक-विभक्ति-व्यवहारस्य विशेषतः अवगमनाय कारक-सिद्धान्तः अतिविशिष्टः भवति। यदि आधुनिकानां वाक्यरचना-

1. Ph.D. student, नव्यव्याकरणम्, Central Sanskrit University, New Delhi, India

सिद्धान्तानां माध्यमेन कारक-सिद्धान्तस्य सारः स्पष्टीकृतः भवेत्, तर्हि कारक-व्यवहारः अन्यासां भारोपीय-भाषाणाम्, यत्र विस्तृता पदरचनविज्ञानस्य पद्धतिः (developed morphological system) दृश्यते, तत्र विभक्ति-पद्धतीनां विश्लेषणार्थं प्रयोक्तुं शक्ष्यते।

पूर्वशतकस्य मध्ये पाश्चात्त्य-भाषाविज्ञाने नूतना कल्पना प्रसिद्धा अभूत् – semantic roles (semantic role अर्थस्वरूपं कथयितुं शक्यते) इत्येषा कल्पना। यश्च पाश्चात्त्य-विद्वान् पाणिनीयम् अधीते, सः कारकाणाम् अर्थस्वरूपाणाञ्च साम्यं ज्ञातुं प्रभवति। कारकाणाम् तथा अर्थस्वरूपाणां तुलना यदि क्रियेत, तर्हि तयोः न केवलं साम्यम् अपि तु भेदश्च ज्ञातुं शक्येत।

यद्यपि कारकम् अर्थस्वरूपम् इत्युभयोः प्रभेदयोः (categories) अधिकं साम्यं विद्यते, तथापि तयोः कश्चन भेदः अपि स्यात्। अनेके पाश्चात्त्याः विद्वांसः अर्थ-स्तरस्य (यत्र semantic roles दृश्यन्ते) अपि च कारक-स्तरस्य परस्परसम्बन्धे लिखन्ति, परन्तु मम मतानुसारेण अस्मिन् विषये निर्धारणम् अपेक्षितम्। परिपूर्णतुलनायै आदौ उभयोः सम्प्रत्यययोः (notions) स्पष्टं लक्षणं प्रस्तोतव्यम्, तदनन्तरम् – प्रसिद्धविदुषां कृतीनामाधारेण – कारकाणाम् अर्थानाञ्च कीदृशः परस्पर-सम्बन्धः विद्यते इति प्रस्तोष्यते। निष्कर्षरूपेण स्वकीयाः परिणामाः प्रदर्शयिष्यन्ते।

## किं नाम कारकम्?

पाणिनीयानुसारेण वाक्ये क्रियायाः प्राधान्यं विद्यते। क्रियाम् आधारीकृत्यैव कारकं प्रवर्तते, तयोः द्वयोः निरन्तरसम्बन्धः भवति। किं नाम कारकम्? कारकम् इति तु संज्ञा (पारिभाषिकशब्दः –technical term), यस्याः अर्थः नाम्ना एव स्पष्टः भवति। कारकस्य स्वरूपे महाभाष्ये इत्येवं कथितम् – "कारकम् इति महती संज्ञा क्रियते।... तत्र महत्याः संज्ञायायाः करणे एतत्प्रयोजनम् – अन्वर्था यथा विज्ञायेत – करोतीति इति कारकमिति... साधकं निर्वर्तकं कारकसंज्ञं भवतीति"[2]। अन्येषु प्रसिद्धव्यकरणग्रन्थेषु कारकविषये तथैव उच्यते — "कारकमित्यस्य क्रियान्वयीत्यर्थः।[3]", "तत्र क्रियानिषादकत्वं कारकत्वम्।"[4], "कारकत्वं क्रियाजनकत्वम्, भाष्ये करोतीति क्रियां निर्वर्तयति इति व्युत्पत्तिप्रदर्शनात्।"[5]। "कारकशब्दश्च निमित्तपर्यायः"[6]। अस्य सर्वस्य

---

2. पतञ्जलिः, *महाभाष्यम्* – 1.4.23 (कारके).
3. भट्टोजीक्षितः, *प्रौढमनोरमा, कारकप्रकरणम्* – 1.4.49.
4. नागेशः भट्टः, *परमलघुमञ्जूषा, कारकार्थनिरूपणम्*.
5. नागेशः भट्टः, *लघुशब्देन्दुशेखरः* – 1.4.23.
6. वामनजयादित्यौ, *काशिका* – 1.4.23.

मतस्य सारः वर्तते यत् क्रियया सह यत् अन्वितं भवेत्, क्रियायाः यत् साक्षात् सम्बन्धि वा स्यात्, क्रियां वा यत् जनयेत्, तत् कारकं कथ्यते।

आङ्ग्लटीकासु, अपि च पाश्चात्त्य-विद्वद्भिः रचितेषु शोधलेखेषु कारकस्य लक्षण-विषये कानिचन उद्धरणानि – "The word "karaka" thus is synonymous with the word cause (hetu) and occasion (nimitta). All the various causes and occasions that are required to complete an action will be karakas"[7], "Karakas are promoters of the action"[8], "Karaka is the name given to the relation subsisting between a noun and a verb in a sentence"[9], "Karakas are roles, or functions, assigned to nominal expressions in relation to a verbal root. Panini's grammar represents a sentence as a little drama consisting of an action with different participants, which are classified into role types called karakas"[10], "An accomplisher or a completer is given the technical name karaka"[11], "Things are karakas when they play certain roles in the accomplishment of action"[12]।

एतेषां सर्वेषाम् उद्धरणानां सारः इत्येवं प्रस्तोतुं शक्यते – 1. क्रियायाः प्रवर्तनाय यत् अपेक्षितम्, तत् कारकम् उच्यते। 2. कारकम् इति तु वाक्ये क्रियावाचक-विशेष्ययोः कल्पितः सम्बन्धः कथ्यते। 3. पाणिनीये वाक्यं लघुनाटक-रूपेण प्रदर्शयितुं शक्यते, तस्मिन् नाटके कश्चन व्यापारः (क्रिया) निर्दिष्टः, व्यापारस्य तु भिन्नाः प्रतिभागिनः प्रवर्तन्ते, प्रतिप्रतिभागि स्वोद्देशः (role, goal) विद्यते, यः कारकम् उच्यते।

## किं नाम semantic role?

A semantic role is the underlying relationship that a participant has with the main verb in a clause. Semantic role is the actual role a participant plays in some real or imagined situation, apart from the

---

7. Vasu Srisa Chandra. *The Ashtadhyayi of Panini*, volume 1, p.177.
8. Ray Saradaranjan. *Bhattoji Dikshita's Siddhant-Kaumudi – Karaka and samasa*, volume II, p. 12.
9. Apte Vaman Shivaram. *The student's guide to Sanskrit composition*, p. 15.
10. Kiparsky Paul. *On the Architecture of Panini's Grammar* in *ISLCS: Sanskrit computational linguistics*, p.49
11. Kudo Noriyuki. *The Notion of Karaka Discussed by the Grammarians* in *Journal of Indian and Buddhist Studies*, Vol. 44, No. 1 , p. 481.
12. Cardona George. *Panini's karakas: agency, animation and identity* in Journal of Indian philosophy, volume 2, pp. 231.

linguistic encoding of those situations. They concern the roles that people and things play externally, in the real world.[13]

अर्थात् semantic role इत्यस्य अर्थः शब्दकोशानुसारेण गभीर-सम्बन्धः इति, यः वाक्ये मुख्यक्रियावाचकस्य अपि च (परिस्थितेः) प्रतिभागिनः वर्तते। Semantic role इति तु वास्तविकम् role, यत् कस्याञ्चित् वास्तविकपरिस्थितौ प्रतिभागिना प्रदर्शितम्, समकालं तस्याः परिस्थितेः भाषाविज्ञानस्य सङ्कूटनम् (encoding) परित्यक्तं भवति। Semantic roles इति roles, यानि जन्तुभ्यः वस्तुभ्यश्च भाषायाः बाह्यतः वास्तविके जगति निर्दिष्टानि।

रूस्-भाषायाः स्रोतेषु semantic role तथैव वर्णनं प्राप्तुं शक्यते – "Semantic role – प्रारूपिक-सम्बन्धाः (typical relations), ये कस्याश्चित् परिस्थितेः अपि च परिस्थति-प्रतिभागिनः परस्परं प्रवर्तन्ते, परिस्थितिः तु क्रियावाचकेन निर्दिष्टा भवति।[14] क्रियापदस्य (क्रियायाः) अपि च सुबन्तस्य परस्परम् semantic सम्बन्धानाम् आधारे वास्तविक-परिस्थितीनां प्रतिभागिनां परस्पर-सम्बन्धाः तिष्ठन्ति।"[15]

सरलभाषया तथैव वक्तुं शक्यते – semantic role इति वास्तविकम् role, यत् कस्याश्चित् परिस्थितेः (व्यापारस्य, अयं व्यापारः वाक्येन निर्दिष्टः भवति) प्रतिभागी प्रदर्शयति।

## Semantic roles कल्पनायाः व्युत्पत्तिः सारश्च, पाणिनीयस्य प्रभावः

Semantic roles कल्पना पूर्वशतकस्य द्वितीयार्धे (1960-वर्षेषु) कैश्चित् भाषावैज्ञानिकैः परस्परं स्वतन्त्रेण (independently of each other) प्रस्तुता आसीत्, तेषु विद्वत्सु चर्ल्ज् फिल्मोर् प्रसिद्धतमः भवति। सः semantic role इत्यस्मिन् अर्थे आदौ deep case (अर्थात् गभीर-विभक्तिः) इति पारिभाषिक-शब्दं प्रायुङ्क्त।

फिल्मोर् महोदयेन Case grammar (विभक्ति-व्याकरणम्) इत्येषः भाषावैज्ञानिकः सिद्धान्तः निरूपितः, यत्र वाक्यस्य अर्थसम्बन्धानां स्पष्टीकरणाय semantic roles प्रयुज्यन्ते। फिल्मोर् मतानुसारेण अयं सिद्धान्तः "substantive

---

13. https://glossary.sil.org/term/semantic-role
14. https://old.bigenc.ru/linguistics/text/4326141
15. Рядинская С.В., Мигачев В.А. *Падежная грамматика Ч. Филлмора и современное понимание ролевой семантики глагола*, стр. 178

modification to the theory of transformational grammar"[16] भवति अर्थात् विवर्तात्मक-व्याकरणस्य विशिष्टं संशोधनम्। विभक्ति-व्याकरणे वाक्यस्य सामान्यार्थः विशिष्टैः सम्बन्धैः वर्ण्यते, ते सम्बन्धाः मुख्यक्रियापदस्य अपि च roles, यानि क्रियापदार्थस्य अधीनानि सन्ति सुबन्तैः प्रकाशितानि च भवन्ति, परस्परं प्रवर्तन्ते।

स्वकृत्योः "The case for case", “The case for case reopened” च फिल्मोर् विभक्ति-व्याकरणस्य कल्पनां विस्तारयति, निगूढ-प्रभेदानां प्राधान्यम् अङ्गीकृत्य। आधुनिक-भाषाविज्ञाने सामान्यानुमानं विद्यते, यत् यद्यपि भिन्न-भिन्न-भाषासु विभक्ति-पद्धतीनां बाह्यविविधता भवति, तथापि सर्वासु भाषासु समानानाम् semantic roles सार्वजनिकः समूहः (universal set) भवेत्।

उ. चेय्फ् अमन्यत, यत् गूढ-व्यवस्था इति तु अर्थसारस्य (semantical) व्यवस्था न तु वाक्यरचनायाः व्यवस्था (transformational पद्धतेः अनुयायिनां मतम्)। तस्यां व्यवस्थायां क्रियापदं मुख्यं भवति।

फिल्मोर् चेय्फ् विदुषोः मते semantic roles इति तु वाक्यस्य गूढायाः अर्थव्यवस्थायाः अङ्गानि सन्ति, प्रत्यङ्गं तु परिस्थितेः कश्चन प्रतिभागी भवति, यः क्रियावाचकेन केनचित् प्रकारेण सम्बद्धः।[17]

यद्यपि विभक्ति-व्याकरणस्य उत्पत्तिः पूर्वशतकस्य मध्ये जाता, तथापि तस्य व्याकरणस्य मूलम् (origin) प्राचीनकाले एव लब्धुं शक्यते – तासु कल्पनासु, यत्र रूपस्य (बाह्यविभक्तिः) अपि च तेन रूपेण प्रकाशितस्य अर्थस्य असमानाधिकारण्यम् (assymetry) निर्दिश्यते। अन्वेषकाः विभक्ति-व्याकरणस्य पृष्ठभूमिं विचार्य, पाणिनीयं स्मरन्ति, यत्र "क्रियापद-विशेष्यानां सम्बन्धाः काल्पनिकप्रभेदानां माध्यमेन अधीयन्ते, ते काल्पनिकाः (abstract) प्रभेदाः कारकाणि उच्यन्ते"।[18]

---

16. Fillmore Charles. J. *Case for case* in *Universals in linguistic theory*, p. 43
17. Кукатова О.А. *Типология семантических ролей актантов предикатов в современной лингвистической науке* в "*Вестник челябинского государственного университета*", №1 (447), стр. 90
18. Курсанина Е.Е. *К вопросу о падежной грамматике* в "*Проблемы романо-германской филологии, педагогики и методики преподавания иностранных языков*", стр.21

निश्चयेन वक्तुं शक्यते, यत् semantic role इत्यस्याः कल्पनायाः उत्पत्तौ पाणिनीयस्य कारक-सिद्धान्तस्य प्रभावः दृश्यते – "... what has been described as case grammar by C. J. Fillmore (1968) is probably very similar to Panini's system"19. Generative grammar (transformational grammar इत्यस्याः शखा) इत्यस्य प्रवर्तकः नोअम् होम्स्किय् पाणिनेः व्याकरणशास्त्रेण प्रोत्साहितः अभवत्, तेन पाणिनीयाधारेण descriptive (वर्णनात्मक-व्याकरणम्) अपि च generative grammar (प्रजनक-व्याकरणम्) इत्यनयोः कल्पना प्रस्तुता। चर्ल्ज् फिल्मोर् तु नोआम् होम्स्किय् महोदयस्य अनुयायी आसीत्।

होम्स्किय् विद्वान स्वपुस्तके "Aspects of the theory of syntax" पाणिनेः व्याकरणम् उल्लिख्य प्रतिपादयति, यत् इत्यस्मिन् पुस्तके प्रस्तुतः सिद्धान्तः नूतनः अपूर्वः नास्ति। सः उद्दिशति, यत् पाणिनीयं प्रजनक-व्याकरणस्य प्रतिरूपम् केनचित् प्रकारेण स्वीकर्तुं शक्यते – "The idea that a language is based on a system of rules determining the interpretation of its infinitely many sentences is by no means novel. ... it seems that even Panini's grammar can be interpreted as a fragment of such a "generative grammar"...".[20]

प्रसिद्धः संस्कतविद्वान् पीतेर् म. शर्फ् लिलेख यत् पाणिनीयम् आधुनिक-भाषाविज्ञाने गभीरं प्रभवाम् अकरोत् – पाणिनीयस्य कल्पनाः विचाराश्च प्रजनक-व्याकरणस्य आधारे स्थापिताः आसान् – "Paninian grammar has had a profound influence on modern linguistics. Paninian grammar supplied the basic archetype at the foundation of modern generative grammar".[21]

## पाश्चात्त्यविदुषां भाषायाः स्तर-कल्पना (concept of the different levels)

कारकाणाम् अर्थस्वरूपाणाञ्च सहकारिता-विषये पाश्चात्त्यविदुषां भिन्नाः कल्पनाः सन्ति, यासां परस्परम् कदाचित् अधिकः भेदः भवितुमर्हति। तथापि प्रायः सर्वे (almost all) विद्वांसः स्वीकुर्वन्ति यत् 1) कारकम् semantic role च भिन्नौ सम्प्रत्ययौ स्तः, 2) अर्थेभ्यः कारकाणि द्वारा उच्चारित-वाक्यानि प्रजायन्ते, अर्थात् कारकाणि इति तु वाक्यरचनार्थं किञ्चित् उपकारकं साधनम्।

---

19. Matilal Bimal Krishna. *Bhavananda on "What is karaka?"* in *Paninian studies*, p. 264.
20. Chomsky Noam. *Aspects of the theory of syntax*, p. V.
21. Scharf Peter M. *Modeling Paninian Grammar*, p. 78.

सामान्यतः विचारकैः वाचि केचन स्तराः पृथक्क्रियन्ते, यत्र आधारे अर्थ-स्तरः तिष्ठति, उदाहरणार्थं किपर्स्कि ष्टाल् च प्रत्यपादयताम्, यत् पाणिनेः व्याकरणे सर्वे नियमाः चतुर्षु स्तरेषु प्रवर्तन्ते – अर्थस्तरः, गभीर-व्यवस्था, बाह्य-व्यवस्था (विभक्तीनां स्तरः), अपि च उच्चारितवाक्यानां स्तरः – "... Kiparsky and Staal (1969)[7] proposed that Paninian grammar contains rules in a hierarchy of four levels of representation: semantics, deep structure, surface structure, and phonology".22

इत्यस्मिन् चित्रे कारक-स्तरः इति कश्चन अवान्तर-स्तरः, यः शुद्धार्थानां स्तरम् अपि च बाह्यस्तरम् अन्तरा तिष्ठति, यतो हि कारक-संज्ञानां निर्धारणाय न केवलं गूढाः अर्थाः, अपि च अन्ये बाह्य-हेतवः (यथा उपसर्गाः) विशिष्टाः सन्ति। कारक-स्तरः अर्थ-स्तरं बाह्यव्यवस्था-स्तरञ्च संयोजयति - "Panini's grammar is a system of rules for converting semantic representations of sentences into phonetic representations, via two intermediate levels which may be respectively compared with the levels of deep (underlying) structure and surface structure in a generative grammar"[23], "Cardona countered that it is suitable to consider karakas as a level between the purely semantic level and the level at which nominal terminations are introduced because the rules that introduce karaka terms include both semantic and co-occurrence conditions"[24], "Cardona says that Panini's karaka classifications "serve as intermediaries between grammatical expressions and their semantics"[25], "Thus, in the grammatical derivation, the karakas mediate between meaning and morphosyntactic surface structure".[26]

पीतेर् शर्फ् कारकाणाम् अवान्तरस्वरूपं स्वीकृत्य उद्दिशति, यत् कारकाणि द्वयोः स्तरयोः सम्मीश्रणं स्यात्, न तु अतिरिक्तं स्तरम् – "In Paninian procedure, karaka classification does occupy an intermediate stage between purely semantic conditions and the introduction of speech forms. karaka rules ... involve both semantics and co-occurrence conditions themselves... . From a

---

22. Scharf Peter M. *Modeling Paninian Grammar*, p. 78
23. Kiparsky P., Stall J.F. *Syntactic and semantic relations in Panini in Universals: Studies in Indian logic and linguistics*, p. 185.
24. Scharf Peter M. *Modeling Paninian Grammar*, p. 86
25. Matilal Bimal Krishna. *Bhavananda on "What is karaka?"* in *Paninian studies*, p. 264
26. Kiparsky Paul. *On the Architecture of Panini's Grammar* in *ISLCS: Sanskrit computational linguistics*, p. 16

psychological or structural perspective, therefore, they constitute a mixture of levels rather then an intermediate level ".[27]

**निष्कर्षः**

अन्ते प्रश्नः उदेति – कारक-अर्थस्वरूपयोः भेदस्य प्रदर्शनार्थं किं वैशिष्ट्यं केन्द्रीयं भवति? कथम् अयं भेदः स्पष्टतया अवबोधयितुं शक्यते? मम मते उत्तरं तथैव भवेत् – कारकम् इति तु कल्पितः व्याकरण-प्रभेदः – कल्पितार्थः, यः भाषा-सीमासु प्रवर्तमानः, भाषायाः स्वाभाविकः भवति, अपि च वास्तविक-जगता अनिवार्यरूपेण न सम्बद्धः। वैयाकरणानां मते प्रत्येकः कारक-सम्बन्धः विशिष्टा-संज्ञायाः आधारेण निरूपितः भवति, न तु तस्य सम्बन्धस्य वास्तविकार्थस्य (semantic definition) आधारेण– "According to the vaiyakaranas, each and every karaka relation is based upon the "designations" or "labels" of the respective karakas given by Panini but not on their semantic definitions".[28]

Semantic role तु – वास्तविकम् role, यत् वाचः बहिः अवतिष्ठते, इदम् role कस्याश्चित् परिस्थितेः (व्यापारस्य) प्रतिभागिना प्राप्यते। अयं व्यापारः वाक्येन निर्दिष्टः भवति, तस्मिन् वाक्ये प्रत्येकः व्यापार-प्रतिभागी कंचित् व्याकरण-प्रभेदं लभते – वास्तविकं जगत् वाचः जगति प्रकाशितं भवति।

कारकाणाम् पृथक्करणस्य आधारे वास्तविकानि semantic hyperroles (hyperrole इति तु भिन्नानां सादृशानाम् roles समूहः/एकीकरणम्) भवन्ति - "In view of the above discussion, one can definitely conclude that karaka categories in Panini do indeed have prototypical semantic associations"।[29]

"आदर्शम्", "शुद्धम्" कारकम् इति तु semantic hyperrole एव स्यात्, परन्तु वाक्यानां विश्लेषणसमये प्रयुक्तं कारकम् तत् hyperrole अतिरिच्यते। अर्थात् कारकद्वारा कश्चन व्यापार-प्रतिभागी किञ्चित् hyperrole प्राप्तुं शक्नोति, यत् तस्य प्रतिभागिनः वास्तवत्वे न स्यात्। उदाहरणार्थं कश्चन् व्यापार-प्रतिभागी वाक्यस्य Object (कर्म) अर्थदृष्ट्या न प्रकटयति, परन्तु वाक्येन निर्दिष्टायां विशिष्ट-परिस्थितौ अयं

---

27. Scharf Peter M. *Modeling Paninian Grammar*, p. 86
28. Dash Achyutananda. *The syntactic role of Adhi in the Paninian Karaka system* in *Paninian studies*, p. 137
29. Deshpande Madhav M. *Prototypes in Paninian syntax* in *Journal of the American oriental society*, vol 111, p. 478

प्रतिभागी कर्मरूपेण स्वीक्रियते। कल्पितार्थाः वास्तविकार्थान् "अवच्छादयन्ति...", यदा वास्तविकानाम् (औत्पत्तिकानाम्) अर्थानां स्थाने कल्पिताः अर्थाः स्थापिताः सन्ति, तदा तेषां वास्तविकार्थानां प्रयोजनं निर्गच्छति, अपि च विश्लेषणसमये व्याकरणस्य उद्देशार्थं केवलं कल्पितार्थाः अधीयन्ते – "Kāraka names are pseudo-meanings... . ... the pseudo-meanings "cover" the original meanings. ... once the original meanings have been replaced by pseudo-meanings, those original meanings play no role any longer"[30], "Panini's karaka definitions attempt to supersede these prototypical semantic associations to achieve wider generalizations for formal grammatical purposes"[31]।

मम मतानुसारेण semantic roles काराकाणाञ्च परस्पर-सम्बन्धः स्तराणां पद्धतिद्वारा न अवबोधयेत्, यतो हि तादृशः विधिः अतीवसरलीकृतः (simplified) भवति, तेन तस्य सम्बन्धस्य सारः स्पष्टयितुं न शक्यते – कारकाणि semantic roles च इति न तु द्वौ भिन्नौ स्तरौ, न तु स्तरयोः सम्मिश्रणम्।

मम प्राक्कल्पनया अयं परस्पर-सम्बन्धः गोल-रूपेण प्रदर्शयितुं शक्यते, यत्र गोलस्य अन्तर्भागः (core) – semantic role, सम्पूर्ण-गोलः तु – कारकम्। अनेन चित्रेण परस्पर-सम्बन्धः किञ्चित् प्रकारेण स्पष्टतरः भवेत् – एकस्मिन् पक्षे अत्र द्रष्टुं शक्यते, यत् किञ्चित् कारकम् केनचित् प्राकृतिकेन (standard) semantic role सीमितं न भवति; अन्यस्मिन् पक्षे स्पष्टं भवति, यत् प्रतिकारकम् आधारे (as basis) किञ्चित् semantic hyper-role तिष्ठति – स्वस्य prototypical समानार्थे (कारकस्य स्वाभाविकानाम् अर्थानां समूहः) कारकम् तदेव hyperrole भवति, कारकस्य गौणार्थाः तु अन्तर्भागात् बहिः वर्तन्ते।

## सन्दर्भग्रन्थसूची

1. पतञ्जलिः, *महाभाष्यम्*, सम्पादकः – भार्गवशास्त्री भिकाजी जोशी, चौखम्बा संस्कृत प्रतिष्ठान, देहली, 1987.
2. नागेशः भट्टः, *परमलघुमञ्जूषा*, सम्पादकः – डा जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास

30. Bronkhorst Johannes. *The Role of meanings in Panini's grammar* in *Indian Linguistics*, volume 40, p. 153.
31. Deshpande Madhav M. *Prototypes in Paninian syntax* in *Journal of the American oriental society*, vol 111, p. 478

3. नागेशः भट्टः, *लघुशब्देन्दुशेखरः*, सम्पादकः – प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2013.
4. भट्टोजिदीक्षितः, *प्रौढमनोरमा (अव्ययीभावान्तो भागः)*, सम्पादकः – गोपालशास्त्री नेने, चौखम्बा संस्कृत् संस्थान, वाराणसी, 1994.
5. वामनजयादित्यौ, *काशिका*, Editors – Dr. Aryendra Sharma, Sri Khanderao Deshpande, Sanskrit Academy, Osmania University, Hyderabad, 2008.
6. Amita, Jangra Ajay. *A novel approach for identification of Karaka relations using semantic role labeling method*. International journal of scientific engineering and applied science, volume 1, issue 4, June 2015.
7. Apte Vaman Shivaram. *The student's guide to Sanskrit composition*. "The standard publishing company": Girgaon, Bombay – 1925.
8. Bronkhorst Johannes. *The Role of meanings in Panini's grammar* in *Indian Linguistics*, volume 40, pp. 146-157. Poona – 1979.
9. Cardona George. *Panini, His work and its traditions* (Second revised and enlarged edition). – "Motilal Banarsidas publishers": New Delhi – 1997.
10. Cardona George. *Panini's karakas: agency, animation and identity* in Journal of Indian philosophy, volume 2, pp. 231-306: Dordrecht – 1972.
11. Chomsky Noam. *Aspects of the theory of syntax*. "Massachusetts Institute of technology": Cambridge, Massachusetts – 1965.
12. Dash Achyutananda. *The syntactic role of Adhi in the Paninian Karaka system* in *Paninian studies* in *Paninian studies* – pp. 135-160. "University of Michigan press, University of Michigan center for South Asia studies": Ann Arbor – 1991.
13. Deshpande Madhav M. *Prototypes in Paninian syntax in Journal of the American oriental society*, vol 111, No.3, pp. 465-480 – 1991.
14. Fillmore Charles. J. *Case for case* in *Universals in linguistic theory*, pp. 1-88. New York: 1968.
15. Houben Jan E.M.. *Meaning statements' in Panini's grammar: on the purpose and context of the Ashtadhyayi* in *Studien zur Indologie und Iranistik,* pp. 23-54.
16. Kiparsky P., Stall J.F. *Syntactic and semantic relations in Panini* in *Universals: Studies in Indian logic and linguistics*, pp. 184-221. "The University of Chicago press": Chicago and London – 1988.
17. Kiparsky Paul. *On the Architecture of Panini's Grammar* in ISLCS: *Sanskrit computational linguistics* pp. 33-94. "Springer Berlin Heidelberg": Berlin – 2008.

18. Kudo Noriyuki. *The Notion of Karaka Discussed by the Grammarians* in *Journal of Indian and Buddhist Studies*, Vol. 44, No. 1., pp. 480-484. "Japanese association of Indian and Buddhist studies". December 1995.
19. Matilal Bimal Krishna. *Bhavananda on "What is karaka?"* in *Paninian studies* – pp. 263-281. "University of Michigan press, University of Michigan center for South Asia studies": Ann Arbor – 1991.
20. Namboodiri E.V.N.. *The Impact of Panini's Grammar on Modern Linguistics*. "LAP LAMBERT Academic publisher" – 2019.
21. Ray Saradaranjan. *Bhattoji Dikshita's Siddhant-Kaumudi – Karaka and samasa*, volume II. "Lalit press": Calcutta – 1920.
22. Scharf Peter M. *Modeling Paninian Grammar*. First international Sanskrit computational linguistics symposium. Rocquencourt, France – 2007.
23. Vasu Srisa Chandra. *The Ashtadhyayi of Panini*. "Motilal Banarsidas publisheers": Delhi – 2017.
24. Кукатова О.А.. *Типология семантических ролей актантов предикатов в современной лингвистической науке* в Вестник челябинского государственного университета, №1 (447). Филологические науки. Вып. 123, сс. 89-97 – 2021.
25. Курсанина Е.Е.. *К вопросу о падежной грамматике* в *Проблемы романо-германской филологии, педагогики и методики преподавания иностранных языков*: Пермь – 2007.
26. Рядинская С.В., Мигачев В.А. *Падежная грамматика Ч. Филлмора и современное понимание ролевой семантики глагола*. Иностранные языки в профессиональном образовании: лингвометод. контекст: материалы межвуз. науч.-практ. конф: Белгород, 17-18 мая 2006 г. / Белгор. ун-т потреб. кооперации, с. 175-181 – Белгород: 2006.
27. Уоллес Л. Чейф. *Значение и структура языка*. Перевод с английского Г.С. Щура. "Прогресс": Москва – 1975.

## अन्तर्जालम्

1. http:/elies.rediris.es/elies11/cap5111.htm
2. https://glossary.sil.org/term/semantic-role
3. http://www.englicious.org/lesson/semantic-roles
4. https://old.bigenc.ru/linguistics/text/4326141

# अभिनवदृशा-ध्वन्यालोके दीपशिखालोकः

-डॉ. पवनव्यासः*

“अस्मिन्नतिविचित्रपरम्परावाहिनि काव्यसंसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।”[1] आनन्दवर्धनाचार्याणामियमुक्तिः कविकुलगुरोरलोकसामान्यमालोकं वितनोति। “अभिव्यक्तेन स्फुरता प्रतिभाविशेषेण महाकवित्वगणनेति”[2] अभिनवोक्तिः। महाकविगणनाप्रसङ्गे कनिष्ठिकाधिष्ठितस्य कालिदासस्येदम्प्राथम्येनाभिख्यामभिदधता ध्वनिकृता सर्वेषां काव्यतत्त्वविवेचनविचक्षणानामालङ्कारिकाणामालोचनपथप्रकाशनाय काचिदभिनवा दीपशिखा सन्दीपिता यया चानन्दवर्धनोत्तरवर्तिभिरालङ्कारिकैः कालिदासस्य महाकवित्वसमीक्षणं स्वकीयसिद्धान्तग्रन्थेषु कृतं वर्तते। तस्य च प्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभास्वरस्य महाकवेः समीक्षणमभिनव प्रतिभानवतोऽभिनवगुप्तस्य लोचनं विना कथमपि न सम्भवतीति तदालोके तल्लोचनेनैव कालिदाससमीक्षणं विधीयते।

‘असच्चेत् न प्रतीयेत’ इति न्यायेन विद्यमानस्यैव लक्ष्यस्य लक्षणं क्रियते। यदा कश्चन शास्त्रकारः कस्यापि तत्त्वस्य लक्षणं करोति तदा तस्य मनसि लक्ष्यं स्फुटरूपेण विद्यमानं भवति। ध्वनिकारेण ध्वन्यालोके ध्वनिः लक्षितः, स च ध्वनिः काव्यविशेष एव। कस्य कवेः काव्यविशेषः आनन्दवर्धनस्य मनसि लक्ष्यरूपेण प्रतिष्ठितमासीदिति जिज्ञासायामुच्यते नूनं कालिदासस्यैव। यतो हि ध्वन्यालोकस्य त्रयोदशतमकारिकायां तेन ध्वनिलक्षणं निरूपितं, ततः प्राक्तनकारिकासु वृत्तिभागे च तद्भूमिका विनिर्मिता। अस्मिन् ध्वनिलक्षणभूमिकात्मके ग्रन्थभागे रचितासु कारिकासु वृत्तौ च कालिदासकाव्यपदावल्याः स्फुटः प्रभावः सन्दृश्यते। प्रतीयते यत्प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनामित्येतत् चतुर्थकारिका-पूर्वार्द्धलेखनावकाशे एवं कालिदासः तद्भारती च शास्त्रकारस्य मनसि विचार्यविषयत्वेन प्राविशत्। यतो हि ततः परं पञ्चमकारिकायां रसवस्त्वलङ्काररूपेषु सत्सु त्रिषु ध्वनिभेदेषु रसस्यैवात्मतत्त्वरूपेण स्थितिं प्रतिपादयता ध्वनिकारेणादिकाव्यघटनेतिहासप्रसङ्गः उदाहृतः-

---

* सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली।

1. ध्वन्यालोकः, 1/6,
2. ध्वन्यालोकलोचनटीका, 1/6,

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[3]

अत्र कालिदासप्रणीतस्य रघुवंशस्य पदावली अनुश्रूयते। तत्र कालिदास आदिकविं परिचाययन्नाह-

**तामभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः।**
**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः।।**[4]

पुनश्च प्रथमोद्योते षष्ठकारिकायां न केवलं कलिदासकाव्यपदावल्याः प्रयोगः दृश्यते अपितु वृत्तौ तेन महाकविगणनावकाशे कालिदासस्यैव नामोद्घोषणमपि कृतम्।

**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।**[5]

इतिकारिकायां कालिदासविरचितस्य कुमारसम्भवस्य

**अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्।**[6]

इत्येतस्य पद्यस्य पदावली प्रयुक्ता दृश्यते। वृत्तावपि शान्तरसनिरूपणप्रसङ्गे तृतीये उद्योते ध्वनिकारेण अलोकसामान्यशब्दस्य तथैव प्रयोगः कृतः- 'यदि नाम सर्वजनानुभवगोचरता तस्य नास्ति नैतावतासावलोकसामान्यमहानुभावचित्तवृत्तिविशेषः प्रतिक्षेप्तुं शक्यः।[7] रूपकादिरलङ्कारवर्गस्याङ्गत्वसाधनं प्रतिपादयन् वृत्तौ वक्ति ध्वनिकारः ततु सूक्तिसहस्रद्योतितात्मनां महात्मनां दोषोद्घोषणमात्मन एवं दूषणं भवतीति न विभज्य दर्शितम्।' अत्र

**न केवलं यो महतोऽपभाषते,**
**शृणोति तस्मादपि यः स पापभाक्।।**[8]

इति कालिदासनिबद्धपार्वतीवचनस्य प्रभावं केन निराकर्तुं शक्यते? अपि च ध्वन्यालोके प्रथमोद्योते नवमकारिकायाम् आनन्दवर्धनाचार्यो वाच्यवाचकयोः प्रथमतयोपादानप्रयोजनं निरूपयन्नाह-

**आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।**
**तदुपायतया तद्वदर्थे वाच्ये तदादृतः।।**[9]

---

3. ध्वन्यालोकः, 1/5
4. रघुवंशम्, 14/70
5. ध्वन्यालोकः, 1/6
6. कुमारसम्भवम्, 4/74
7. ध्वन्यालोकः, 3/23
8. कुमारसम्भवम्, 4/83
9. ध्वन्यालोकः, 1/8

इत्यत्र कारिकायां वृत्तौ च पौनः पुन्येन दीपशिखाशब्दस्य प्रयोगः दीपशिखा-कालिदासस्य प्रभावं विना कथं वा शक्येत? लक्ष्यं विना लक्षणं न सम्भवतीति प्रागुक्तम्। लक्ष्ये काव्ये विद्यमाने एव काव्यलक्ष्मविधायिनां काव्यशास्त्ररचनावकाशः भवतीति मनसि विचार्य एव कदाचिद् ध्वनिकारः वृत्तौ वक्ति-

**न हि दीपशिखामन्तरेणालोकः सम्भवतिः।**[10]

किमत्र दीपशिखाशब्देन कालिदासः, आलोकशब्देन च ध्वन्यालोकः न ध्वन्यते? 'हि'शब्दः तदन्यभावित्वं निराकृत्य तद्भावित्वमेव तत्त्वं (**दीपशिखाजन्यत्व-मेवालोकस्य तत्त्वम्**) द्योतयति। न ह्यत्रोक्तस्य व्यङ्ग्यार्थस्य सद्भावे किमपि प्रमाणं नास्तीति वाच्यम्। ध्वनिकारस्य वचनमेवात्र व्यङ्ग्यार्थसद्भावे प्रमाणम्। तच्च- **प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन** इति।[11] कालिदासश्चानन्दवर्धनस्य न केवलमभिमततरः अपितु अभिमततम एव। ननु काव्ये ह्येवं व्यङ्ग्यार्थयोजना शक्यते न तु ध्वन्यालोकसदृशे शास्त्रे इत्यपि पूर्वपक्षवचनावकाशः वृत्तिमिमां टीकयता लोचनकारेण खण्डितः- **विदग्धविद्वद्ग्रहणेन काव्यनये शास्त्रनय इति चानुसृतम्।** किञ्च ध्वन्यालोकस्य (काव्यालोकस्य वा) वा नामकरणेऽपि कदाचित् कालिदासप्रणीतरघुवंशस्य पद्यमेतद् संस्काररूपेण आनन्दवर्धनस्यान्तःकरणे उत्प्रेक्षितुं शक्यते-

**उदीरयामासुरिवोन्मदानामालोकशब्द वयसां विरावैः॥**[12]

मल्लिनाथेनात्र आलोकपदस्य जयशब्दः इत्यर्थः सूचितः। आलोको जयशब्दः स्यादिति विश्वः। ध्वन्यालोकग्रन्थनाम्नि प्रयुक्तो आलोकशब्दः न केवलं ध्वनेः प्रकाशं द्योतयति अपितु ध्वनिसिद्धान्तस्य जयकारमपि व्यनक्ति अलङ्कारशास्त्रपरम्पराया-मानन्दवर्धनेनैवेदम्प्रथमतया ग्रन्थनाम्नि आलोकशब्दस्य प्रयोगः कृतः।

इत्थं दीपशिखाकालिदासेन आनन्दवर्धन-ध्वन्यालोकः तेनैव च अभिनवलोचनस्य प्रवृत्तिसाफल्यं सम्भवतीति काव्यशास्त्रविकासपरम्परायां कविकुलगुरोरलोकसामान्य-मालोकव्यापि महत्त्वं वर्ततेतराम्।

**व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां न वाच्यवाचकरचनामात्रेण**[13] इत्यस्मिन्निकषे ध्वनिकारेण लोचनकारेण च बहुधा

---

10. ध्वन्यालोकः, 1/8
11. ध्वन्यालोकः, 4/5
12. रघुवंशम्, 2/9
13. ध्वन्यालोकः, 1/8

कालिदासकाव्यं समीक्षितम्। सलोचने ध्वन्यालोके ऋते ऋतुसंहारमालविकाग्निमित्राभ्यां पञ्चभ्यः कालिदासग्रन्थेभ्यो उपत्रिंशत्पद्यान्युदाहृतानि। स्थालीपुलाकन्यायेनात्र केचन सन्दर्भाः समीक्ष्यन्ते।

**1. ध्वन्यालोकलोचनदृशा कालिदासकाव्ये संलक्ष्यक्रमव्यङ्ग्यस्य सुप्रयुक्तत्वम्** - कविकुलगुरुणा कालिदासेन कुमारसम्भवमहाकाव्ये शिवपक्षतः देवर्षिमुखेनापर्णापरिणयप्रार्थनाश्रवणसमकालमेव पार्वत्याः मनोदशा मनोहारिणा पद्येनाभिवर्णिता-

**एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।**
**लीलाकमलपत्राणि गणयामास केवलम्॥**[14]

ध्वन्यालोके इदमेकमेव पद्यं क्वचिद्व्यङ्ग्यार्थसौन्दर्यदृष्ट्या क्वचिद्व्यञ्जकत्व-सौन्दर्यदृष्ट्या क्वचिच्च ध्वनिप्रभेदानामनुग्राह्यानुग्राहकदृष्ट्या षड्वारमुदाहृतम्।[15]

ध्वन्यालोकदृशा प्रधानतया पद्यमेतदर्थशक्त्युभ्दवसंलक्ष्यक्रमव्यङ्ग्यस्य विषयो वर्तते। लोचनदृशा तु पद्येऽस्मिन् लक्ष्यक्रमत्वमलक्ष्यक्रमत्वञ्चोभयमपि प्रकाशितं भवाते। तत्र ध्वन्यालोके यत्रार्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारं विनैव सोऽर्थशक्त्युद्भवो नामानुस्वानोपमव्यङ्ग्यो ध्वनिः। यथा एवंवादिनि...... केवलम्। अत्र हि लीलाकमलपत्रगणनमुपसर्जनीकृतस्वरूपं शब्दव्यापारं विनैवार्थान्तरं (लज्जात्मकमिति लोचनकारः) व्यभिचारिभावलक्षणं प्रकाशयति। न चायमलक्ष्यक्रम-व्यङ्ग्यस्यैव ध्वनेर्विषयः। इह तु सामर्थ्याक्षिप्तव्यभिचारिमुखेन रसप्रतीतिः।[16] लोचनटीकायाम्- इह तु पद्मदलगणनमधोमुखत्वं चान्यथापि कुमारीणां सम्भाव्यत इति झटिति न लज्जायां विश्रमयति हृदयम्, अपि तु प्राग्वृत्ततपश्चर्यादिवृत्तान्तानुस्मरणेन तत्र प्रतिपत्तिं करोतीति क्रमव्यङ्ग्यतैव। रसस्त्वत्रापि दूरत एव व्यभिचारिस्वरूपे पर्यालोच्यमाने भातीति तदपेक्षयाऽलक्ष्यक्रमतैव। लज्जापेक्षया तु तत्र लक्ष्यक्रमत्वम्। अमुमेव भावम् एवं शब्दः केवलशब्दश्च सूचयति।[17]

पाठालोचनदृष्ट्यापि अत्र 'लीलाकमलपत्राणिगणयामास केवलमिति' पाठः चिन्त्यः। यतो हि प्रकाशितग्रन्थेषु अन्यत्रापि वा क्वचिदलङ्कारग्रन्थान्तरेषु 'केवलम्' इति पाठस्थाने 'पार्वती' इति पाठभेद एव लभ्यते। अत्र लेखनमुद्रणादिजन्य-प्रमादस्यावसरोऽपि न सम्भाव्यते। यतः लोचनकारोऽपि 'अमुमेव भावमेवं शब्दः केवलशब्दश्च सूचयतीति वदन् केवलमिति पाठमङ्गीकरोति। प्रसङ्गान्तरे तृतीये

14. कुमारसम्भवम्, 6/84
15. धन्यालोकः, 2/22, 3/33, 3/39, 3/43, 4/4,
16. ध्वन्यालोकः, 2/22
17. ध्वन्यालोकलोचनटीका, 2/22

उद्योते ध्वनिकारेण पार्वती इति पाठान्तरोऽपि उदाहृतः। पद्येऽस्मिन् ध्वनिकारेण ध्वनेः स्वप्रभेदसङ्कीर्णत्वमपि निरूपितम्। तेनोक्तं- 'यदत्र ह्यर्थशक्त्युद्भवानुरणन-रूपव्यङ्ग्यध्वनिप्रभेदेनालक्ष्यक्रमव्यङ्ग्यध्वनिप्रभेदोऽनुगृह्यमाणः प्रतीयते।[18]

इत्थं कालिदासविरचितकुमारसम्भवस्येदमेकमेव पद्यं तादृशं किमप्यपूर्वं सौन्दर्यमादधाति यन्न केवलमानन्दवर्धनाय आनन्दवर्धनमपितु अभिनवगुप्तमम्मटभट्ट-पण्डितराजविश्वनाथप्रभृतयो आलङ्कारिकाः अद्यापि महाकवेस्तस्य कमनीयकाव्य-लीलाकमलपत्राणि गणयन्तो आत्मन्यानन्दमनुभवन्ति।

**2. ध्वन्यालोकलोचनदृशा कालिदासकाव्ये असंलक्ष्यक्रमव्यङ्ग्यस्य सुप्रयुक्तत्वम्**- ध्वनिकारोक्तदिशा यत्र साक्षाच्छब्दनिवेदितेभ्यो विभावानुभावव्यभिचारिभ्यो झटित्येव रसव्यक्तिर्भवति तत्रालक्ष्यक्रमव्यङ्ग्यस्य विषयो भवति। अस्याप्युदाहरणं कालिदासकाव्यादेव प्रदर्शयता तेनोक्तं- यथा कुमारसम्भवे मधुप्रसङ्गे वसन्तपुष्पाभरणं वहन्त्या देव्या आगमनादिवर्णनं मनोभवशरसन्धानपर्यन्तं शम्भोश्च परिवृत्तधैर्यस्य चेष्टाविशेषवर्णनादि साक्षाच्छब्दनिवेदितम्।[19] लोचनकारेण एतेषु पद्येष्वलक्ष्यक्रम-व्यङ्ग्यसद्भावः सम्प्रदर्शितः-

**निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।**
**अनुप्रयाता वनदेवताभिरदृश्यत स्थावरराजकन्या॥**

(कुमारसम्भवम् 3/53)

इत्यादौ सम्पूर्णालम्बनोद्दीपनविभावतायोग्यस्वभाववर्णनम्।

**प्रतिगृहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च।**
**सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्॥**

(कुमारसम्भवम्- 3/56)

इत्यनेन विभावतोपयोग उक्तः।

**हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**
**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥**

(कुमारसम्भवम्, 3/63)

अत्र हि भगवत्याः प्रथममेव तत्प्रवणत्वात्तस्य चेदानीं तदुन्मुखीभूतत्वात् प्रणयिप्रियतया च पक्षपातस्य सूचितस्य गाढीभावाद्रत्यामनः स्थायिभावस्यौत्सुक्या-वेगचापल्यहर्षादेश्च व्यभिचारिणः साधारणीभूतोऽनुभाववर्गः प्रकाशित इति विभावानु-

18. ध्वन्यालोकः, 3/43
19. ध्वन्यालोकः, 2/22

भावचर्वणैव व्यभिचारिचर्वणायां पर्यवस्यति। व्यभिचारिणां पारतन्त्र्यादेव स्त्रक्सूत्रकल्प-स्थायिचर्वणाविश्रान्तेरलक्ष्यक्रमत्वम्।[20]

ध्वन्यालोके द्वितीये उद्योते रसवदलङ्काराद् अलक्ष्यक्रमद्योतनात्मनो ध्वनेर्विभक्त-विषयतां प्रतिपादयता ध्वनिकारेण कालिदासकाव्यं रसनिधानभूतमिति संसूच्य विक्रमोर्वशीयस्य नदीलतावर्णनपरौ तात्पर्येण पुरुरवस उन्मादाक्रान्तस्योक्तिरूपौ श्लोकौ उदाहृतौ। यत्र सत्यामप्यचेतनानां वाक्यार्थीभावयोजनायां विप्रलम्भो शृङ्गाररसः प्रतीयते न त्वत्र रसवदलङ्कारस्य विषयता सम्भवति।[21]

भावध्वनिनिरूपणावकाशेऽपि लोचनकारः निदर्शनरूपेण कालिदासकाव्यमेव प्रस्तौति-तत्र यदा कश्चिदुद्रिक्तावस्थां प्रतिपन्नो व्यभिचारी

**तिष्ठेत्कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति**
**स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्यां मनः।**

**तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं**
**सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः॥**

(विक्रमोर्वशीयम 4/9)

अत्र हि विप्रलम्भरससद्भावेऽपीयति वितर्कादय व्यभिचारिचमत्क्रियाप्रयुक्त आस्वादातिशयः।[22]

### 3. कालिदासकाव्ये व्यञ्जकानां सुप्रयुक्तत्वम्-

महाकविना न केवलं व्यङ्ग्योऽर्थः सुप्रयुक्तः अपितु व्यञ्जकत्वदृष्ट्यापि तत्काव्ये किमप्यपूर्वसौन्दर्यं विद्यते। व्यञ्जकत्वमुखेन ध्वनितत्त्वं निरूपयता ध्वनिकारेण बहुधा कालिदासकाव्यं समीक्षितम्। तद्यथा

**i.** **पदानां व्यञ्जकत्वम्**- अविवक्षितवाच्यस्यात्यन्ततिरस्कृतवाच्ये प्रभेदे पदप्रकाशतां प्रदर्शयता ध्वनिकारेण कालिदासस्य मेघदूतात् 'कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्' (मेघदूत- 8) अभिज्ञानशाकुन्तलात् 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' अभिज्ञानशाकुन्तलम्- 1/19) इत्येतत् पद्यद्वयमुदाहृत्यानयोः सन्नद्ध इति पदस्य मधुराणामिति पदस्य च प्रयोगः

---

20. ध्वन्यालोकलोचनटीका, 2/22
21. ध्वन्यालोकः, 2/5
22. ध्वन्यालोकलोचनटीका, 2/3

व्यञ्जकत्वाभिप्रायेणैव निरूपितः। लोचनकारेण अनयोः पदयोः ध्वन्यमानोऽर्थो-व्याख्यातः- सन्नद्धपदेन चात्रासम्भवत्स्वार्थेनोद्यतत्वं लक्षयता वक्त्रभिप्रेता निष्करुणकत्वाप्रतिकार्यत्वापेक्षापूर्वकारित्वादयो ध्वन्यन्ते। तथैव मधुरशब्देन सर्वविषयरञ्जकत्वतर्पकत्वादिकं लक्षयता सातिशयाभिलाषविषयत्वं नात्राश्चर्य-मिति वक्त्रभिप्रेतं ध्वन्यते।[23]

ii. **सुबादीनां व्यञ्जकत्वम्**- सुबादीनामेकैकशः समुदितानां च व्यञ्जकत्वं महाकवीनां प्रबन्धेषु प्रायेण दृश्यते। सुबन्तस्य व्यञ्जकत्वं यथा-

**तालैः शिञ्जद्वलयसुभगैः कान्तया नर्तितो मे।**
**यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः॥** (मेघदूत 16)

अत्र लोचनकारमतेन तालैरिति बहुवचनमनेकविधं वैदग्ध्यं ध्वनत् विप्रलम्भोद्दीप-कतामेति।[24]

iii. **निपातानां व्यञ्जकत्वं** यथा-

**अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे।**
**नववारिधरोदयादहोभिर्भवितव्यं च निरातपार्धरम्यैः॥**

(विक्रमोर्वशीयम्. 4/3)

इत्यत्र च-शब्दः। अत्र टीकाकारो वदति यत् चशब्द इति जातावेकवचनम्। द्वौ चशब्दावेवमाहतुः। काकतालीयन्यायेन गण्डस्योपरि स्फोट इतिवत् तद्वियोगश्च वर्षासमयश्च समुपनतौ एतदलं प्राणहरणाय। अत एव रम्यपदेन सुतरामुद्दीपन-विभावत्वमुक्तम्।[25] निपातानां व्यञ्जकत्वे अभिज्ञानशाकुन्तलादपि पद्यमेकमुदाहृतम्। तच्च-

**मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।**
**मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥**

(अभिज्ञानशाकुन्तलम्- 3।38)

अत्र तुशब्दः पश्चात्तापसूचकस्सन् तावन्मात्रपरिचुम्बनलाभेनापि कृतकृत्यता स्यादिति ध्वनति।[26]

---

23. ध्वन्यालोकः, 3/1
24. ध्वन्यालोकः, 3/16
25. ध्वन्यालोकलोचनटीका, 3/16
26. ध्वन्यालोकलोचनटीका, 3/16

i. **उपसर्गाणां व्यञ्जकत्वं** यथा-

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः।**
**प्रस्निग्धा क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।**

(अभिज्ञानशाकुन्तलम्- 1-14)

इत्यत्र प्रकर्षेण स्निग्धा इति प्रशब्दः प्रकर्षं द्योतयन् इङ्गुदीफलानां सरसत्वमाचक्षाण आश्रमस्य सौन्दर्यातिशयं ध्वनति।[27]

ii. **द्वित्राणां निपातानामपि तथैव व्यञ्जकत्वं** यथा-

'अहो बतासि स्पृहणीयवीर्यः' इत्यादौ अहो बतेति निपाताभ्यामत्र श्लाघातिशयः ध्वन्यत इति लोचनकारस्यात्र आशयः।[28]

**4. रूपकादिरलङ्कारवर्गस्याङ्गत्वसाधनदृष्टया कालिदासकाव्यसमीक्षणम्-**

काव्ये केनचिदपि कविना यदि रूपकादिरलङ्कारवर्गः समीक्ष्य विनिवेश्यते तर्हि सः अलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेरङ्गिनः चारुत्वहेतुर्भवति। रूपकादिरलङ्कार-वर्गस्याङ्गत्वसाधनमिष्यता ध्वनिकारेण 'विवक्षा तत्परत्वेनेति' कारिकांशं बोधयितुमादौ कालिदासकाव्यमेवोपस्थापयता कथितं यत् रसबन्धेष्वत्यादृतमनाः कविर्यमलङ्कारं तदङ्गतया विवक्षति, यथा-

**चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं**
**रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।**
**करौ व्याधुन्वत्या पिबसि रतिसर्वस्वमधरं**
**वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥**

अत्र हि भ्रमरस्वभावोक्तिरलङ्कारो रसानुगुणः। पुनश्च ध्वनिकारः 'निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्' इत्यत्रापि मेघदूतस्य पद्यमिदमुदाहरति-

**श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं**
**गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।**
**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्**
**हन्तैकस्थं क्वचिदपि न ते भीरु सादृश्यमस्ति॥**

इत्यादौ। स एवमुपनिबध्यमानोऽलङ्कारो रसाभिव्यक्तिहेतुः कवेर्भवति।[29] महाकवेरस्यालङ्कारविन्यासकौशलं तदौचित्यवत्त्वञ्चालोचयता ध्वनिकारेणोक्तं यत्

27. ध्वन्यालोकलोचनटीका, 3/16
28. ध्वन्यालोकलोचनटीका, 3/16
29. ध्वन्यालोकः, 2/8,19

प्रथमं तावदतिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रिया। कृतैव च सा महाकविभिः (कालिदासादिभिरिति लोचनकारः) कामपि काव्यच्छविं पुष्यति, कथं ह्यतिशययोग्यता स्वविषयौचित्येन क्रियमाणा सती नोत्कर्षमावहेदिति।[30] एतैः सन्दर्भैः ज्ञायते यत् महाकविना कालिदासेन स्वकीये काव्ये रूपकादिरलङ्कारवर्गस्य तादृशः ललितोचित-सन्निवेषः कृतः येन ध्वनिकारः मुहुर्मुहुः महाकवेरस्य समीक्ष्यकारितां प्रशंसति।

### 5. प्रबन्धस्य रसाभिव्यञ्जकत्वदृष्टया कालिदाससमीक्षणम्-

संघटनायाः नियमने विषयाश्रयमौचित्यं प्रतिपादयता ध्वनिकारेणोक्तं- 'सर्गबन्धे तु रसतात्पर्ये यथारसमौचित्यमन्यथा तु कामचारः द्वयोरपि मार्गयोः सर्गबन्धविधायिनां दर्शनाद् रसतात्पर्यं साधीयः।' अत्र लोचनकारः 'रसतात्पर्यं यथा रघुवंशादि' इत्युक्त्वा कालिदासकाव्यमेव स्मरति। अपि च- इतिवृत्तवशायातां त्यक्त्वाऽननुगुणां स्थितिम्।[31] इतिकारिकां विवृण्वता वृत्तिकारेणोक्तं यद्इतिवृत्तवशायातां कथञ्चिद् रसाननुगुणां स्थितिं त्यक्त्वा पुनरुत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नेयो विधेयः यथा कालिदासप्रबन्धेषु। अत्र कालिदासप्रबन्धेषु इति बहुवचनेन ज्ञायते यत् कालिदासस्य एकाधिकप्रबन्धेष्वी-दृशमौचित्यं ध्वनिकारेण समीक्षितमासीत्। अभिज्ञानशाकुन्तले दुर्वाससः शापवृत्तान्त-योजनामुत्प्रेक्ष्य कविना प्रबन्धे यथा रसाभिव्यञ्जकत्वं साधितं तत्तु प्रसिद्धमेव। लोचनकारः रघुवंशेऽजादीनां राज्ञां विवाहादिवर्णनं नेतिहासेषु निरूपितमित्युक्त्वा ध्वनिकारस्याशयं प्रतिपादितवान्।[32]

प्रबन्धस्य रसाभिव्यञ्जकत्वदृष्टया कालिदाससमीक्षणं कुर्वता ध्वनिकारेण तत्काव्ये यथौचित्यं समीक्षितं तथैवानौचित्यमपि समालोचितम्। रत्यादिभावे वर्णनीये नायकप्रकृत्यौचित्यातिक्रमो। दोषाय इति विषयं निरूपयता तेनोक्तं यद्भिनेयार्थेऽनभिनेयार्थे वा काव्ये यदुत्तमप्रकृतेः राजादेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं तत्पित्रोः सम्भोगवर्णनमिव सुतरामसभ्यम्। तथैवोत्तमदेवतादिविषयम्। ..... यत्त्वेवंविधे विषये महाकवीनामप्यसमीक्ष्यकारिता लक्ष्ये दृश्यते स दोष एव। स तु शक्ति-तिरस्कृतत्वात् तेषां न लक्ष्यत इत्युक्तमेव।[33] स्पष्टमेवात्रानन्दवर्धनः कालिदासप्रणीते कुमारसम्भवे पार्वतीपरमेश्वरयोः शृङ्गारवर्णने अनौचित्यमाक्षिपति। तन्मते अव्युत्पत्ति-कृतोऽयं दोषः यद्यपि शक्तितिरस्कृतत्वात् नावभासते तथापि महाकवेरियमसमीक्ष्यकारिता प्रबन्धस्य रसाभिव्यञ्जकत्वदृष्टया अनौचित्यपूर्णैव। ध्वनिकारस्य महाकवि-समालोचनात्मके महत्त्वपूर्णेऽस्मिन् विषये लोचनकर्तुर्लोचनमीलनमाश्चर्यकरम्। किमत्र

30. ध्वन्यालोकः, 3/34
31. ध्वन्यालोकः, 3/11
32. ध्वन्यालोकः, 3/11
33. ध्वन्यालोकः, 3/11-14

महामाहेश्वर- स्याभिनवगुप्तस्य सर्वथा मौनावलम्बने भगवदनुग्रहपवित्रितवाचं कालिदासं प्रति श्रद्धातिशयः कारणमाहोस्वित्कालिदासपक्षरक्षणे मूलग्रन्थविरोधावसरः टीकाकरणे च कालिदासविरोधावसर इति धिया लोचनकारेण न किमपि व्याख्यातम्। किन्तु यत्र क्वचिदपि सः कालिदासस्य पक्षपोषणावकाशमवाप्नोति तत्र महता प्रयत्नेन साधयति। यथा अस्मिन्नैव विषये प्रसङ्गान्तरे यत्रोक्तं ध्वनिकृता-

तथा हि महाकवीनामप्युत्तमदेवताविषयप्रसिद्धसम्भोगशृङ्गारनिबन्धनाद्यनौचित्यं शक्तितिरस्कृतत्वात् ग्राम्यत्वेन न प्रतिभासते। यथा कुमारसम्भवे देवीसम्भोगवर्णने।[34] अत्र लोचनकारः शक्तिं व्युत्पत्तिं च लक्ष्यन् शक्तितिरस्कृतत्वादिति हेतुं समुचित-दृष्टान्तवर्णनेन समर्थयति-

'शक्तिः प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्। व्युत्पत्तिस्तदुप-योगिसमस्तवस्तुपौर्वापर्यपरामर्शकौशलम्। शक्तितिरस्कृतत्वादिति। सम्भोगोऽपि ह्यसौ वर्णितस्तथा प्रतिभानवता कविना यथा तत्रैव विश्रान्तं हृदयं पौर्वापर्यपरामर्शं कर्तुं न ददाति यथा निर्व्याजपराक्रमस्य पुरुषस्याविषयेऽपि युध्यमानस्य तावत्तस्मिन्नवसरे साधुवादो वितीर्यते न तु पौर्वापर्यपरामर्शे तथात्रापीति भावः।[35] महामाहेश्वरस्याभि-नवगुप्तपादस्य पार्वतीपरमेश्वरयोः संयोगशृङ्गारं वर्णयतः कवेः पक्षरक्षणं तं प्रति च श्रद्धातिशयप्रकटनमित्यत्र विद्यते किमपि रहस्यम्। तत्तु नितान्तनिर्मलान्तःकरणैः वागर्थप्रतिपत्तिशीलैः कैश्चित् प्रत्यभिज्ञातव्यं स्यात्। प्रसङ्गेऽस्मिन् लोचनटीकायां कश्चन सन्दर्भः इतोऽपि प्राप्यते यत्राभिनवगुप्तपादः कालिदासपक्षरक्षणाय कालिदास-काव्यादेव हेतुमुपस्थापयन् दृश्यते। तद्यथा

**पूर्वे विशृङ्खलगिरः कवयः प्राप्तकीर्तयः।**
**तान्समाश्रित्य न त्याज्या नीतिरेषा मनीषिणा॥**

ध्वन्यालोकस्यास्य परिकरश्लोकस्य यथासम्भवमर्थटीकनं विदधता आचार्येणोक्तं यत् 'ननु कालिदासः परिपोषं गतस्यापि करुणस्य रतिविलापेषु पौनःपुन्येन दीपनमकार्षीत्, तत्कोऽयं रसविरोधिनां परिहारनिर्बन्ध इत्याशङ्क्याह पूर्व इति। न हि वसिष्ठादिभिः कथञ्चिद्यदिस्मृतिमार्गस्त्यक्तस्तद् वयमपि तथा व्रजामः। अचिन्त्यहेतुकत्वादु-परिचरितानामिति भावः'।[36] लोचनकारेणात्र 'अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्' इति कालिदासकविनिबद्धपार्वतीवचनेनैव दोषपरिहारः प्रतिपादितः।

---

34. ध्वन्यालोकः, 3/6
35. ध्वन्यालोकलोचनटीका, 3/6
36. ध्वन्यालोकलोचनटीका, 3/18

**अथायं निष्कर्षः-**

1. आलङ्कारिकमूर्धन्येनानन्दवर्धनाचार्येण महाकविशिरोमणिभूतत्वेन कण्ठोक्ततया स्तुतस्य महाकवेः कुलगुरोः कालिदासस्य काव्यविशेषः ध्वनेः भेदानामाकरतया समादृतः।

2. ध्वन्यालोकटीकाकारः महामाहेश्वरोऽभिनवगुप्तपादाचार्योऽपि न केवलमनुसरति ध्वनिकारसरणिम्, अपि तु तदतिरिक्ततयापि कालिदासकाव्येऽभिव्यज्यमानान् ध्वनिप्रभेदान् प्रदर्शयन कालिदासीये काव्ये ध्वनेः प्राधान्यं सूक्ष्मेक्षिकया निरूपयति। लोचनकारलोचनयोः कालिदासीया मूर्तिः श्रद्धास्पदतया विराजते। प्रत्यभिज्ञापरायणस्याभिनवगुप्तपादाचार्यस्य लोचनमालोकसाहाय्यमधिगत्य कालिदासीयं तत्त्वदर्शनं कुर्वन् कारयन्नपि न नो विस्मयमादधाति। किं बहुना स्वेष्टग्रन्थटीकाकरणे मूलग्रन्थकर्तुः आनन्दवर्धनाचार्यस्य कालिदासपरां निष्ठामपि क्वचित् क्वचिदतिशेते लोचनकारः।

3. ध्वनेः सर्वेष्वपि मुख्यभेदेषु कालिदासीयं काव्यमुदाहरणत्वेनोपस्थापयन्नानन्द-वर्धनाचार्यः उदाहृतसन्दर्भसङ्ख्यादृशा महाकविकालिदासमेव प्रमाणीकरोति।

4. 'व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां न वाच्यवाचकरचनामात्रेण' इति स्वकीयस्थापनायाः प्रामाण्यं कालिदास काव्यमाश्रित्य प्रतिपादयता ध्वनिकृता, तट्टीकयता लोचनकारेण च तत्रभवान् कालिदास एव मुहुर्मुहुः प्रमाणीकृतः।

**कालिदासवचः कुत्र व्याख्यातारो वयं क्व च।**
**तदिदं मन्ददीपेन राजवेश्मप्रकाशनम्॥**

(-मेघदूतस्य वल्लभदेवटीकायाम्)

इति वचोभिः कालिदासीयवागर्थप्रतिपत्तिरूपराजप्रासादप्रकाशने स्वकीयम-सामर्थ्यमुद्घोषयतां कालिदाससमीक्षकानां लोचनानि कालिदासीयशब्दार्थज्योतिःपुञ्जेन समुन्मीलयतोः आनन्दवर्धनाभिनव-गुप्तयोः ध्वन्यालोकलोचनात्मकं दर्शनद्वयं राजतेतराम्।

✦✦✦

# द्वैताद्वैतवेदान्ते मोक्षसाधनम्

**अर्घ्यदीपरायः** *

**शोधसारः** - वेदान्तशास्त्रेषु प्रतिपादितानि तत्त्वानि स्वात्मबुद्ध्या विचारयन् बहवः साम्प्रदायिकसिद्धान्ता उपन्यस्ता विपश्चिद्भिः। तेषु अद्वैत-द्वैत-द्वैताद्वैत-विशिष्टाद्वैतादीनि मतानि प्रसिद्धानि। तत्र श्रीमन् निम्बार्काचार्य्यप्रणीते द्वैताद्वैतसिद्धान्ते जीव-ब्रह्मणोः स्वाभाविक-भेदाभेदः प्रतिष्ठितः। तन्मते मोक्षो नाम जीवस्य भगवद्भावापत्तिः स्वस्वरूपानन्दावाप्तिश्च। भगवत्प्रसाद एव मोक्षसाधनम्। किन्तु, भगवत्प्रसादो न सुलभः। अतः तल्लाभाय बहवः पन्थानः उपदिष्टाः शास्त्रेषु। श्रुति-स्मृति-पुराणादिषु उपलब्धानि तानि मोक्षसाधनानि सुतरां तत्त्वजिज्ञासुना आलोचनीयानि। अस्मिन्। सन्दर्भे भगवता श्रीममन् निम्बार्काचार्य्येन मोक्षसाधनविषये द्वैताद्वैतसिद्धान्तं यथा उपन्यस्तं तत्सर्वमिदानीम्। अत्र सविस्तारमालोच्यते।

**प्रमुखशब्दाः** - भगवद्भावापत्तिः, ध्रुवास्मृतिः, निदिध्यासनम्, विदेहमुक्तिः, अपवर्गः, अपूर्वविधिः।

**मूलपाठः** - मोक्ष एव परमपुरुषार्थः इति मन्यमानाः सर्वे दर्शनसम्प्रदायविदो मोक्षसाधनानि प्रोक्तवन्तः। साम्प्रदायिकसिद्धान्तभेदात् तत्र मोक्षसाधनान्यपि भिन्नानि। तद्यथा, साङ्ख्यसिद्धान्तेषु 'अपवर्गः' परमपुरुषार्थत्वेन अभिहितः। स एव ऐकान्तिकात्यन्तिकदुःखनिरोधो मोक्षपदवाच्य इति। मोक्षसाधनविषये साङ्ख्यदर्शनं ज्ञानवादी। प्रकृतिपुरुषयोर्विवेकज्ञानमेव तत्र मोक्षसाधनत्वेन उदाहृतम्। उक्तञ्च आचार्य-ईश्वरकृष्णेन साङ्ख्यकारिकायाम्, "ज्ञानेन अपवर्गः" इति। धर्म-वैराग्यौ तु तत्सहायकौ। धर्मादिना ऊर्ध्वलोकं प्राप्यते, वैराग्येण च प्रकृतिलयः। अत एतौ न मोक्षस्य साक्षात्कारणे इति। किन्तु पुरुषतत्त्वाभिज्ञस्य वैराग्यादपवर्गोऽपि सम्भवेत्। तदेव कालान्तरावृत्तिरहितोऽपवर्गजनकं ज्ञानं विवेकख्यातिः सत्त्वपुरुषान्यताख्यातिः वा इत्युच्यते। पुरुषस्य भोग-मोक्षार्थं प्रकृतेः प्रयत्नं साङ्ख्यतत्त्वेषु स्वीकृतम्। अतः विवेकख्यातिपर्यन्तमेव प्रकृतिचेष्टितमिति ज्ञातव्यम्। अथ कस्माद् विवेकख्यातिरि चेत्, उच्यते, व्यक्ताव्यक्तज्ञविज्ञानात्। ननु साङ्ख्यशास्त्राध्ययनेनैव तत्त्वज्ञानाधिगमे सर्वेषामविशेषेण साङ्ख्यशास्त्राध्येतॄणामपवर्गापत्ति इति चेत्, उच्यते आचार्य-

---

* सहकारी-अध्यापकः, खलिसानी महाविद्यालय, चन्दननगर, हुगली, पश्चिमबङ्ग।

ईश्वरकृष्णैः, "एवं तत्त्वाभ्यासात्" इति। अत्र 'तत्त्व'शब्देन तत्त्वज्ञानाभ्यास एव लक्षितः। साङ्ख्यसमानतन्त्र-पातञ्जलदर्शने तु मोक्षसाधनं भिन्नतया उपदिष्टम्। योगसूत्रस्य व्यासभाष्ये योगः समाधि इत्युक्तम्। सोऽपि सम्प्रज्ञातोऽसम्प्रज्ञात इति भेदाद्द्विविधः। तत्र "यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबन्धनानि श्लथयति निरोधाभिमुखं करोति स सम्प्रज्ञातः समाधि"[1] इत्युक्तम्। सर्वेषां चित्तवृत्तीनां निरोधे असम्प्रज्ञातः समाधिः। तत्र असम्प्रज्ञातसमाधौ संस्कारचित्तं विनिवर्त्तते, तस्मिन्निवृत्ते पुरुषः स्वरूपप्रतिष्ठः शुद्धो मुक्तो भवति।

नैयायिकास्तु मोक्षसाधनविषये ज्ञानवादिनः। उक्तञ्च न्यायसूत्रकारैः, "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छलजाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[2] इति। किन्तु तन्निःश्रेयस्तु न तत्त्वज्ञान-समनन्तरमेव स्यात्, अपि तु, "दुःखजन्मप्रवृत्तिदोषमिथ्या-ज्ञानानामुत्तरोत्तरापाये तद-न्तरापायादपवर्गः"[3] इति। अतः आदौ तत्त्वज्ञानात् मिथ्योपलब्धिविनाशः, ततस्तेन दोषहानिः, ततः कार्यप्रवृत्तिनाशः, तेन जन्मबन्धक्षयः, तस्मात् दुःखनिरोधरूपोऽपवर्ग इति। तत्त्वज्ञानमन्तरेण न मोक्ष इति मन्यमानः श्रीमच्छङ्कराचार्यपादैरपि ब्रह्मसूत्रभाष्ये स्वमतं द्रढयितुं महर्षिगौतमप्रणीतं सूत्रमिदम् उल्लिखितम्।[4] बौद्धदर्शने 'सर्वं दुःखं दुःखम्' इत्यादिना जगतो दुःखात्मकत्व-मादावुपन्यस्तम्। तत आर्यसत्यचतुष्टयेषु दुःखसमुदायः, दुःखनिरोधः, दुःखनिरोधोपायश्च उपदिष्टाः। उक्तञ्च बोधचित्तविवरणे, "दुःखमायतनं चौव ततः समुदयो मत। मार्गश्चेत्तस्य च व्याख्या क्रमेण श्रुयतामतः"[5] इति। तत्र ऐकान्तिकदुःखनिरोधो 'निर्वाण' इत्यभिधीयते। दुःखनिवृत्त्युपायत्वेन च 'अष्टाङ्गिकमार्गः' सविशेषतया उल्लिखितः। सम्यक्-दृष्टिः, सम्यक्-सङ्कल्पः, सम्यक्-वाक्, सम्यक्-कर्मान्तः, सम्यक्-आजीवः, सम्यक्-व्यायामः, सम्यक्-स्मृति, सम्यक्-समाधिः इत्येते दुःखनिरोधोपायाः। जैनमते आस्रवो भवहेतुः, आस्रवनिरोधे मोक्षः। स एव आस्रवनिरोधः संवर इत्युच्यते। तत्र सम्यग्दर्शन-ज्ञान-चरित्राणि मोक्षमार्गत्वेन उपदिष्टानि। एते मोक्षमार्गाः 'त्रिरत्न' इत्यभिधीयन्ते।

मोक्षसाधनोपायत्वेन सर्वेषु वेदान्तसम्प्रदायेषु ज्ञान-कर्म-भक्तिरिति त्रितयस्य उपयोगः सामान्यत उल्लिख्यते। अद्वैतवेदान्ते तु ज्ञानमार्ग एव मोक्षोपायः।

---

1. योगसूत्रम्, व्यासभाष्यम् (1।1)
2. न्यायसूत्रम् (1।1।1)
3. तदेव (1।2)
4. "तथाचाचार्य्यप्रणीतं न्यायोपवृंहितं सूत्रम्, ...... ... " -ब्रह्मसूत्रम्, शाङ्करभाष्यम् (1।1।4)
5. सर्वदर्शनसंग्रहः, कलिकाता-संस्करणम्, बौद्धदर्शनम् (पृष्ठम् - 14)

श्रवण-मनन-निदिध्यासनादिना लब्धापरोक्षनिर्गुणब्रह्मज्ञानान्मोक्ष इति अद्वैतसिद्धान्तः। अत उपनिषत्सु श्रोतव्यो-मन्तव्यो-निदिध्यासितव्य इतादिना मोक्षसाधनत्वेन ज्ञानयोग उपदिष्टः इति। वैदान्तिक-वैष्णवसम्प्रदायेषु मोक्षसाधनत्वेन भक्तेः एव प्राधान्यं दरीदृश्यते। अतः द्वैताद्वैतमतावलम्वि-श्रीनिम्बार्कसम्प्रदाये मोक्षसाधनत्वेन आदौ ज्ञानयोगस्य माहात्म्य-मङ्गीकृत्य, अन्ते तु भक्तेः एव प्राधान्यम् उल्लिख्यते। उक्तञ्च भगवता श्रीमन्निम्बार्काचार्येण, "अनादिमाया परियुक्तरूपां त्वेनं विदुर्वै भगवत्प्रसादात्"[6], "नान्यगतिः कृष्णपादारविन्दात् संदृश्यते ब्रह्माशिवादिवन्दितात्। भक्तेच्छयापात्त-सुचिन्त्यविग्रहा-दचिन्त्यशक्तेरविचिन्त्यसाशयात्"[7] इत्यादिः। अतो भगवत्प्रसाद एव मोक्षसाधनम्। तल्लाभोपायः पराभक्तिरेव इति। भगवतः कृपाकटाक्षं विना मुक्तिर्न भवति इत्यत्र नास्ति सन्देहः। एतन्मते, जन्मकाले एव भगवतः कृपाप्रसादेन मानवस्य मनसि विषयवैराग्य-वीजमुप्तं भवति, तेन तस्य मुमुक्षुत्वं कालेन उपजायते। यस्य तु न तथा, तं प्रति भगवतः कृपादृष्टेरानुकूल्याभाव एव तत्र हेतुः। उक्तञ्च महाभारते, "जायमानं हि पुरुषं यं पश्येन् मधुसूदनः। सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः"[8] इति।

द्वैताद्वैतदर्शने मोक्षप्राप्तेः साधनक्रम एवमुच्यते, यत्, जन्मकाले एव भगवत्कृपाकटाक्षावलोकितः सन् जीवो निवृत्तिमार्गमनुसरति, तस्मिन् सात्त्विक-भावश्चाभिवर्धते। ततः स स्वकीयवर्णा-श्रमानुरूपं वेदोक्तधर्ममाचरन् निष्कामकर्म कुरुते, भगवदाज्ञाबोधेन स्वधर्मज्ञानेन च केवलं कर्त्तव्यकर्म आचरन् तदपि भगवत्प्रीत्यर्थं समर्पयन् स मुमुक्षुः क्रमाद् विषयवैराग्य-मनुभवति। ततो गुरूक्तसाधनमाश्रित्य श्रवण-मनन-निदिध्यासनादिना ब्रह्मविद्यां प्राप्तुं यतते। ततः पुनः तस्मिन् भगवतोऽनुग्रहो भवेदिति चेत् स भगवद्भावापत्तिलक्षणं मोक्षमाप्नोति। अपि च मोक्षसाधनत्वेन भगवत्प्रसादस्य महिमा तत्र तत्र श्रुतिष्वपि दृश्यते, "तमक्रतुः पश्यति वीतशोको धातुः प्रसादन्महिमानमात्मनः"[9], "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्,"[10] "यो ब्रह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धि-प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये"[11] इति। द्वैताद्वैतदर्शने मोक्षसाधनविषये बह्वालोचनं दृश्यते। तत्रापि

---

6. वेदान्तकामधेनुः 2
7. वेदान्तकामधेनुः 8
8. महाभारतम्, नारायणी-आख्यानम्।
9. कठोपनिषत् (1।2।20)
10. कठोपनिषत् (1।2।23)
11. श्वेताश्वतरोपनिषत् (6।18)

श्रीमन्निम्बार्काचार्यप्रणीतेषु मन्त्ररहस्यषोडशी, प्रपन्नकल्पवल्ली इत्यादि-ग्रन्थेषु विशेषतया मोक्षसाधनानि आलोचितानि। तत्र एवं प्राप्यते यत्, ज्ञान-कर्म-भक्तिः इति साधनत्रयः समुदिता न तु व्यस्ताः तस्य भगवद्भावापात्तिलक्षणस्य मोक्षस्य प्राप्तौ हेतुः इति। अतो ज्ञानमार्गे कर्ममार्गेऽपि यथा भक्तिरिष्यते तथा हि भक्तिमार्गेऽपि ज्ञानकर्मणोरुपयोग इष्टः। अतो न ज्ञानेन विना कर्म [मोक्ष] फलवद्भवति, न च भक्त्या विना शुष्कज्ञानं मोक्षसाधनं भवति इति। अथेदानीमेतेषां सर्वेषां सविस्तारमालोचनं द्वैताद्वैतसिद्धान्तसम्मतं प्रस्तुयते -

नित्यनैमित्तिककाम्यभेदात् कर्म त्रिविधम्। तत्रापि 'अहरहः सन्ध्यामुपासीत', 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिना वर्णाश्रमधर्माणां नित्यकर्मत्वं श्रुतावेव प्रतिपादितम्। अतोऽग्निहोत्र-सन्ध्योपासना-तर्पणादि नित्यकर्माणि। तान्यकरणे प्रत्यवायसाधनानि। निमित्तविशेषं लक्ष्यीकृत्य अनुष्ठितं कर्म नैमित्तिककर्म इति। यथा पुत्रजन्माद्यनुबन्धीनि जात्येष्ट्यादीनि। काम्यकर्माणि तु स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि। एषु त्रिविधकर्मेषु मोक्षार्थिपुरुष आदौ काम्यकर्म वर्ज्जयेत्, यतः काम्यकर्माणि संसारहेतवो मोक्षप्रतिबन्धकाश्च। नित्यनैमित्तिककर्माणि तु अवश्यकर्तव्यानि, किन्तु तत्रापि भगवत्प्रीत्यर्थमेव सर्वेषां कर्माणामाचरणं स्यादिति विशेषः। भगवत्प्रीत्यर्थं कृतं कर्म तत्प्रसादाय कल्प्यते। अतस्तेन भगवदनुग्रहो लभ्यते। तदनुग्रहेण चित्तशुद्धिः, ततो ज्ञान-भक्ती इति साधनान्तरे अपि स्वत एव लभ्येते। अतः कर्मयोगस्य माहात्म्यं शास्त्रेषु तत्र तत्र वर्णितम्। तद्यथा गीतासु, "ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप। कर्म्माणि प्रविभक्तानि स्वभावप्रभवै-र्गुणैः", "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः", "सर्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः"[12] इति। तस्मात्, ज्ञान-भक्त्योदये कर्मण उपयोगात् परम्परया कर्म अपि मोक्षसाधनं भवति। "तमेतंवेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन"[13] इत्यादिषु विविदिषाश्रुतिष्वपि तपःप्रभृतिकर्माणां ब्रह्मजिज्ञासा-उत्पादकत्वमुक्तम्। तत्र न ब्रह्मज्ञानस्य साक्षात् मोक्षसाधनत्वमुक्तम्, नापि कर्मणश्च। उक्तञ्च आचार्यमाधवमुकुन्दैः "तस्मात् कर्मणो ज्ञानभक्त्युत्पादनद्वारेणैव मोक्षसाधनत्वं, न स्वातन्त्र्येण। नापि ब्रह्मविद्यासमुच्चयेनेति सम्प्रदायो राद्धान्तः"[14] इति। पुनः कर्मणः साक्षात् मोक्षसाधन-त्वाभावः "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"[15] इत्यादि ब्रह्मसूत्रेष्वपि उपन्यस्तः। अत्रोच्यते भगवता भाष्यकारेण श्रीमन्निम्बार्काचार्येण, "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन

---

12. श्रीमद्भगवद्गीता (18।41, 45, 46)
13. बृहदारण्यकोपनिषत्, (4।4।22)
14. अध्यास(परपक्षः)गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 805)
15. ब्रह्मसूत्रम् (3।4।26)

तपसाऽनाशकेन'इत्यादि श्रुतेर्गमनेऽश्ववद्विद्या स्वोत्पत्तौ साधनभूतानि सर्वाणि कर्माण्यपेक्ष्यते"[16] इति। यद्यपि 'ब्रह्मनिष्ठोऽमृतत्वमेति' इत्यादि-श्रुत्या एवं निश्चीयते यत् संन्यासिनां कृते मोक्षलाभार्थं यज्ञहोमादिकर्मानुष्ठानस्य अपेक्षा नास्ति, केवलं विद्याप्रभावेनैव ते ऊर्ध्वरेतसो मोक्षपदमाप्नुवन्ति, किन्तु, 'तमेतं वेदानुवचनेन' इत्यादिश्रुत्या विद्योत्पत्तिपक्षे यज्ञदानादेः समस्तविहितकार्यस्य अपेक्षा तु अस्त्येव इत्युपपद्यते। यथा गमनकार्यनिमित्तं हस्त्यश्वादि प्रयोजनीयं, किन्तु कार्यसिद्ध्य-नन्तरं यत् देशविशेषप्राप्तिरूपफलं प्राप्यते, तस्य साक्षात् कारणता तु हस्त्यश्वादेर्नास्ति, तद्वत् यागादिकर्म विद्यासाधनभूतमेव, तेन लभ्यते विद्या, ततो विद्यया मोक्षः, इति। तस्मात्, साक्षात् सम्बन्धेन यागादिकर्म न मोक्षान्वयी, अपि तु परम्परया एव। अतः "अत्र प्रत्ययार्थप्राधान्याङ्गीकारे इच्छाद्वारा यज्ञादयो ज्ञानाङ्गतया विनियुज्यन्ते, प्रकृत्यर्थप्राधा-न्याङ्गीकारे यज्ञादीनामिष्यमानज्ञानाङ्गत्वं साक्षात् प्राप्नोतीति बोध्यम्"[17]।

ज्ञानमार्गे तु 'श्रोतव्यमन्तव्यनिदिध्यासितव्ये'त्यादिश्रुतिमनुसृत्य श्रवण-मनन-निदिध्यासनादीनां मोक्षसाधनत्वमुपदिष्टम्। शास्त्रविहित-नित्यनैमित्तिक-वर्णाश्रम-धर्माणामनुष्ठानात् शुद्धचित्तसाधको ब्रह्मतत्त्वजिज्ञासुः सन् गुरोः समीपमुपस्थिते सति तं शरणागतं यद्ब्रह्मतत्त्वमुपदिशति गुरुः, तत् श्रवणं श्रवणपदवाच्यम्। गुरुमुखाद् आत्मतत्त्वोपदेशं श्रुत्वा श्रुत्यनुकूलयुक्तिनिष्ठविचारप्रयुक्तेन मनसा तज्ज्ञानस्य पुनः पुनरालोचनं, चिन्तनं परीक्षणं मननपदवाच्यम्। किन्तु श्रवणमननाभ्यां आत्मविषयकम-परोक्षज्ञानं न भवति। श्रवणमननादिविषयकं ज्ञानं तु परोक्षज्ञानं, वस्तुनिष्ठत्वात्। अतः साधक आत्मविषयकापरोक्षज्ञानलाभाय निरवच्छिन्नं ध्यानमाश्रयेत्। तदेव निदिध्यासनम्। तेन लभ्यते ध्रुवास्मृतिः, तस्मात् भगवति पराभक्तिरुपजायते, ततो मोक्ष इति स्थितिः। अत उक्त-माचार्यमाधवमुकुन्दैः, "ध्यानं भगवदनुग्रहासाधारणं कारणम्, तस्य [भगवदनुग्रहस्य] च सद्यो मोक्षासाधारणोपायत्व-मिति राध्यान्तः"[18] इति। ननु श्रवणादेः मोक्षसाधनत्वे निर्दिष्टे पुनः भगवदनुग्रहस्य कथं मोक्षसाधनत्वमिति चेत्, उच्यते, व्यभिचारदर्शनात्, "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृनुते तनुं स्वाम्"[19] इत्यादिश्रुतेश्च। अस्तु नाम, कथं तर्हि "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते"[20] इति श्रुतेः सार्थक्यं स्यादिति चेत्, उच्यते, मोक्षसाधने ध्यानस्य करणत्वं भगवदनुग्रहस्य च

---

16. तदेव, वेदान्तपारिजातसौरभ-भाष्यम्।
17. ब्रह्मसूत्रम्, वेदान्तकौस्तुभ-भाष्यम् (3।4।26)
18. अध्यास(परपक्षः)गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 830)
19. कठोपनिषत् (1।2।23)
20. मुण्डकोपनिषत् (3।1।8)

व्यापारत्वं स्वीकार्यम्।[21] अतः श्रवणमनन-निदिध्यासनादि न साक्षात्-मोक्षसाधनानि, किन्तु भगवत्प्रसादप्राप्तेः मूलभूता या पराभक्तिः, तस्या उपपादनेन श्रवनादयो मोक्षसहायका भवन्ति। तत्रापि निदिध्यासनमेव प्रधानसहायकम्, अन्ये तु तदङ्गे इति। यद्यपि ब्रह्मविद्यार्थिणो वर्णाश्रमधर्मानुष्ठानेन निर्मलचित्ता एव भवन्ति, तथापि ते शमदमाद्युपेता अपि स्युरिति भगवतो ब्रह्मसूत्रकारस्याभिमतम्। अतः शमदमादी-नामपि विद्याङ्गत्वाद् विद्योदयाय तेषामनुष्ठानं विहितम्, "तस्मादेवंविच्छान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येदि"[22] त्यादि श्रुतेः। तत्र मनसः संयमनं शम इति, चक्षुरादिपञ्चज्ञानेन्द्रियाणां वागादिपञ्चकर्मेन्द्रियाणां च संयमनं दम इति, सांसारिकजागतिकविषयेषु इन्द्रियनिरोध उपरतीति, शीतोष्णादिद्वन्द्वसहिष्णुता तितिक्षेति, चित्तैकाग्रं समाधानमिति, गुरूपदिष्टवाक्येषु विचारमालिन्यरहितविश्वासः श्रद्धेत्युच्यते। अपि च ब्रह्मविद्यार्थी पाण्डित्यं निर्व्विद्य बालकवत् सारल्येण मौनिवदप्रगल्भत्वेन मननशीलत्वेन च तिष्ठेत्। तदेव उक्तं बृहदारण्यकश्रुतौ, "तस्माद् ब्राह्मणः पाण्डित्यं निर्व्विद्य ... ... ..."[23] इत्यादिना। भगवान् ब्रह्मसूत्रकारस्त्वत्र किञ्चिद्विशेषं दर्शयति, "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्"[24] इति सूत्रेण। अस्यार्थः, विद्यार्थी बाल्यपाण्डित्ययोरपेक्षया तृतीयं मौनं साधनमाश्रयेत्। अतो मौनं मननशीलत्वं ब्रह्मविद्योदये सहकार्यन्तरविधिरित्यभिप्रायः। यद्यपि 'तिष्ठासेत्' इति विधिलिङ्प्रयोगेण यथा बाल्य-पाण्डित्ययोः विधायकत्वं सुस्पष्टतया प्रतीयते तथा तु न मौनस्य, अपि च मौनं ज्ञानं तद्धि 'पाण्डित्यं निर्विद्ये'-त्यादिना गतार्थमेव, किन्तु मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धे पाण्डित्यात् तृतीयं मौनम् अर्थान्तरं विधीयते इति सिद्धान्तः।[25]

ज्ञानेन विना मोक्षलाभाय अन्यः पन्था नास्तीति सामान्येन सर्वे आमनन्ति। श्रुतावप्युक्तम्, "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[26] इत्यादि। एतदत्रावधेयं यत् श्रवण-मनन-निदिध्यासनेषु निदिध्यासनस्य एव मोक्षसाधनत्वेनाङ्गित्वं विवक्षितम्, श्रवण-मनने तु तदङ्गे एवेति। उक्तञ्च आचार्यमाधवमुकुन्देन, "दर्शनमुद्दिश्य

---

21. अध्यास(परपक्षः)गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 831)
22. बृहदारण्यकोपनिषत् (4।4)
23. बृहदारण्यकोपनिषत् (3।5)
24. ब्रह्मसूत्रम् (3।4।46)
25. "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यञ्च निर्व्विद्याथ मुनुरि'त्यत्रमननशीले मौनपदप्रवृत्तिसम्भवेऽपि पक्षेण प्रकृतमननशीले प्रयोगदर्शनात्पा ण्डित्यबाल्ययोरपेक्षया तृतीयं सहकार्यनन्तरं मौनं विधीयते, यज्ञादिवत् शमादिवच्चेति" - ब्रह्मसूत्रम्, वेदान्तपारिजातसौरभ-भाष्यम् (3।4।46)
26. बृहदारण्यकोपनिषत् (4।5।6)

तदन्तरङ्गसाधनं ध्यानमात्रं विधेयं, श्रवणमननयोर्ध्याने विनियोगः तादर्थत्वात्"[27] इति। तव्यप्रत्यययोगात् विध्यर्थः प्रतीयते, इत्यतः श्रवणादौ विधित्वं विवक्षितम्। तत्र अभिधानाभिधेयभेदात् विधिः द्विविधः। तत्रापि अभिधानविधिः चतुर्विधः, उत्पत्ति-विनियोगाधिकारिः प्रयोगश्चेति। अभिधेयविधिस्तु पुनस्त्रिविधः, अपूर्वनियमपरिसंख्येति भेदात्। तत्र यो विधिः प्रमाणान्तरेण न प्राप्यते सोऽपूर्वविधिः।[28] तद्यथा "स्वर्गकामो दर्शपूर्णमासाभ्यां यजेत', 'चित्रया यजेत पशुकामः"[29] इति। मोक्षसाधनत्वेन निदिध्या-सनस्य यद्विधित्वं विवक्षितं तत्राप्यपूर्वविधिरेव इष्टः,[30] "ततस्तु तं पश्यते निष्कलं ध्यायमानः"[31] इति श्रुतेः। अतो निदिध्यासनस्याङ्गित्वमविसंवादितं स्यात्। श्रवणमननयोर्यथा भिन्नफलकत्वं श्रुतौ नोक्तमतस्तयो ध्यानाङ्गत्वमेव इष्टम्।[32] ननु पुराणादिष्वपि ध्यानमार्ग-स्योल्लेखदर्शनात् कथमत्रापूर्वतासिद्धिरिति चेत्, उच्यते, तादृक्पुराणवाक्यानां तु न भिन्नं प्रामाण्यम्, अपि तु वेदान्तवाक्यानां व्याख्यानरूपत्वेनैव तेषामपि प्रामाण्यान्नानुपपत्तिः।

वेदान्तश्रवणस्य प्रमाणत्वेन विचाररूपत्वेन च ब्रह्मज्ञानं प्रति साधनतया विहितत्वात् श्रवणस्य प्राधान्यं स्वीकार्यम्। श्रवणसन्निधौ विहितानि स्वरूपोपकारकानि मनन-निदिध्यासनादीनि तु तस्यैव अङ्गानि, यतः तेषां ज्ञानातिरिक्तं फलान्तरं न श्रुयते। अतः तानि फलं विनैव श्रवणसन्निधौ विहितत्वात् फलोपकार्यङ्गानि एवेति अद्वैतवादिभिः मन्यते। सिद्धान्ते तु द्वैताद्वैतवादिभिः तन्निराकृतम्, प्रामादिकत्वात्, "साक्षात् फलसाधनत्वेन श्रुयमाणस्याङ्गिलक्षणस्याव्यपनात् तत्फलश्रावकवाक्याभावात्"[33] च।

ननु 'दशमस्तमसि'[34] इत्यादिवाक्यजन्यज्ञानस्यापरोक्षानुभवजनकत्वे सिद्धे 'तत्त्वमस्या'दिमहावाक्यजन्यज्ञानस्यापि ब्रह्मापरोक्षानुभूतिजनकत्वं कथं न स्यादिति चेत्, उच्यते, तस्यापि परोक्षतुल्यत्वात्। न हि 'दशमस्तमसि' इति वाक्यजन्यज्ञानम-

---

27. अधास(परपक्षः) गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 819)
28. "विधिरतन्तमप्राप्तौ" - तन्त्रवार्त्तिक (1।2।4)
29. तैत्तिरीयसंहिता (2।1।2)
30. "तत्र निदिध्यासितव्य इति ह्यपूर्वविधिरेव, ध्यानस्य वेदान्तमृते मानान्तरेणाप्राप्तत्वात्" -अधास (परपक्षः) गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 819)
31. मुण्डकोपनिषत् (3।1।3)
32. "ध्यनमङ्गमिति यन्मतान्तरं तन्नयुक्तमत एव माधव।
यद्यपि श्रवणतोऽपवर्गदोऽङ्गं तथापि सुवचं शुभं यतः"।।
-सविशेषनिर्विशेषश्रीकृष्णस्तवराजः 24
33. अधास (परपक्षः) गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 821)
34. पञ्चदशी 7।58

परोक्षानुभवजनकम्, "तत्रापि युष्मदर्थस्य प्रत्यक्षावाप्तत्वात् तमनूद्य तत्र दशमत्व-विधानात्। तथा च - धर्म्यंशे अपारोक्ष्येऽपि विधेयदशमत्वांशे परोक्षत्वात्"[35] इति। परोक्षज्ञानस्य भ्रमनिवृत्तिसाधकत्वं नास्तीति तु न वक्तव्यम्, किन्तु भ्रमनिवृत्तिमात्रस्य एव अपरोक्षानुभवत्वं न स्वीकार्यम्। अन्यथा, प्रत्यक्षानुमितेरपि भ्रमनिवर्तकत्वाद् अपरोक्षानुभवत्वं दुर्वारं स्यात्। ननु 'द्रष्टव्यः श्रोतव्य...' इति श्रुतौ दर्शनरूप-फलाव्यवधानपाठरूपसन्निधानात् श्रवणस्य एव अङ्गित्वं कथं न स्यादिति चेत्, उच्यते, सन्निधानमात्रं हि न अङ्गित्वे नियामकं स्यात्, अपि तु फलसाधनसामर्थ्यमेव। अतो ब्रह्मापरोक्षानुभवजनन-सामर्थ्याभावात् न श्रवणस्य अङ्गित्वं विवक्षितम्। पुनरपि, यदि श्रवणमात्रेणैव ब्रह्मापरोक्षानुभवसिद्धिः, कथं तर्हि मनन-निदिध्यासने विधीयेते? अपि च श्रवणादृते न मननं, न हि मननादृते निदिध्यासनं सम्भवति। तथा सति, कथं श्रवणे मनन-निदिध्यासनादीनामुपकारकत्वं, तच्चिन्त्यम्। अतः पञ्चदशी-चित्सुखी-अद्वैतसिद्ध्यादि-ग्रन्थेषु प्रतिपादिते शाब्दापरोक्षवादे दोषमाविष्कुर्वन्ति विपश्चितः। नैयायिकप्रवरेण उदयनाचार्येण न्यायपरिशुद्धौ शाब्दापरोक्षवादः सर्वथा निराकृतः। आचार्यमाधव-मुकुन्देनापि तन्निराकरन् "श्रौतस्याङ्गीलक्षणस्य निदिध्यासने समन्वयात् तस्याङ्गित्वम्। अङ्गलक्षणस्य च श्रवणादौ व्यापनात् तस्याङ्गत्वमिति राद्धान्तः"[36] इत्युक्तम्।

पुनः श्रवण-मनन-निदिध्यासनाद्विलक्षणस्य मन्त्रजपस्योपयोगिता द्वैताद्वैतदर्शने विशेषरूपेणोल्लिख्यते। ये खलु शास्त्रज्ञानविरहिताः तेषां कृते केवलं मन्त्रजपस्य विधानमुक्तमाचार्यैः। मन्त्रजपेनापि ब्रह्मसाक्षात्कारः सम्भवतीति प्रतिपादयन् श्रीमन्निम्बा-र्काचार्येण उक्तम्, "जपेनैव तु संसिद्धेद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति - तेषामपि जपादीनांविद्यानुग्रहः स्मर्यते"[37] इति। जपादिना अन्तः-करणे शुद्धे विद्योदयो भवति यथा संवर्त्तादिऋषीणामभवदिति महाभारतादिषु श्रुयते।

भक्तिमार्गं व्याचिख्यासुना श्रीमन्निम्बार्काचार्येण "कृपाऽस्य दैन्यादियुजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा भक्तिः... ..."[38] इत्यादिना भक्तेः स्वरूपमुद्घाटितं वेदान्तकामधेनुग्रन्थे। भक्तेः माहात्म्यं तु स्मृतिषु विशेषतया उल्लिखितं दृश्यते। नारदीये भक्तिसूत्रे उक्तम्, "सा त्वस्मिन् परमप्रेमस्वरूपा"[39] इति। उक्तञ्च

35. अधास (परपक्षः) गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 824)
36. तदेव (पृष्ठम् - 828)
37. ब्रह्मसूत्रम्, वेदान्तपारिजातसौरभ-भाष्यम् (3।4।37)
38. वेदान्तकामधेनु 9
39. नारदीयभक्तिसूत्रम् (1।5)

श्रीमद्भगवद्गीतासु, "पुरुषः सः परः पार्थ भक्त्या लभ्यस्त्वनन्यया", "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप", "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्"[40] इत्यादि। अतो भक्तियोगानुसारतोऽनन्याभक्तिरेव मोक्षसाधिका इति। वस्तुतस्तु यदा साधकेन एतज्ज्ञायते यत्, भगवान् वासुदेव एव समुदयस्य जगत आश्रयः, स एव नियन्ता, अस्य प्रपञ्चस्य निमित्तोपादानकारणम्, स एव पिता-माता-धाता-भर्ता-प्रभु-सुहृद् इति, तदा तस्मिन् भगवति प्रेमविशेषलक्षणा भक्तिः स्वत एव उपजायते। अतो गुरूपदेशश्रवणात् तस्य मननात् आदौ भगवति अनुरागो जायते, ततः प्रपञ्चातीतरूपेण सर्वज्ञ-सर्वशक्तिमान्-सर्वाश्रयरूपेण च भगवतः स्वरूपानुभवो जायते। उक्तञ्च भगवता ब्रह्मसूत्रकारेण, "जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्"[41] इति। अस्यार्थः, श्रुतिषु ब्रह्मोपासनायाः त्रैविध्यमुक्तमस्ति, अतः कौषितकी-उपनिषदि इन्द्रप्रतर्दनसंवादे जीवधर्मस्य मुख्य-प्राणलिङ्गस्य च प्रदर्शनात् तत्र ब्रह्मोपासना न उपदिष्टा इति तु न बोध्यव्या। अस्य सूत्रस्य भाष्ये भगवता श्रीमन्निम्बार्काचार्येण उक्तम्, "न वाचं विजिज्ञासितवक्तारं विद्यात्', 'त्रिशीर्षाणं त्वष्ट्रमहन्नि' इत्यादि जीवलिङ्गात्, 'प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती'ति मुख्यप्राणलिङ्गाच्च नात्र ब्रह्मपरिग्रह इति चेन्न, उपासकतारतम्येन ब्रह्मोपासनायास्त्रैविध्याज्जीववर्गान्तर्यामित्वेन प्राणाद्यचेतनान्तर्यमि-त्वेन तदुभयविलक्षणेन चान्यत्राश्रितत्वादिहापि तदयोगात्", इति। अतएव ब्रह्म एवात्र इन्द्रशब्दस्य प्राणशब्दस्य च वाच्यम्। अस्मिन्सन्दर्भे आचार्यरामानुजपादैरपि साहमत्यं प्रदर्श्यते। आचार्यशङ्करपादैः आदावत्र किञ्चिद्भिन्नमतं समुल्लिख्य अन्ते तु द्वैताद्वैत-सिद्धान्तमेव अङ्गीकृतम्।[42] अन्यत्रापि श्रुतिषु ब्रह्मोपासनायाः त्रैविध्यं यथा उपन्यस्तं तत्तु आचार्यश्रीनिवासपादैः सूक्तम्, "सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्मे'ति स्वरूपेण उपास्यत्वम् 'तत्सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तञ्च निलयञ्चा-निलयञ्च विज्ञानञ्चाविज्ञानं चे'त्यादिषु चिदचिदन्तरात्मतया सर्वात्मतया च तस्योपास्यत्वम्"[43] इत्यादिना।

निम्बार्कमते पराऽपरा इति भेदाद् भक्तिः द्विविधा। तत्रापि पराभक्तिः फलरूपा,

---

40. श्रीमद्भगवद्गीता (8।22; 11।54; 18।55)
41. ब्रह्मसूत्रम् ख (1।1।32)
42. "न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं विरुध्यते। कथम्? उपासात्रैविध्यात्; त्रिविधमिह ब्रह्मण उपासनं विवक्षितम् - प्राणधर्म्मेण, प्रज्ञाधर्म्मेण, स्वधर्म्मेण च। ..... ...... ........ ..... तस्माद् ब्रह्मवाक्यमेतदिति सिद्धम्"। -ब्रह्मसूत्रम्, शाङ्करभाष्यम् (1।1।32)
43. ब्रह्मसूत्रम् , वेदान्तकौस्तुभ-भाष्यम् (1।1।32)

अपरा तु साधनरूपा एवेति।[44] तत्र साधनरूपाऽपराभक्तिः तु सर्वेषु साधारण्ये एव परिलक्ष्यते। श्रीभगवतो गुणमाहात्म्यादिश्रवणं कीर्त्तनं स्मरणं वन्दनं अर्चादिविग्रहानां पूजनं साधनरूपा भक्तिः। तया भगवति अनुराग-श्रद्धादय उपजायन्ते। श्रीमद्भागवत-महापुराणे नवधाभक्तेः स्वरूपम् उल्लिख्यते।[45] तत्र अन्तिमा पराभक्तिरूपिका आत्मनिवे-दनम् इति, शिष्टाः सर्वा अपराः। किन्तु पराभक्तेरुन्मेषे अपराभक्तेरुपयोगो भवत्येव। यत्र साधनरूपाऽपराभक्तिं विनैव भगवति अहैतुकीभक्तिः आत्मसमर्पणं च दृश्यते, तत्रापि जन्मान्तरीयसाधनानामुपकार्यत्वं बोध्यम्। अतः द्वैताद्वैतदर्शने यथा पराभक्तेः तथा हि अपराभक्तेः अपि उपयोगः प्रदर्श्यते।

अर्चाविग्रहाणां पूजनं साधनानामन्यतमम्। तत्रापि श्रीराधाकृष्णयुगलविग्रहस्य पूजनं निम्बार्क-आचार्यैः एव प्राथम्येन आरब्धमिति प्रसिद्धिरस्ति। उपासनाविधौ विग्रह-पूजनस्य चत्त्वारो भेदाः, तद्यथा वैदिकि-तान्त्रिकि-पौराणिकि-रागात्मिका इति। श्रुत्युक्ता मधुविद्या-शाण्डिल्यविद्या-भूमाविद्यादि साधनत्वेन श्रीनिम्बार्कसम्प्रदाये यथा प्रचलिता, तथा हि वैदिकविधिना शालग्रामशिलादिपूजनमप्यत्र प्रचलितमस्ति। तान्त्रिकपद्धत्या त्रिकोण-चतुष्कोण-चक्र-पद्मादियन्त्रेषु गोपालमन्त्राङ्कनम्, याग-यज्ञ-हवनाद्यपि साधना-रूपेणानुमन्यते। गोपालतापनी-उपनिषदि गौतमीयतन्त्रे सम्मोहन-तन्त्रादिवैष्णवतन्त्रग्रन्थेषु विधृता तान्त्रिकपूजनविधिः अपि निम्बार्कशास्त्रकारैस्तत्र तत्र उल्लिखितः। श्रीमत्केशव-काश्मीरीभट्टविरचिता क्रमदीपिका अस्य सम्प्रदायस्य विशिष्टः तन्त्रग्रन्थः। पौराणिकपूजनविधिः योऽस्मिन् सम्प्रदाये प्रचलितः स च नारदपञ्चरात्रे नारदपुराणे गरुडपुराणादिग्रन्थेषु विस्तरेणालोचितः। एतेषु सर्वेषु साधनेषु मन्त्र-नैवेद्य-उपचाराणां महत्युपयोगेऽपि 'भक्ते' एव प्राधान्यं ज्ञेयम्। उपचारवर्जिता भावप्रधाना या भक्तिः सा तु अनुरागात्मिका इति। तत्र भगवतो भजन-पूजनं शान्त-दास्य-सख्य-वात्सल्य-कान्तादि-भावमाश्रित्य प्रयुज्यते। साधकस्य चित्तवृत्ति-माश्रित्य अनुकूलभावोऽत्र अवलम्बनीयः। तत्रापि दास्यभावमेव उत्कृष्टं मन्ये यतस्तेनात्मसमर्पणं स्वत एव उपपद्यते।

किन्तु उपासनामात्रस्य न मोक्षफलकत्वम्। किञ्च सकामोपासनानां तु फलभेदो दृश्यते। ननु निष्कामोपासकस्य किं भूमाविद्या-शाण्डिल्यविद्याद्युपासनानां विकल्प एव अनुष्ठेय, उत समुच्चय इति चेत्, उच्यते, न समुच्चय, विकल्प एव, "सर्वत्रोपास्यस्य परब्रह्मणः तद्भावापत्तिलक्षणस्य च एकैकया हि सिद्धेः सुकरत्वात्

---

44. "कृपाऽस्य दैन्यादियुजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा। भक्तिर्ह्यनन्याधिपतेर्महात्मनः सा चोत्तमा साधनरूपिकाऽपरा" - वेदन्तकामधेनुः 9

45. श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।। - श्रीमद्भागवतम् (7।5।23)

'विकल्पोऽविशिष्ट-फलत्वात्' इति सूत्रात्"[46] इति। उक्तञ्च भगवता भाष्यकारेण श्रीमन्निम्बार्काचार्येण, "विद्याभेद उक्तस्तत्रानुष्ठानविकल्पोऽविशिष्टफलत्वात्"[47] इति। अस्यार्थः, यत एकमेव ब्रह्म सर्वेषां प्रतीकादीनां विद्यानां च लक्ष्यम्, अतः सर्वेषां तेषामेकत्रानुष्ठां न आवश्यकम्।

पराभक्तिस्तु शरणागतिरूपिका। शरणागतेः माहात्म्यं निरूपयन् एवमुवाच श्रीमन्निम्बार्काचार्यः, "नान्यगतिः कृष्णपादारविन्दात् संदृश्यन्ते ब्रह्माशिवादिवन्दितात्। भक्तेच्छयापात्तसुचिन्त्यविग्रहाद् अचिन्त्यशक्तेरविचिन्त्यसाशयात्"[48] इति। श्रुतावपि शरणागतेः मोक्षसाधनत्वमुक्तम्, "यो ब्रह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये"[49] इत्यादिना। उक्तञ्च पुनः पुनः गीतास्वपि, "तमेव शरणं गच्छ सर्वभावेन भारत"[50], "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज"[51] इति। वस्तुतस्तु साधकाः कर्मयोगेन ज्ञानयोगेन भक्तियोगेन च यद्यपि बहुधा यतन्ते, किन्तु अन्तिमे भगवच्छरणागतिरेव मोक्षसाधनं भवति। अतः शरणागतिरेव भक्तियोगे अङ्गी, श्रवण-कीर्त्तन-वन्दनादयस्तु तदङ्गानि। तत्रापि शरणागतिः षड्विधा, आत्मनिक्षेपः, भगवदनुकूलसंकल्पग्रहणं, तत्प्रतिकूलसंकल्पवर्जनं, भगवानेव रक्षेदिति प्रत्ययः, गोप्तृवरणं, कृपणत्वं चेति भेदात्।[52] तत्रापि आत्मनिक्षेप एव अङ्गी शिष्टास्तु तदङ्गानि।

ननु ज्ञान-कर्म-भक्त्यादिष्वसमर्थस्य किमस्ति मोक्षोपायो न वा? नूनमस्त्येव। तादृशस्य तु गुर्व्वाज्ञानुवृत्तिरेव पन्थाः। ये खलु संसारासक्तजना निष्कामकर्मसु असमर्थाः, श्रवण-मनन-निदिध्यासनादिष्वप्यसमर्थत्वात् सर्वथा शास्त्रज्ञानहीनाः, अपि च श्रीभगवति अचालाभक्तिरपि येषां न उपपद्यते, ते खलु सद्गुरौ आत्मसमर्पणं कृत्वा विचारमालिन्यरहिततया तस्यादेशमनुसरन् तस्य निर्देशं प्रतिपालयन् मोक्षपदमाप्तुं शक्नुयुः। उक्तञ्च वेदान्तरत्नमञ्जुषायां, "अयोक्तेषु कर्मज्ञानादिषु साधनेषु असमर्थस्य यथा भगवदुपपत्तिरुक्ता तथोपपत्तेरङ्गानामनुष्ठानमत्यन्तदुष्करं ज्ञात्वा तत्राप्यसमर्थस्य

---

46. अधास (परपक्षः) गिरिवज्रम्, कलिकाता-संस्करणम् (पृष्ठम् - 847)
47. ब्रह्मसूत्रम्, वेदान्तपारिजातसौरभ-भाष्यम् (3।3।57)
48. वेदान्तकामधेनु 8
49. श्वेताश्वतरोपनिषत् (6।18)
50. श्रीमद्भगवद्गीता (18।66)
51. श्रीमद्भगवद्गीता (18।62)
52. "आत्मनिक्षेपणं चात्र सर्वाङ्गैः सह प्रोच्यते
    आनुकूल्यमस्य संकल्पः प्रतिकूलस्य वर्जनम्।
    रक्षिष्यतीति विश्वासो गोप्तृवरणं तथा पञ्चमं कृपणत्वं च पञ्चरात्रविदो विदुः"।। --
    प्रपन्नकल्पवल्ली (10।11)

श्रीगुर्व्वाज्ञानुवृत्तिर्विधीयते। ... ... ... गुर्वाज्ञानुवृत्तिं नाम देववच्छ्रीगुरोः शुश्रूषापरो भूत्वा तदाज्ञानुसारित्वम्।[53] अतः स एव गुर्व्वाज्ञानुवृत्तियोगो मोक्षस्य स्वतन्त्रसाधनम् इति। उक्तञ्च भगवता श्रीमन्निम्बार्काचार्येण प्रपन्नकल्पवल्ल्याम्, "एवं गुरोः प्रेष्ठतमो ह्यात्मन्यासी दृढव्रतः। सर्वबन्धविनिर्मुक्तः सायुज्यमधिगच्छति"।[54] सद्गुरोः अन्तरङ्गतमः शिष्यः तत्प्रसादादेव भगवत्प्रसादमाप्नोति, तदर्थं तस्य उपायान्तरस्यावश्यकता नास्ति, इति शिवम्।

**सहायक-ग्रन्थसूचीः** -

1. आचार्यमाधवमुकुन्द। विक्रम सं. 1993। अध्यासगिरिवज्रम् (वज्रोत्तेजिकायुतम्)। सम्पादक - श्रीअमोलकरामजी शास्त्री। निम्बार्कमहासभा। वृन्दावन।
2. पं. भगीरथ झा मैथिल। वि.सं. 2065। द्वैताद्वैतविवेकः। अ.भा. श्रीनिम्बार्काचार्यपीठ। सालेमावाद, आज्मेर।
3. श्री अमोलकराम शास्त्री (सम्पादक)। बृहदारण्यश्वेताश्वेतरोपनिषदौ (उपनिषत् प्रकाशिकाटीकासहितः)। प्रकाशक - श्री 108 निम्बार्क महासभा। वृन्दावन।
4. ड. रमा चौधुरी। 1941। डक्ट्रिन् अफ् निम्बार्क एन्ड् हिज् फलोवार्स। रयाल् एसियाटिक् सोसाय्टि। कलिकाता।
5. श्रीमन्निम्बार्काचार्यः। 2008। मन्तत्ररहस्यषोडशी। (श्रीमत्सुन्दरभट्टजीकृता मन्त्रार्थरहस्यटीका सहिता)। सुखचर काठीयावावार आश्रम। सुखचर।
6. श्रीमन्निम्बार्काचार्य।1990। वेदान्तकामधेनुः (दशश्लोकी)। अनुवाद - श्रीश्री 108 स्वामी धनञ्जयदासजी। कलिकाता।
7. श्रीकेशवकाश्मीरिभट्टः। वेदान्तकौस्तुभप्रभा। अनु - श्रीवैद्यनाथ झा। वृन्दावन। वि. सं. 2063।

✦✦✦

---

53. वेदान्तरत्नमञ्जूषा 8
54. प्रपन्नकल्पवल्ली 27

 ISSN : 0975-1769

# समासभेदविवेकः

- डॉ. प्रसेनजित्-नियोगी

**शोधसारः**

संस्कृतव्याकरणे मुख्यविषयेषु अन्यतमत्वं भजमानस्य समासस्य भेदविषये प्राचीनवैयाकरणेषु नवीनवैयाकरणेषु नैयायिकादिषु च मतानैक्यं वर्तते। केचन समासस्य द्वैविध्यं, केचन त्रैविध्यं, केचन चातुर्विध्यं, केचन पञ्चविधत्वं, केचन षाड्विध्यं, केचन सप्तविधत्वमेवं च केचन अवान्तरभेदान् आश्रित्य समासस्य अष्टाविंशतिप्रकारत्वमङ्गीकुर्वन्ति। तत्र प्राचीननवीनवैयाकरणानां नैय्यायिकादीनाञ्च समासभेदविषयकनिखिलसिद्धान्ताः वैशद्येन निरपेक्षदृष्ट्या लघुशोधप्रबन्धेऽस्मिन् मया प्रस्तोष्यते। वस्तुतोऽनेन शोधबन्धेन समासभेदविषये विशदं जिज्ञासूनां जिज्ञासा प्रशमिता भविष्यतीति मुख्योद्देश्यम्।

**कूटशब्दाः**- अव्ययीभावादिक्रमः, अव्याप्त्यादिदोषाः, नैयायिकमतं, पदप्राधान्यतः, वैयाकरणमतं, समासभेदः।

**आमुखम्**- महिममयी भाषेयं संस्कृतभाषा। अत्र भाषायाम् ऋषीणां मनीषिणां च मननं निहितं वर्तते। सर्व एव विषयाः संस्कृतालोकेनालोकिताः संस्कृते एव निहिता वर्तन्ते। तन्निगदितं जयन्तभट्टेन-

**"कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।**
**वचोविन्यासवैचित्र्यमात्रमत्र विशिष्यते॥"** इति।

परन्तु यद्यद् उक्तं तन्मध्यात् परिवेशनवैचित्र्येण नूतनतया केचन विषया आलोचयितुं शक्यन्ते।

"प्रधानं च षट्स्वङ्गेषु व्याकरणम्"- षडङ्गेषु प्रधानभूते व्याकरणे संज्ञा-परिभाषासन्धिकारकसमासधात्वर्थादिविषयेषु अन्यतमत्वं भजते समासः। "समसनं समासः, संक्षेप इति यावत्" इति। एकाधिकानां समर्थानां पदानामेव समासो विधीयते। तत्र समासविषये पाणिनीय-मुग्धबोध-कातन्त्र-सारस्वत-हरिनामामृत-

---

* सहकार्य्यध्यापकः, संस्कृतविभागः, अघोरकामिनीप्रकाशचन्द्रमहाविद्यालयः, वेङ्गाइ, हुगली, पश्चिमवङ्गः।

सरस्वतीकण्ठाभरणादिव्याकरणेषु तथा नानाटीकाग्रन्थेषु सम्यगालोचनं विहितम्। न केवलं वैयाकरणैः, नैयायिकैरपि समासो बहुचर्चितः। परन्तु तन्मध्ये समासभेदविषये मिथो वैयाकरणानां मध्ये, वैयाकरण-नैयायिकयोर्मध्ये वा ये मतभेदाः तेषां समाकलनेन पारस्परिकतुलनया च युक्तिग्राह्यत्वविचारणमाश्रित्य शोधप्रबन्धोऽयं निर्मितः। 'समासभेद-विवेक'- नामधेये शोधबन्धे सर्वे एते विषया मयालोचिताः।

**शोधपद्धतिः**- वस्तुतः समासभेदसम्बन्धि सर्वं किञ्चित् विविधव्याकरणग्रन्थेषु उक्तमेव। परन्तु मया यादृश्या रीत्या सर्वमेतद् आलोचिताः तादृशी आलोचना एकत्र मदीयानुसृतपद्धत्या कुत्रापि ग्रन्थे न परिदृश्यते। तथाहि प्रागुक्तवैयाकरणनैयायिकादि-मतसमाकलनं तत्तन्मतानां तुलनात्मकविचारः तथा तत्पर्यालोचनफलीभूतनवनीतसदृश-सिद्धान्तप्रकाशः इत्येतत् त्रयं मम शोधप्रबन्धस्य वैशिष्ट्यम्। एतेन समासभेदविषये विशदं जिज्ञासूनां जिज्ञासैव केवलं प्रशमिता न भविष्यति, परं तद्विषये नूतन-तरगवेषणद्वारम् उन्मोचयन् मम शोधप्रबन्धः समासभेदविषये शोधकार्यं चिकीर्षूणां भाविगवेषकाणामपि अवलम्बनं भविष्यति।

**समासस्य द्वैविध्यम्**- केषाञ्चिन्नये विभक्त्या लुगलुग्भेदेन समासो द्विविधः। यथा दिशयोर्मध्ये अपदिशम् (अव्ययीभावः), कृष्णं श्रितः कृष्णश्रितः (तत्पुरुषः), वीणा पाणौ यस्याः सा वीणापाणिः (बहुव्रीहिः), हरिश्च हरश्च हरिहरौ (द्वन्द्वः) इत्यत्र पूर्वपदविभक्तिः लुप्ता अतो लुक्समासः। यत्र तु पूर्वपदविभक्तिर्न लुप्यते सः अलुक्समासः। यथा पुंसानुजः, मनसादेवी (तृतीयातत्पुरुषसमासः), आत्मनेपदम्, परस्मैपदम् (चतुर्थीतत्पुरुष-समासः), स्तोकान्मुक्तः (पञ्चमीतत्पुरुषसमासः), शुनःशेपः, वाचोयुक्तिः (षष्ठीतत्पुरुषसमासः), सरसिजम्, अरण्येतिलकः (सप्तमीतत्पुरुषसमासः), कण्ठेकालः, अप्सुयोनिः (बहुव्रीहिः), पारेसमुद्रम्, मध्येमार्गम् (अव्ययीभावः) हरिरिव, जीमूतस्येव (सहसुपा) इति।

नित्यानित्यभेदेन पुनः समासस्य द्वैविध्यं परिलक्ष्यते। नित्यानित्यसमासलक्षण-विषये शब्दशक्तिप्रकाशिकायामुल्लिखितम्-

"यदुक्तं जयादित्येन,

**विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु।**
**स्वार्थस्याबोधबोधाभ्यां नित्यानित्यसमासकौ।।"[1] इति।**

आचार्यभट्टोजिदीक्षितेनापि निगदितम्- "अविग्रहोऽस्वपदविग्रहो वा नित्यसमासः" इति। विशेषेण गृह्यते ज्ञायते वृत्त्यर्थोऽनेनेति विग्रहः। नित्यश्चासौ समासश्चेति नित्यसमासः। यस्य विग्रहवाक्यं नास्ति सः अविग्रहनित्यसमासः। अर्थात् यैः सुबन्तपदैः समासो निर्मीयते, विग्रहवाक्ये तत्तत्पदात् अर्थबोधकविभक्तियोगेनापि

1. शब्दशक्तिप्रकाशिका, समासप्रकरणम्, पृष्ठाङ्कः- 196

समस्तपदार्थो न स्फुटो भवति चेत् सः अविग्रहनित्यसमासः। यथा कृष्णसर्पः इति। अत्र 'कृष्णश्चासौ सर्पश्चेति' विग्रहे कृष्णवर्णविशिष्टसर्पस्यैवावबोधः स्यात्, किन्तु कृष्णसर्पपदेन सर्पविशेष एव ज्ञायते। तदुक्तम् कृष्णसर्पशब्दस्य अर्थनिरूपणवेलायाम्– "भेषजवैद्याद्यनिवार्यः सर्पविशेषः" इति। एवं यस्य समासस्य स्वघटकपदैः विग्रहवाक्यं नास्ति सः अस्वपदविग्रहो नित्यसमासः। यथा अन्यो देशः– देशान्तरम्, ब्राह्मणाय इदम्– ब्राह्मणार्थम् इति।

यत्र विग्रहवाक्येन एव अर्थावबोधो भवति तत्र अनित्यसमासो भवति। यथा राज्ञः पुरुषः– राजपुरुषः इति। अत्र राजन्–शब्दादुत्तरं षष्ठीविभक्तिप्रयोगात्पुरुषशब्देन तस्य सम्बन्धो भवति– राजस्वामिकः पुरुषः इति। राज्ञः पुरुषः इति वाक्येन यस्यार्थस्य बोधः राजपुरुषशब्देनापि तस्यैवार्थस्यावबोधः, अतः अनित्यसमासः।

**समासस्य त्रैविध्यम्**– केचिच्च "क्वचिन्नित्यः क्वचिद्विकल्पः क्वचिन्न स्यात्" इति समासस्य त्रैविध्यं ब्रुवन्ति। 'क्वचिन्नित्यः' अर्थात् यत्र समासयोग्यं विग्रहवाक्यं नास्ति। यथा कृष्णसर्पः, लोहितशालिः इति। 'क्वचिद्विकल्पः' नाम यत्र सर्वे समासा एव वैकल्पिकाः। यथा हरिश्च हरश्च जयति अथवा हरिहरौ जयत इति। 'क्वचिन्न'– कुत्रचित् सामर्थ्यविशिष्टपदानां समासो नेष्टः। यथा रामो जामदग्न्यः, व्यासः पाराशर्य्य इति। उक्तं चान्यत्र समासस्य त्रैविध्यं स्वीकुर्वता–

**"नित्योऽनित्यो विकल्पश्च समासस्य त्रिधा क्रमः"** इति।

शृङ्गारप्रकाशे भोजराजेन समासस्य त्रैविध्यं स्वीकृतम्– प्राकृतः, वैकृतः, शेषश्च।

**प्राकृतः**– तत्र समस्तपदानाम् अव्ययीभावादिसंज्ञानिमित्तं पूर्वपदप्रधानादिका प्रकृतिः। प्रकृतौ भवः प्राकृतः। अयञ्च समासः अव्ययीभाव–तत्पुरुष–बहुव्रीहि–द्वन्द्वभेदात् चतुर्धा। तत्र पूर्वपदार्थप्रधानोऽव्ययीभावोऽपि अव्ययानाम् (अधिहरि), अनव्ययानां (अग्रेवणम्), तथा कर्मप्रवचनीयानां (अनुगङ्गम्) इति त्रिधा विभज्यते। उत्तरपदार्थ–प्रधानस्तत्पुरुषो व्यधिकरण–समानाधिकरण–द्विगुभेदात् त्रिविधः। यथाक्रमेण उदाहरणानि यथा– राजपुरुषः, नीलोत्पलम्, पञ्चपूलीति। बहुव्रीहिश्च अन्यपदार्थप्रधानः। स हि त्रिप्रकारः– प्रधानसम्बन्ध्यर्थः, अपिरधानसम्बन्ध्यर्थः, कारकार्थश्च। प्रथमान्तार्थसम्बन्धो यस्य अन्यपदार्थः स प्रधानसम्बन्ध्यर्थो बहुव्रीहिः, यथा दक्षिणपूर्वा, दण्डादण्डि इत्यादि। यत्रान्यपदार्थः षष्ठ्यर्थसम्बन्धः सः अप्रधानसम्बन्ध्यर्थो बहुव्रीहिः, यथा पीताम्बरः इति। एवमन्यविभक्त्यर्थबहुव्रीहिः कारकार्थ इति, यथा प्राप्तोदकः, उपहृतपशुः इत्यादि। उभयपदार्थप्रधानो द्वन्द्वोऽपि त्रिविधः– इतरेतरविषयः, समाहारविषयः, उभयविषयश्चेति। इतरेतरविषयो यथा– धवखदिरौ इति, समाहारविषयः– पाणिपादम्, उभयविषयो यथा– अश्ववडवौ–अश्ववडवम् इति।

वैकृतः– प्रकृतेरन्यथात्वं हि विकृतिः, तत्र भवः वैकृतः। वैकृतसमासश्चतुर्विधः– प्राधान्यविपरीतः, सामर्थ्यविपरीतः, वाक्याधिकारार्थः, अर्थान्तरगामी चेति। तत्र प्राधान्यविपरीतस्त्रिविधः– पूर्वपदार्थप्राधान्यविपरीतः, उत्तरपदार्थप्राधान्यविपरीतः, अन्यपदार्थप्राधान्यविपरीतश्चेति। पूर्वपदार्थप्राधान्यविपरीतोऽव्ययीभावो यथा– शाकप्रति, उन्मत्तगङ्गम् इत्यादि। उत्तरपदार्थप्राधान्यविपरीतस्तत्पुरुषो यथा– राजदन्तः, पूर्वकायः इत्यादि। अन्यपदार्थप्राधान्यविपरीतो बहुव्रीहिर्यथा– द्वित्राः, पञ्चषाः इत्यादि। सामर्थ्यविपरीतवैकृतसमासोऽपि त्रिधा– पदसामर्थ्यहेतुकः (देवदत्तस्य गुरुकुलम्), वाक्यासामर्थ्यहेतुकः (द्विजेभ्योऽयं द्विजार्थः सूपः), वृत्त्यसामर्थ्यहेतुकश्चेति (असूर्यं पश्याः)। वाक्याधिकारार्थो हि विग्रहवाक्यादपि अधिकार्थबोधकः समासः। सोऽपि त्रिविधः– विशेषणार्थाधिक्यकृतः (अश्रेणयः श्रेणयः कृताः श्रेणीकृताः), विशेष्यार्था-धिक्यकृतः (गोयुक्तः रथः गोरथः), समुदायार्थाधिक्यकृतश्चेति (काकैः पेया नदी काकपेया)। अर्थान्तरगामिवैकृतसमासश्च त्रिविधः– पूर्वार्थत्यागी (शक्रगोपः), पूर्वार्थात्यागी (कृष्णसर्पः), त्यागात्यागी ( शतं पत्राणामस्याः पुष्पे पुष्पे शतपत्रिका) चेति।

**शेष**:– उक्तादन्यः शेषः। शेषसमासश्च चतुष्प्रकारकः– सूत्रशेषः (निष्कौशाम्बिः), असूत्रशेषः (पृषोदरः), ज्ञापकशेषः (कदुष्णम्), एकशेषश्च (पितरौ) इति।

समासस्य चातुर्विध्यम्– प्राचीनवैयाकरणानां नये पुनः समासश्चतुर्विधः– अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वश्चेति। किन्तु समासाधिकारे समासचतुष्टयं व्यतिरिच्यापि सहसुपासमासविधानात् विभागोऽयमव्याप्तिदोषदुष्टः। आचार्यभट्टोजिदीक्षिते-नापि निगदितम् सिद्धान्तकौमुद्याम्–"समासश्चतुर्विध इति प्रायोवादः। अव्ययीभावतत्पुरुष-बहुव्रीहिद्वन्द्वाधिकार- बहिर्भूतानामपि 'सहसुपा' इति विधानात्" इति। उक्तञ्चान्यत्र प्राचीनमतविषये–

**"समासस्तु चतुर्धेति प्रायोवादस्तथापरः।**
**योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च॥"**[2] इति।

केचन "पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः" इत्येवम्प्रकारेण पूर्वोक्ताव्याप्तिदोषं निवारयन्ति। किन्तु अयं मतवादोऽपि न निर्दोषः, सुप्प्रति, उन्मत्तगङ्गम्, द्वित्राः, दन्तोष्ठम् इत्यादौ व्यभिचारदर्शनात्। अतः 'प्रायेण' इति अध्याहार्यमिति तन्मतिः। समासचतुष्टयवादिभि-र्वैयाकरणैः कर्मधारयो द्विगुश्च न स्वीकृतः। तेषां नये तत्पुरुषविशेषः कर्मधारयः, तद्विशेषो द्विगुरिति।

---

2. वैयाकरणभूषणसारः, समासशक्तिनिर्णयः– 2

आशुबोधव्याकरणे अपि समासस्य चातुर्विध्यमङ्गीकृतम्। तथाहि अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः द्वन्द्वश्च। द्विगुसमासः कर्मधारयसमासश्च तत्पुरुषसमासस्य एव अवान्तरभेदद्वयमिति। अतो वृत्तावालिखितम्-

**"समासश्च चतुर्विधः अव्ययीभाव-तत्पुरुषबहुव्रीहिद्वन्द्वभेदात्। द्विगुकर्मधारयौ तु तत्पुरुषस्य एव अवान्तरभेदौ।"**[3] इति।

समासस्य पञ्चविधत्वम्- वाभटादिप्राचीनवैयाकरणमतमाश्रित्य आचार्यजगदीश-तर्कालङ्कारः पदप्राधान्यतया समासस्य पञ्चविधत्वं स्वीचकार। तदुक्तं तेन-

**"पूर्वमध्यान्त्यसर्वान्यपदप्राधान्यतः पुनः।**
**प्राच्यैः पञ्चविधः प्रोक्तः समासो वाभटादिभिः॥"**[4] इति।

पूर्वमध्यान्त्यसर्वान्यपदप्रधानतया समासः पञ्चधा। पूर्वपदप्रधानसमासो यथा- जायां प्राप्त इति प्राप्तजायः, कुम्भस्य समीपमिति उपकुम्भम्, पुरुषः सिंह इवेति पुरुषसिंह इति। मध्यपदप्रधानो यथा- पटस्य नाधिकरणमिति पटानधिकरणमिति। अन्त्यपदप्रधानसमासो यथा राज्ञः पुरुषः राजपुरुषः, नीलमुत्पलमिति नीलोत्पलम्। सर्वपदप्रधानो यथा हरिश्च हरश्च इति हरिहरौ। अन्यपदप्रधानो यथा पीतमम्बरं यस्य स पीताम्बरः, लोहिता गङ्गा यस्मिन्निति लोहितगङ्गम् इति। शब्दतत्त्वानुसारेण विभागोऽयमनवद्यः, किन्तु आधुनिकवैयाकरणसम्प्रदाये अस्य प्रचलनं नास्ति, वाभटीयग्रन्थश्च विलुप्तः।

समासस्य षाड्विध्यम्- केचिच्च कर्मधारयादिभेदेन समासस्य षाड्विध्यं स्वीकुर्वन्ति-

**"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।**
**पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः॥"** इति।

शब्दशक्तिप्रकाशिकायामपि उक्तम्- "स चायं षड्विधः कर्मधारयादिप्रभेदतः"[5] इति। वङ्गीयपुरुषोत्तमोऽपि समासस्य षाड्विध्यमङ्गीकृत्याह प्रयोगरत्नमालायाम्-

**"कर्मधारय आद्यः स्याद्द्विगुस्तत्पुरुषोऽपरः।**
**बहुव्रीहिरथ द्वन्द्वोऽव्ययीभावः षडीरिताः॥"** इति।

किन्तु कर्मधारयद्विगोस्तत्पुरुषे अन्तर्भावादयं पक्षोऽपि न निर्विवादः।

आचार्यभट्टोजिदीक्षितादिनव्यवैयाकरणाः "सह सुपा" इति पाणिनीयसूत्रस्य योगविभागद्वारा समासस्य षाड्विध्यमेव स्वीकुर्वन्ति। तदुच्यते-

---

3. आशुबोधव्याकरणम्, समासप्रकरणम्, पृष्ठाङ्कः- 300
4. शब्दशक्तिप्रकाशिका, समासप्रकरणम्- 33 पृष्ठाङ्कः- 194
5. शब्दशक्तिप्रकाशिका, समासप्रकरणम्- 32, पृष्ठाङ्कः- 192

**"सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा।**
**सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥"** इति।

सुपां सुपा- सुबन्तेन सुबन्तस्य समासः। यथा- राज्ञः पुरुषः- राजपुरुषः इति। अत्र विग्रहे समन्वयघटकमुभयमेव पदं सुबन्तम् इति।

सुपां तिङा- तिङन्तेन सह सुबन्तस्य समासः। यथा- पर्यभूषयत्, अनुव्यचलत् इति। अत्र 'परि' इति सुबन्तमव्ययम्, 'अभूषयत्' इति तिङन्तक्रिया।

सुपां नाम्ना- प्रातिपदिकेन नाम्ना वा सुबन्तस्य समासः। यथा- कुम्भकारः इति। अत्र "कर्मण्यण"(3/2/1) इति पाणिनीयसूत्रविहिताण्प्रत्ययान्ते कुम्भकारशब्दे "उपपदमतिङ्"(2/2/19) इति सूत्रेण उपपदसमासो विहितः। अतएव "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषानुसारेण 'कार' इति नाम्ना प्रातिपदिकेन वा सह षष्ठ्यन्तस्य 'कुम्भस्य' इति पदस्य समासात् परं 'कुम्भकार'-शब्दात् सुप्प्राप्तिः।

सुपां धातुना- धातुना सह सुबन्तस्य समासः। यथा- कटप्रूः इति। अत्र "क्विव्वचिप्रस्थायतस्तुतटप्रुजुश्रीनां दीर्घोऽसम्प्रसारणं च" इति वार्तिकेण 'प्रु गतौ' इति धातुना समासो निपातितः, न तु तिङन्तेनोपपदसमासः, क्विव्विधाविह सप्तमीनिर्देशाभावेन उपपदत्वाभावात्।

तिङां तिङा- तिङन्तेन सह तिङन्तस्य समासः। यथा- पिवतखादता, खादतमोदता इति।

तिङां सुबन्तेन- सुबन्तेन सह तिङन्तस्य समासः। यथा- कृन्तविचक्षणा इति।

पूर्वोक्तकारिकायां 'सुपां तिङा' इति तिङन्तोत्तरपदविषयकम्। अन्त्ये च 'तिङां सुबन्तेन' यः समासो निगदितः स तु सुबन्तोत्तरपदविषयकः। अन्यथा नियमद्वयस्यास्य भिन्नविषयताभावात् समासस्य षाड्विध्यं नोपपन्नं स्यात। तदुक्तं लघुशब्देन्दुशेखरे नागेशभट्टेन-

"अत्र सुपां तिङेत्यनेनैव तिङा सुबन्तेनेत्यस्य संग्रहात् पञ्चविधमेव युक्तमुभयत्रापि सुप्तिङ्घटितत्वस्याविशिष्टत्वादिति चिन्त्यम्। यद्वाद्येन सुबन्तपूर्वपदकस्य ग्रहणमन्त्येन तिङन्तपूर्वपदस्येति भेदः"[6] इति।

समासभेदविषये मुग्धबोधव्याकरणे सूत्रितम्-

**"भिन्नान्यैकार्थद्व्यादिसंख्याव्यादीनां चहयषगवाः"**[7] इति।

---

6. परमलघुमञ्जूषा, समासादिवृत्त्यर्थनिरूपणम्
7. मुग्धबोधव्याकरणम्, समासप्रकरणम्, पृष्ठाङ्कः- 3

अस्य सूत्रस्य वृत्तिर्हि- "भिन्नार्थानां दानां सश्चसंज्ञोऽन्यार्थानां दानां हसंज्ञम् एकार्थानां दानां यसंज्ञो द्व्यादिक्त्यन्तपूर्वदानां षसंज्ञः संख्यापूर्वदानां गसंज्ञो व्यपूर्वदानां वसंज्ञः स्यात्" इति।

तथाहि चहयषगवभेदात् समासः षड्विधः। तत्र 'चः' नाम द्वन्द्वसमासः। हो नाम बहुव्रीहिः। यो हि कर्मधारयसमासः। तत्पुरुषसमासः षपदेन ज्ञायते। गपदेन द्विगुसमासस्तथा वपदात् अव्ययीभावसमासो बोध्यव्यः।

तत्र भिन्नार्थानां पृथक् पृथगभिधेयानां पदानां समासः चसंज्ञको द्वन्द्वसमासः। अर्थात् भिन्नपदार्थप्रधानसमासो द्वन्द्वसमासः। किञ्चायं द्वन्द्वसमासः उभयपदार्थप्रधानोऽपि भवति। अत्र परपदस्यैव लिङ्गं भवति। यथा घटश्च फलञ्च इति विग्रहे घटफले, स्त्री च पुत्रौ चेति स्त्रीपुत्राः इति।

अन्यार्थानां समस्यमानपदादन्यार्थानां पदानां समासो हि हसंज्ञको बहुव्रीहिः। यथा 'पीताम्वरः' इति। अत्र 'पीत'शब्देन गौरवर्णः 'अम्वर'शब्देन च वस्त्रमुच्यते, समुदायेन तु पीताम्वरपरिधायी कृष्ण उच्यते। स च द्विविधः- तद्गुणसंविज्ञानोऽतद्-गुणसंविज्ञानश्च।

एकार्थानां विशेष्यविशेषणभावापन्नानां यः समासः स याभिधेयः कर्मधारयसमासः। यथा नीलोत्पलमिति।

द्वितीयादिविभक्त्यन्तपदपूर्वकानां पदानां समासः षनामकः तत्पुरुषसमासः। स च समास उत्तरपदार्थप्रधानः। यथा कृष्णं श्रितः इति विग्रहे कृष्णश्रितः इति।

संख्यावाचकपदपूर्वकानां पदानां तद्धितार्थे समाहारे उत्तरपदे च परे यः समासो विधीयते स गसंज्ञको द्विगुसमासः स्यात्। यथा- द्वैमातुरः, पञ्चगुः, त्रिसखं, पञ्चगवधनः इत्यादीन्युदाहरणानि। तद्धितार्थे उत्तरपदे च परे द्विगुसमास उभयपदार्थप्रधानः, समाहारे च परे द्विगुरुत्तरपदार्थप्रधानः।

कारकसामीप्याद्यर्थे अव्ययपूर्वकानां पदानां यः समासो विधीयते स वाभिधेयः अव्ययीभावसमासः। अयञ्च समासः पूर्वपदार्थप्रधानो भवति। यथा अधिकृष्णम् इत्यादि।

हरिनामामृतव्याकरणे ग्रन्थकारेण श्रीजीवगोस्वामिना आत्मानं संसारिणं मत्वा परमेश्वरं प्रति स्वदैन्यं निवेदयन् श्लोकेनैतेन समासानां नामान्यपि उल्लिखितानि। तदुक्तम्-

**"सबहुव्रीहि-द्विगुता-मात्रे लुब्धोऽस्मि सद्वन्द्वः।**
**तत्पुरुष-कर्मधारय भक्तेर्येनाव्ययीभावः॥"**[8] इति।

8. हरिनामामृतव्याकरणम्, समासप्रकरणम्, पृष्ठाङ्कः- 234

अत्र कारिकायां भगवदर्चनच्छलेन षट्संख्यकानां समासानां नामानि उल्लिखितानि ग्रन्थकारेण। तेन तन्त्रये समासः षड्विधः, तद्यथा- बहुव्रीहिः, द्विगुः, द्वन्द्वः, तत्पुरुषः, कर्मधारयः अव्ययीभावश्चेति।

समासस्य भेदविषये सारस्वतव्याकरणे "समासाश्चान्वये नाम्नाम्" इति सूत्रस्य वृत्तौ उल्लिखितम्-

"स च षड्विधः। अव्ययीभावस्तत्पुरुषो द्वन्द्वो बहुव्रीहिः कर्मधारयो द्विगुश्चेति। अव्ययस्य अव्ययेन वा भवनं सोऽव्ययीभावः।[1]। स एवाग्रिमः पुरुषः प्रधानं यस्यासौ तत्पुरुषः।2। द्वन्द्वायते उभयपदार्थौ येनासौ द्वन्द्वः।3। बहु समातिरिक्तं व्रीहिः प्रधानं यस्मिन्नसौ बहुव्रीहिः।4। कर्म भेदकं धारयतीति कर्मधारयः।5। द्वाभ्यां गच्छतीति द्विगुः।6।"[9] इति।

अतएव सारस्वतसम्प्रदायमते अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिकर्मधारयद्विगुभेदात् समासः षड्विधः। तत्र पूर्वपदार्थप्रधानसमासो हि अव्ययीभावः। परपदप्रधानसमासो द्विगुः तत्पुरुषश्च। कर्मधारयो द्वन्द्वश्च उभयपदार्थप्रधानसमासः। बहुव्रीहिश्च अन्यपदार्थप्रधानः।

समासस्य सप्तविधत्वम्- केचित् पुनः समासस्य सप्तविधत्वम् अङ्गीकुर्वन्ति। अस्मिन् विषये लौकिकमाभाणकं यथा-

**'द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।**
**तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥'** इति।

सप्तसमासवादिषु केचन नित्यसमासं व्यतिरिच्य उपपदसमासं स्वीकुर्वन्ति। तदुच्यते शब्दशक्तिप्रकाशिकायाम्-

**"स चायं षड्विधः कर्मधारयादिप्रभेदतः।**
**यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः॥"** इति।

समासस्य अष्टाविंशतिप्रकारत्वम्- किञ्च अवान्तरभेदान् आश्रित्य समासस्य अष्टाविंशतिप्रकारत्वमपि कैश्चिद् वैयाकरणैः स्वीक्रियते। तदुक्तं-

**"तत्राष्टधा तत्पुरुषः षड्विधः कर्मधारयः।**
**षड्विधश्च बहुव्रीहिर्द्विगुराभाषितो द्विधा।**
**द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः॥"**[10] इति।

तत्पुरुषोऽष्टविधः यथा- प्रथमातत्पुरुषः, द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः, नञ्तत्पुरुषश्चेति।

---

9. सारस्वतव्याकरणम्, समासप्रकरणम्, पृष्ठाङ्कः- 211
10. वाररुचसंग्रहः।

सामान्यविशेषकुत्सितपूर्वपदोपमानपूर्वपदोपमितपूर्वपदवर्णोभयपदभेदात् कर्मधारयः षड्विधः।

बहुव्रीहेः षाड्विध्यं यथा- तद्गुणसंविज्ञानबहुव्रीहिः, अतद्गुणसंविज्ञानबहुव्रीहिः, संख्योत्तरबहुव्रीहिः, अन्तरालाभिधेयकबहुव्रीहिः, सरूपलक्षितबहुव्रीहिः, सहपूर्वपद-बहुव्रीहिः चेति।

एकवद्भावानेकवद्भावभेदेन द्विगुः द्विविधः।

द्वन्द्वश्चतुर्विधो यथा- द्विपदेतरेतरद्वन्द्वः, बहुपदेतरेतरद्वन्द्वः, द्विपदसमाहारद्वन्द्वः, बहुपदसमाहारद्वन्द्वश्चेति।

अव्ययपूर्वपदनामपूर्वपदभेदेन पुनः अव्ययीभावसमासो द्विधा विभज्यते इति साकल्येन समासस्य अष्टाविंशतिप्रकारत्वम्।

पर्यवेक्षणम्- समासभेदविषये इदं तावदवधेयं यत् पदार्थप्राधान्यदृष्ट्या अव्ययीभावादिरूपभेदकरणे अव्याप्त्यादिदोषाः ये प्रदर्शिताः दीक्षितानुयायिभिः तेषां यथार्थत्वेऽपि प्रक्रियादृष्ट्या तादृशभेदकरणं तु निर्दोषमेव। तथाहि समासान्तविधि-समस्तपदलिङ्गादिरूपप्रक्रियानियमभेदात् अव्ययीभावादिक्रमेणैव समासभेदः युक्तियुक्तः। 'दुर्भिक्षम्', 'शाकप्रति', 'उन्मत्तगङ्गम्' इति त्रिषु अव्ययीभावेषु यथाक्रमं पूर्वपदार्थ-प्राधान्यम्, उत्तरपदार्थप्राधान्यम्, अन्यपदार्थप्राधान्यञ्च दृश्यन्ते इति पदार्थप्राधान्यवैषम्यं परिलक्ष्यते इति सत्यम्, तथापि प्रक्रियानुसारं यस्मिन् समासे समासकारणात् समस्तपदस्य क्लीवलिङ्गत्वम् स समासः अव्ययीभावः इत्युच्यते। तर्हि एतल्लक्षणं प्रागुक्तेषु त्रिषु एव अव्ययीभावेषु सङ्गच्छते। एवं तत्पुरुषादिभेदविषयेऽपि बोध्यम्। ननु उच्चौः कृत्यादिसमासेऽपि समस्तपदस्य अव्ययत्वमिति चेदुच्यते यत् तत्र समस्तपदस्य अव्ययत्वम् उत्तरपदस्य अव्ययत्वात्। न तु तत्र समस्तपदस्य अव्ययत्वे समासवृत्तिः कारणम्, किन्तु अव्ययीभावस्थले पूर्वोत्तरपदयोः अव्ययत्वम् अनव्ययत्वं वा अनपेक्ष्य समासवृत्तिकारणादेव समस्तपदस्य अव्ययत्वम्। एवम् अव्ययीभावादिरूप- भेदकरणं समासस्य निर्दिष्टमेव। अतएव नव्यैः "सुपां सुपा तिङा नाम्ना" इत्येवंक्रमेण यद्यपि समासषाड्विध्यं प्रतिपादितं तथापि सिद्धान्तकौमुद्यां तदनुसारं समाससूत्राणां सन्निवेशो न कृतः। तत्र तु अव्ययीभावादिक्रमेणैव सूत्रसन्निवेशो विहितः इति शम्।

**सहायकग्रन्थाः**

1. आचार्यः। दामोदरः (1813 शकाब्दे)। सारस्वतव्याकरणम्।
2. आप्टे। महादेवचिमणाजी (1879)। वैयाकरणभूषणसारः। आनन्दाश्रम मुद्रणालयः।
3. गोस्वामी। श्रीजीवः (2014)। श्रीहरिनामामृतव्याकरणम्। कोलकाता। माधवभवनम्।
4. त्रिपाठी। जयशङ्करलालः (2061)। परमलघुमञ्जूषा। वाराणसी। कृष्णदास अकादमी।
5. दीक्षितः। पुष्पा। (2010)। अष्टाध्यायी। नवदेहली। संस्कृतभारती।
6. भट्टाचार्यः। श्रीतारानाथतर्कवाचस्पतिः (1892)। आशुबोधव्याकरणम्। कोलकाता। सरस्वतीयन्त्रम्।
7. मुखोपाध्यायः। सच्चिदानन्दः (2010-2011)। वैयाकरणसिद्धान्तकौमुदी। कोलकाता। साहित्यनिकेतनम्।
8. शर्मा। गिरिधरः (2001)। वैयाकरणसिद्धान्तकौमुदी। वाराणसी। मोतीलाल वेनारसीदासः।
9. शास्त्री। पण्डितढण्ढुराजः (2002)। शब्दशक्तिप्रकाशिका। नवदेहली। चौखम्भा संस्कृतसंस्थानम्।
10. शीलः। श्रीराधामाधवः (1783 शकाब्दे)। मुग्धबोधव्याकरणम्। कलिकाता। चौतन्यचन्द्रोदययन्त्रम्।
11. हालदारः। गुरुपदः (2006)। व्याकरण दर्शनेर इतिहास। कोलकाता। संस्कृतबुकडिपो।

✦✦✦

# धर्मस्य प्रमाणानि

-गोपालकृष्णमिश्रः *

धर्मस्य प्रमाणविषये अनेकानि प्रमाणानि दृश्यन्ते। तेषु सर्वेषु वेदः धर्मस्य मूलप्रमाणमेव कथ्यते। वेदानन्तरं तस्य अङ्गतया स्मृत्यादीनां शास्त्राणां च धर्मे प्रामाण्यं विद्यते। एतेषु सर्वेषु वेदादिषु प्रमाणेषु पूर्वपूर्वं प्रबलम् उत्तरोत्तरं तु दुर्बलञ्चेति धर्मशास्त्रकाराणां मतम्। **"वेदोऽखिलो धर्ममूलमिति"**[1] मनुस्मृतौ वेदः धर्मस्य मूलं प्रमाणमिति प्रतिपादितम्। पुनश्च गौतमस्य वचनानुसारेण **"वेदो धर्ममूलम्"**[2] इति वचनात् वेदः धर्मस्य मूलं प्रमाणम्। वेदश्चेति प्रतिपादनात् वैदिकाचारः वेदश्च धर्मप्रमाणमिति प्रतीयते। वशिष्ठधर्मसूत्रकारस्य मतानुसारेण श्रुतिस्मृतिविहितो धर्मः तदलाभे शिष्टाचारः प्रमाणम्। शिष्टः पुनरकामात्मा-अनेन वाक्येन श्रुतिस्मृतिशिष्टाचाराणां क्रमेण प्रामाण्यं प्रतिपादितम्। याज्ञवल्क्यस्य मतानुसारेण च-

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्।।**[3]

इति वचनात् वेदः, स्मृतिः, सज्जनानामाचारः, आत्मतुष्टिश्चेति धर्मे प्रमाणत्वेन उपन्यस्ताः। वेदः धर्मस्य मूलं प्रमाण-मिति विषयेऽस्मिन् सर्वेषां सूत्राणां स्मृतीनाञ्च ऐक्यमतमिति निश्चीयते। वेदानन्तरं मन्वादिस्मृतिशास्त्राणां धर्मे प्रामाण्यम्।

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चौव साधूनामात्मनस्तुष्टिरेव च।।**[4]

इति वचनात् तद्विदां च स्मृतिशीले इति गौतमवचनाच्च एवं प्रतीयते यन्न केवलं वेदः अपितुवेदानुमापकत्वेन स्मृतेरपि धर्मे प्रामाण्यम्। अयं विषयः महाभारतस्य अश्वमेधपर्वणि उक्तः। यथा-

---

* शोधच्छात्रः, धर्मशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा।

1. मनु.स्मृ. 2/6
2. गौ.ध.सू. 1-1-1
3. याज्ञ.स्मृ. 1/8
4. मनु.स्मृ. 2/6

**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।**
**द्वितीयं धर्मशास्त्रं तु तृतीयं लोकसंग्रहः॥**[5]

बौधायनधर्मसूत्रे **"उपदिष्टो धर्मः प्रतिवेदम्, स्मार्त्तो द्वितीयः तृतीयः शिष्टागमः"**[6] इति। नारदकात्यायनप्रभृतीनाम् अपि पुराणं पञ्चमवेदत्वेन अभिमतम्, परन्तु मन्वादिभिः पुराणं धर्मस्य प्रमाणत्वेन प्रत्यक्षरूपेण न गृह्यते, इतिहासपुराणाभ्यां वेदं समुपबृह्यते इति महाभारतस्य आदिपर्वणि प्रतिपादितत्वात्। अस्य धर्मस्यापरं प्रमाणम् आचारः, स एव प्रामाण्यावबोधनाय स्मृतिं कल्पयति। स्मृतिश्च तादृशीं श्रुतिं कल्पयित्वा तस्य प्रामाण्यं व्यवस्थापयति। उक्तं च माधवाचार्येण–

**आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्।**[7]

इति द्वयान्तरितं तेषां प्रामाण्यम् विप्रकृष्यते तैत्तिरीयायाम् उपनिषदि स्पष्टतया आचारस्य प्रामाण्यम् एवमुक्तम्। अथ यदि ते ब्राह्मणाः सम्मर्शिनः युक्तायुक्तालक्षणाः धर्मकामाः स्युः ते तत्र वर्तेरन्। आपस्तम्बेन आचारस्य प्रामाण्यम् उद्घोषितम् यथा– "सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तँ सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदम्भिकानां वृत्तसादृश्यं भजेत्"।[8] गौतमोक्तशीलस्य तथा च मनूक्तशिष्टाचारस्य च उभयोः विशिष्टभेदस्य अभावेऽपि ब्राह्मणवशिष्ठन्यायेन पृथक् निर्देशितः। गौतमस्य देशजातिकुल-धर्माश्चाचाम्नायैरविरुद्धाः एव प्रमाणमिति। शीलत्वं नाम रागद्वेषराहित्यम् इति कुल्लूकटीकायांप्रदर्शितम्। कुल्लूकटीकायां शीलशिष्टाचारयोः भेदोऽपि दृश्यते। आचारस्य तु गुरुप्रभृतीनां कम्बलवलूकलादि-आचारवत् बाह्यकर्म परन्तु शीलमन्तर्गताचारः शीलत्वमाचारत्वं चेति व्यवहारः। तयोः द्वयोरपि धर्मे प्रामाण्यमित्युक्तं, तथापि श्रुत्योः द्वयोः स्मृत्योः द्वयोराचारयोश्च परस्परं विरोधे, तुल्यबलविरोधे विकल्प इति गौतमवचनानुसारेण तत्र विकल्पः स्वीकार्यः, यथा– 'उदिते जुहोति अनुदिते जुहोति' इति। द्वयोः श्रुतिवचनयोः परस्परविरोधे किं कार्यम्, कदा च हवनं कर्तव्यमिति शङ्कायां तुल्यबलविरोधे विकल्प इति न्यायेन विकल्पः स्वीक्रियते। तथा च विकल्पेन आत्मतुष्टेः प्रामाण्यम् उत उभयकालविहितं हवनं स्वेच्छया प्राप्यते। अर्थात् उदिते सूर्ये हवनकरणे यत् फलं अनुदितेऽपि तदेव। तस्मात् श्रुत्योरुभयोः ग्रहणं वचनबलात् प्राप्यते। स्मृत्योः विरोधेऽपि विकल्प आश्रयणीयः। यथा उपनयनस्य अवस्थाविषये धर्मशास्त्र-काराणां बहुमतं पार्थक्यं च दृश्यते। आश्वलायनगृह्यसूत्रे निर्दिष्टं यद् ब्राह्मणस्य उपनयनसंस्कारः जन्मतः पञ्चमे वर्षे गर्भधारणतो वा

---

5. धर्म. इति. पृ. 9
6. बौ.ध.सू. 1/1/2-4
7. काल.मा.पृ. 87
8. आपस्तम्बीयधर्मसूत्रम्, 1.6.8

पञ्चमाब्दे, क्षत्रियस्य एकादशे, वैश्यस्यद्वादशवर्षे, षोडशे वर्षे चतुर्विंशतिवर्षे वा करणीयः। आपस्तम्बगृह्यसूत्रेबौधायनगृह्यसूत्रेसांखायनगृह्यसूत्रे चापि सूत्रकारैः मनुमतमेव अङ्गीकृतम्। मनुना उक्तम्-

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञा गर्भात्तु द्वादशे विशः॥**[9]

याज्ञवल्क्येनापि विषयेऽस्मिन् भणितम्-

**गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।**
**राज्ञामेकादशे सैके विशामेके यथाकुलम्॥**[10]

अत्रापि तुल्यबलविरोधे विकल्प इत्यनेन न्यायेन गर्भाष्टमे जन्माष्टमे वा उपनयनसंस्कारो यदा कदापि कर्तुं शक्यते इति नियमः। एवं रीत्या सदाचारविरोधेऽपि विकल्पः स्वीकर्तुं शक्यते। सदाचारस्तु शिष्टाचार एव अर्थात् शिष्टानाम् आचार इति। प्रसङ्गेऽस्मिन् बौधायनेन शिष्टस्य स्वरूपं प्रतिपादितम् यथा- **"शिष्टाः खलु विगतमत्सराः निरहङ्काराः कुम्भीधान्या अलोलूपा दम्भदर्पलोभमोहक्रोध-विवर्जिताः"**। वशिष्ठोऽपि 'कामनारहितजनः शिष्ट' इति प्रतिपादयति। ततः शिष्टाचारयोः विरोधे विकल्पेन अन्यतरो ग्राह्यः। यथा श्रुतिस्मृत्योः विरोधे सति स्मृतेरपेक्षया श्रुतेः तत्र बलवत्त्वात् श्रुतिवाक्यं ग्राह्यम्। तद्विषये व्यासेनोक्तम्-

**श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते।**
**तत्र श्रौतं प्रमाणं स्यात् तयोर्द्वैधे स्मृतिर्वरा॥**[11]

श्रुतिस्मृतिविरोधे कतिपयेषु स्थलेषु प्रक्रियाभेदोऽपि दृश्यते यथा- "जातपुत्रः कृष्णकेशोऽग्नीनादधीत"। इत्यस्य श्रुतिवचनस्य उदाहरणम् अष्टचत्वारिंशद्वर्षाणि ब्रह्मचर्यमिति स्मृतिवचनमपि आदरणीयं वेदानुमापकत्वेन प्रमाणत्वात्। परन्तु अस्मिन् विषये उभयोरापाततो विरोधो दृश्यते। यदि स्मृतिवचनानुसारेण कश्चन अष्टचत्वारिंश-द्वर्षाणि यावत् वेदाध्ययनपूर्वकं तिष्ठन् ततो गृहस्थो भूत्वा पुत्रान् उत्पादयेत्। किन्तु गर्भाष्टमे वर्षे उपनयनसंस्कारं विधाय ततः इतिहासपुराण-धर्मशास्त्रादिकं पठित्वा प्रायः द्वादशवर्षादारभ्य अष्टचत्वारिंशद्वर्षाणि यावत् नियमपूर्वकं वेदाध्ययनं तेन क्रियते तर्हि स षष्टितमे वर्षे गृहस्थो भूत्वा पुत्रमुत्पादयेत्। तस्मिन् काले स निश्चयेन कृष्णकेशत्वं प्राप्नोति। अत्र श्रुतिवचनेन सह स्मृतिवचनस्य विरोधो जातः, तथापि स्मृतिवचनस्य अपेक्षया श्रुतिवचनं ग्राह्यं प्रबलत्वात्। अतः ये उपकुर्वाणकाः

---

9. मनु.स्मृ-2/36
10. याज्ञ.स्मृ.- 1/14
11. धर्म.इति.- 1/पृ. 974

ब्रह्मचारिणः तेभ्यः अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यम् इति न भूत्वा नैष्ठिकब्रह्मचारिणां कृते स एवोपदेश इति मन्तव्यम्।

पुनश्च श्रुतिस्मृत्योर्विरोधे विरोधाधिकरणन्याय आगच्छति। स च न्यायः कालमाधवे माधवाचार्येण प्रपञ्चितः। स च न्यायो यथा– **"औदुम्बरी वेष्टनीया सर्वेत्येषा स्मृतिर्मितिः। अमितिर्वेति सन्देहे मितिः स्यादष्टकादिवत्"।**[12] औदुम्बरीं स्पृष्ट्वा गायेदिति प्रत्यक्षवेदविरोधात् मूलवेदस्य अननुमानात् अमानता। अत्र अयम् अभिप्रायो यत् चयनोत्तरवेद्यां सदोनामकः कश्चन मण्डपो निर्मीयते। तस्य मण्डपस्यउपरि काचित् उदुम्बरशाखा स्तम्भत्वेन निखाता भवति। तां शाखामुद्दिश्य सर्ववेष्टनं स्मृत्या प्रतिपाद्यते। अतः शङ्का उदेति यत् सर्ववेष्टनंस्मृतिप्रमाणं न वेति। तत्र पूर्वपक्षो वदति यत् यथा– **"अष्टकाकर्तव्या"**[13] इत्यादि स्मृतिवचनवत् सर्ववेष्टनं स्मृतिवचनमपि स्मृतित्वेन प्रमाणमिति। परन्तु सिद्धान्तवादी वदति तत्र अष्टकाकर्तव्या इत्यादि स्मृतिवाक्ये न साक्षात् वेदवचनमुपलभ्यते। किन्तु प्राप्तेन वेदवचनेन सर्ववेष्टनस्मृतेः विरोधो दृश्यते। यतो हि वेदे औदुम्बरीं स्पृशन् उद्गाता सामगानं कुर्यादिति नियमो विद्यते। यदि वस्त्रेण औदुम्बर्याः शाखायाः वेष्टनं क्रियते तर्हि सामगानकाले उद्गाता शाखां स्प्रष्टुं न शक्यते। तस्मात् श्रुतिविरोधो जायते। तथा च श्रुतिस्तु निरपेक्षा मूलभूता तदनुमापकत्वेन स्मृतेः प्रामाण्यात् स्मृतिः श्रुत्या बाधिता भवति। अतः सर्ववेष्टने स्मृतेः नैव प्रमाणमिति सिद्धान्तः तेन श्रुतिस्मृत्योः विरोधे श्रुतिरेव गरीयसीति सिद्धान्तः।

तद्वत् स्मृत्याचारयोः विरोधे आचारापेक्षया स्मृतेः प्राबल्यं भवति, यथा– आपस्तम्बेन विहितं सगोत्राय दुहितरं न प्रयच्छेत्। अस्मिन्नेव प्रसङ्गे गौभिलस्य मतं प्राप्यते– **"दारान् कुर्वीतासगोत्राम् मातुरसपिण्डाम्"।** वसिष्ठोऽपि **"पञ्चमीमातृ-बन्धुभ्यः सप्तमीपितृबन्धुभ्यः"** इत्यनेन स्मृतिचन्द्रिकायां गौतममतस्य खण्डन–पुरस्सरं देशाचारमाश्रित्य मातुलदुहितृषु परिणयनं व्यवस्थापयति। बृहस्पतिरपि देशाचारम् आश्रित्य तथैव वदति। परन्तु मन्वादयः स्मृतिकाराः एतन्मतं न स्वीकुर्वन्ति।

**पैतृष्वसेयींभगिनींस्वस्त्रीयां मातुरेव च।**
**मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत्।।**[14]

अतः अनेन वचनेन मातुलकन्यायाः परिणयनं स्मृत्या बाधितं भवति। तेन स्मृत्याचारयोः विरोधे आचारो बाध्यते। तस्मात् उत्तरदेशे पश्चिमदेशे च मातुलकन्यायाः परिणयनं क्रियते चेत् महान् दोषः, तदर्थं चान्द्रायणं विहितम्।परन्तु आचारस्य

12. जै.न्या.वि. पृ. 1.3.4
13. जै.न्या.वि. पृ. 25
14. मनु.स्मृ. 11–171

प्रामाण्यात् तत्तद्देशविशेषे तद्ग्रहणात् केवलं दक्षिणदेशे यदि मातुलकन्यायाः परिणयनं क्रियते तर्हि न दोषः। परन्तु अन्यत्र दोषत्वमेव अतः स्मृत्याचारयोः विचारो ग्राह्यः। एतस्माद् वचनात् ज्ञायते यत् देशाचारकुलाचारमाश्रित्य अनुष्ठीयमानं कर्म धर्मः। विषयोऽयं प्रतिपादितः मनुना तस्मिन् देशीयाचारपारम्पर्यक्रमागतः वर्णानां सान्तरालानां स सदाचार उच्यते।

आचारोऽपि देशाचारः शिष्टाचारश्च इति द्विविधः, यथा– शिष्टजनस्याचारो धर्मे प्रामाण्यत्वं भजति, तद्वत् देशविशेषस्यायम् आचारोऽपि तस्मिन् देशे धर्मे प्रामाण्यत्वम् आवहति। यथा– बौधायनेन उत्तरदेशीयानां दक्षिणदेशीयानां पृथक् पृथक् आचारः प्रतिपादितः। यत् पर्युषितं भोजनं, स्त्रिया सह भोजनं, मातुलकन्या–मातृश्वसृपितृश्वसृदुहितृगमनमित्यादयः दक्षिणदेशीयाचाराः, उत्तर–देशीयाश्च ऊर्णाविक्रयः सुरापानम् उभयत्र उदकव्यवहारः समुद्रे संयानमिति।

**सन्दर्भग्रन्थाः**


1. मनुस्मृतिः– चौ.सं.भ–2021
2. गौतमधर्मसूत्रम्– चौ.सं.सं.–2005
3. याज्ञवल्क्यस्मृतिः– रा.सं.सं–2002
4. बौधायनधर्मसूत्रम्– चौ.प्र. 2015
5. कालमाधवः– चौ.सं.भ–2005
6. जैमिनीयन्यायमालाविस्तारः– चौ.सं.प्र.–2013


✦✦✦

 ISSN : 0975-1769

# संस्कृतसाहित्येषु राजनीतिः

-डॉ. वेणुधरदाशः

**शोधसारः**

राजनीतिशब्दश्रवणसमकालमेव माद्यति चेतो राजनीतिविदां, बिभेति चेतस्सचेतसां, जिह्रेति बुद्धिस्सदा सतां, वेपते मनोऽमायिनां, स्थविराणामन्तःकरणञ्चाचकासीति, छलं नरीनर्ति, सत्यं क्षुभ्यति, नीतिनायिका जिगीषतां हृदयेषु निर्भरं पदमाबध्नाति, स्वच्छविचारणा निरभ्रं विकासाकाशं कामयते, लक्ष्मीः विदेशावासवास्तव्यमुद्रालयेषु निस्त्रपमनिशं शयाना सतीस्वसमयं सानन्दं यापयिष्यामीति हृष्यति, पुरापद्धतिः निद्रातुमिच्छति, चाटुकारिता वारवनिताभिस्सार्धमग्रिमानार्जव मार्गमन्वेष्टुमारभते, शास्त्राणि शयितुं विविक्तस्थानं परिव्रजन्ति, सज्जनताऽम्बुधौ समाधिं कांक्षति, वक्रता वायुवेगमपि व्यतीत्य अहिशतकं विमर्द्य विकृतिकालकूटमुद्गिरीतुमीहते, किम्बहुनाभिव्यक्तेन। अतोऽहं पूर्ववर्तिनां विदुषां ज्ञानानन्दलावण्यामृतं धीचुलुकैः पेपीयमानः काव्येषु राजनीतिमिति गुटिकारूपां पद्धतिमिह प्रस्तोतुमुपक्रमे।

**कूटशब्दाः**- राजा, नीतिः, मन्त्री, राजनीतिः, गुप्तचरः, सन्धिविग्रहौ, मन्त्रगुप्तिः, राजामात्यसौमनस्यम्।

नीतिपदार्थस्यामुष्य निरूक्तिं विवृण्वता व्याकरणविदाभिहितं यत्प्रापणार्थ-कणीञ्धातोः भावनायां **स्त्रियां क्तिन्नित्यनेन** विहितक्तिना व्याकृतोऽसौ प्राप्ति-मित्यर्थम्व्याजहार। ब्रूवतेऽपरे शाब्दिकास्तत्रैवं यत्करणसाधनोऽयं नीतिशब्दः **नयत्यनया-शेषसाध्यं या सा नीतिरिति**। निरूक्तिदमययोरनयोरन्यतरां द्वितीयां निरूक्तिञ्चेदुररी-कुर्यान्तदामुष्यायमेवार्थो निस्सरेत् यदसौ नीतिर्जीवनसाफल्यसरणिमेवाभिधत्ते। रूक्मिणीजानिकृष्णोऽधिगीतदशमाध्यायम्मधुरया वल्गुवाक्यया चाभिगीतन्निजारविन्द-वक्त्रेन नीतिमिह व्याददौ। यथा-

**नीतिरस्मि जिगीषताम्।**[1]

जिगीषतामित्युक्ते जेतुमनसां केषाञ्चिदपि देवदनुजमनुजयक्षरक्षसां विजयाभीप्सूनां या काचिदपि सृतिस्सैव नीतिरिति काव्यप्रज्ञापुरोधमनुभविनाञ्चाभिहितः। सन्दर्भ-

---

* संस्कृताध्यापकः, राष्ट्रियादर्शवेदविद्यालयः, उज्जयिनी, मध्यप्रदेशः।

1. गीता, 10-24

ममुमधीयान एष गवेषको विद्वदौषधीभूतन्नैषधं निदिध्यासमानास्तत्रत्यामुक्तिम् आचष्टे।

**आर्जवं हि कुटिलेषु न नीतिः।।**[2]

इति प्रस्तुत्य महाकाव्यकर्तुरमुष्य माघमहोदयस्य गिरा निर्गताम्–

**आत्मोदयः परज्यानिर्द्वयं नीतिरितीयति।।**[3]

इति पुरः परिवेश्यार्थगौरवगीतालंकृतालंकरणैस्सुशोभितस्य कविकोविदकृतिनो भारवेः किरातार्जुनीयवचसा–

**नयेन जेतुं जगतीं सुयोधनः।**[4]

इति प्रदर्श्य शतकत्रयेण विश्वप्रसिद्धभर्तृहरिः वाग्मित्ववक्त्रेनोक्तां–

**वाराङ्गनेव नृपनीतिरनेकरूपाम्।**[5]

इति पञ्चतयीं नीतिं व्याचिख्यासयामास। उक्ता पञ्चतयी नीतिरिदमेवेंगयति यत्कथं कुत्र कदा केन किं व्यवहार्यमाचार्यं वाच्यमिति नीतिः। सारस्तु सृतिरून्नति समुत्साहयोः। प्रजोत्थानप्रस्थानमेव नीतिः किं बहुना चोक्तेन।

एतर्हि राजनीतिश्चर्यायाः पराकाष्ठां प्रतिष्ठमाना नृणाम्क्त्रोत्पलालिपुञ्जं बिभ्राणा, अहस्तपादापि ग्रन्थेषु चाञ्चल्यं भजमाना, अप्राणापि समाचारपत्राणाम्प्रतिपृष्ठन्निजास्मितां निदधाना, वातगतिरिव सवेगं भवाम्बुधावुत्तरोत्तरं सर्वं चक्रमीतितमाम्, विष्णुपत्नीव विश्वं व्याप्नोतितराम्, सहस्रदीधितिरिव निदाघे दन्दह्यते नरान्, राहुरिव सज्जनेन्दुमाशु ग्रसते, कज्जलकोष्ठमिव कालिम्ना स्वच्छमपि पवित्रमपि शुभाचारमपि दुकूलं सगाढं सुलिम्पति, राजयक्ष्मेव देशगात्रं तितांसति, क्षत्रियव्याधिरिव सर्वस्वमाहर्तुञ्चेष्टते, तत्राभिसारो नरीनर्ति, शीलं मरीमर्ति, वारूणी समुच्छलति, विप्रलम्भितस्सहजः, पुत्रोऽपि पितरं प्रतिवेशिप्रतिभट–मिवासूयति, सह स्थितमुर्जस्वलन्नेदीयांसं विषहते, सासूयमखिलमीक्षते, नेक्षते निजान्न वीक्षते विशेषज्ञान्न परीक्षते निजचरितं, मार्जनीव द्वारस्थपर्य्याकुलकडंकरवरीयां सम्पथोऽपसारयति, नववधूरिव प्रजाकल्याणकार्याज्जिह्रेति, धोनीयष्टिकाप्रक्षेपितषष्ठीकन्दुक इव पण्डितो राजद्वाराद्बहिरेव सन्तिष्ठते, ग्रन्थप्रक्षिप्रांश इव परिजनः विदूयते चेतसः, श्रीखण्डचन्दनबिन्दुरिव चाटुकारशिशीर्षण्यस्सन् देदीप्यते, ग्रीवास्थहैमालंकृतिरिव हृदये विलसति रामा, किम्बहुना .......येषु प्रसीदति तेभ्योऽखिलस्वं यच्छति, येषु वा विषीदति तेषामसूनपि अह्नायापहरतीति विचित्रैन्द्रजालिकेव निजस्वरूपं प्रकटयति नीतिः।

---

2. नैषधीयचरितम्, 5–103
3. शिशुपालवधम्, 2–30
4. किरातार्जुनीयम्, 1–7
5. नीतिशतकम्, 48

नृपनीतावस्य नृपस्यानिवार्यतां विवर्णयता मनुनात्मीयस्मृतौ निजमतमेवं प्रास्तावि। यथा–

**अराजके हि लोकेऽस्मिन्सर्वतो विद्रुते भयात्।**
**रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः॥**[6]

अस्याशयोऽयं यच्छ्रीमता भगवतैव जगतामवनाय, भयाच्च इतस्ततः पलायमानानां प्रजानां व्यवस्थित्यै ननु अराजकं लोकं राजकीकरणाय समाजे राजा निरमायि। स हि भयान्मोचयित्वा स्वा प्रजा इव प्रजाः प्रतिपालयितुं यतते तद्यथात्र कालीदासीयं वचो वच्मि–

**प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम्।**
**यूथानि संचार्य रविप्रतप्तश्शीतं दिवा स्थानमिव द्विपेन्द्रः॥**[7]

महात्मा विदुरोऽपि राज्ञः लक्षयन्सम्यक्प्राहात्मीयाधिविदुरनीतियद्यो हि स्थानं, वृद्धिं, क्षयं, कोषं, जनपदं, दण्डञ्चेति षट्कतत्त्वानि सम्यङ्न वेद न स चिरं राज्यं रक्षितुमीहेत तद्यथा–

**यः प्रमाणान्न जानाति स्थाने वृद्धौ तथा क्षये।**
**कोषे जनपदे दण्डे न स राज्येऽवतिष्ठते॥**[8]

अपरत्राप्यसावेवाह यद्धर्मपूर्वकं राज्यं राजा प्राप्नुयात्, धर्मेणैव प्रजा निभालयेत्, धर्माश्रितां राज्यश्रियमधिगम्य राज्यं समेधयेद् व्यवस्थापयेच्च। प्रमाणमत्रास्य विदुरनीतिरिहोपन्यस्यते–

**धर्मेण राज्यं विन्देत् धर्मेण परिपालयेत्।**
**धर्ममूलं श्रियं प्राप्य न जहाति न हीयते॥**[9]

धर्ममहिमानञ्चास्य गरिमाणञ्च व्याहरतामुना पुनस्तत्रैव न्यगादि यद्धर्मपद-वीमारूढा-नाम्तमाचरतां महीभुजां कीर्तिवैजयन्ती चतुर्दिक्षु दोधूयते, वसुन्धरा च सर्वविधैः सस्यादिरूपवद्भिर्वसुभिः परिपूर्यते, राज्यभूतिश्चोच्छ्रायमधिगच्छति–

**धर्ममाचरतो राज्ञस्सद्भिश्चरितमादितः।**
**वसुधा वसुसम्पूर्णा वर्धते भूतिवर्धिनी॥**[10]

---

6. मनुस्मृतिः, 7-3
7. अभिज्ञानशाकुन्तलम्, 5-5
8. विदुरनीतिः, 137-10
9. विदुरनीतिः, 137-31
10. विदुरनीतिः, 137-28

कपटप्रातियोगिकत्वेऽपि सत्यानुयोगिकत्वमिह धर्मः प्रोक्तो महात्मविदुरेण। छलमेव धर्मप्रतिबन्धकतत्त्वमतोऽमुना रहितस्य सतांचरितमनुवर्तिनो राज्ञश्चेहोपन्यासः। निम्नोलिखितपद्यमद्यानिन्द्यमस्माभिस्सर्वथा हृदि निगृहीतव्यमिति मे मतिः।

**न सा सभा यत्र न सन्ति वृद्धाः, वृद्धा न ते ये न वदन्ति धर्मम्।**
**धर्मो न सो यत्र न सत्यमस्ति, सत्यन्न तद् यच्छलेनाभ्युपैति।।**[11]

प्रसङ्गानुकूलं पुनरपि स महात्मा महत्त्वाधायकं सत्यन्तथ्यम्प्रस्तुवन्नाह यच्छूरो, विद्यावेदी, प्रकृतिसेवी चेति त्रिविधा नरा एव सस्यश्यामलां सुवर्णपुष्पामिमां वसुधां चिन्वन्ति।

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरूषास्त्रयः।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।**[12]

शूरमधिकृत्यैकाधिलोकमुक्तिस्स्मर्यते वीरभोग्या वसुन्धरा। आशयमस्या विकथ्यमानैर्विद्वद्भिरेवमुदीर्यते यद्भटो भुनक्ति वसुन्धराम्, इहाधुनिकेन नवनवोन्मेष-शालिनींबुद्धिं विभजता विदुषा भटम्परिभाष्योद्यते यस्य बुद्धिर्बलन्तस्य निर्बुद्धेस्तु कुतो बलम् बलमित्युक्ते लक्षणया बली बुद्धिमाँञ्चेत्युभयं वक्तुं शक्यम्। न केवलं शरीरबलेन केनापि नृपेनाचलाऽचञ्चला भुज्यतेऽपि तु बुद्धिसेवानामभ्याम्बलाभ्यामेव। शूर-कृतविद्य-सेवकेति त्रिविधबलेषु सेवापरम्बलमेव बलीयः शास्त्रसारः। बुद्धिबलस्य बलीयस्त्वं सम्प्रधारयता गायत्रीमन्त्राविष्कर्त्रा राजर्षि विश्वामित्राभिधेन प्रसिद्धिमाप्नुवतार्षि-परम्परायामुच्चमुद्घोषितन्निजाहवे ब्रह्मर्षिवशिष्ठेन सार्धम्, यथा-

**धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलम्बलम्।।**

गात्राभिधानंक्षत्रियबलम्ब्रह्मोपगीतम्बुद्धिबलञ्चेहावगन्तव्यम्। क्षितिभृतामेषां सेवाधर्मानु-रञ्जिनांराज्ञांज्यायस्त्वम्प्रदर्शयताकविकुलकान्ताविहारहारं मुष्णतोपमालता-निकेतनाभिसारक-स्वामिनाकालिदासेनमुखमात्मीयंव्यादयोदीरितमभिज्ञानशाकुन्तले। निजाखिलंसुखंनिरभिलष्यमहीरूह इव वातातपवर्षाविप्रुषः सहमानो महीभुजः प्राकृतिकस्स चेतरेषां प्रजाजनानामहर्दिवमुपद्रवं दवयति सुखापरपर्यायवचनेनाभिहितानन्दञ्च दित्सति।

**स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः।**
**प्रतिदिनमथवा ते वृत्तिरेवंविधैव।।**[13]

सेवाधर्मकृच्छ्रतामभिवदतामनुभूतिसाम्राज्ञीजुषां भर्तृहरीणामभिहितमिहोऽभिनिदधे।

---

11. विदुरनीति, 138-58
12. विदुरनीति, 138-74
13. अभिज्ञानशाकुन्तल, 5-7

**सेवाधर्मः परमगहनो योगिनामप्यगम्यः।**[14]

**अपरञ्च–**

**राजन् दुधुक्षसि यदि क्षितिधेनुमेतां,**
**तेनाद्य वत्समिव लोकमिमं पुषाण।**
**तस्मिँश्च सम्यगनिशं परिपोष्यमाणे,**
**नानाफलैः फलति कल्पलतेव भूमिः॥**[15]

कविरसावितरत्रापि षट्कलक्षणवतो राज्ञञ्चोल्लिलेखः तद्यथा–

**आज्ञा कीर्तिः पालनं ब्राह्मणानाम्।**
**दानं भोगो मित्रसंरक्षणञ्च॥**[16]

रघुवंशमहाकाव्ये तु तत्त्वमेतद्धि सम्यक्प्रत्यपादितं द्रष्टव्यम्–

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम्॥**

**त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥**

**सोहमाजन्मशुद्धानामाफलोदयकर्मणाम्।**
**आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥**[17]

राजान्यानाम्प्रधानङ्कार्यमवनं विशामित्यसर्वसंस्कृतसाहित्येषु प्रतिपादितन्तदनुमोदयच्छाकुन्तलम्परोच्चम्परिभाषमाणामालक्ष्यते यदमुना वशिना राज्ञा दुष्यन्तेनाखिलभोग्याश्रमे नाम्ना गृहस्थे वसतिं विदधतापि प्रजानामजस्रं संरक्षणात्प्रत्यहन्तपश्चरता वन्दिभिर्बहुशो विकत्थ्यमानेन मुनीनामप्यधिकतरं यशस्समुपार्जयित्रा मुनिराज इत्युपाधिनालंकृतेन द्यौश्शपृश्यते यथा–

**अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये।**
**रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति॥**[18]

एतावतेदमवगतं भवति यद्योप्रजारक्षी स नृपो नृपशब्दवाच्यस्स्यात्। धैर्यम्वीरता चेत्येतद्गुणद्वयस्यामुष्यापि क्षितिभृति अपरिहार्यत्वमिति धिया विद्योत्तमा जानिना

14. नीतिशतक, 58
15. नीतिशतक, 46
16. नीतिशतक, 48
17. रघुवंश, 2-6,7,8
18. अभिज्ञानशाकुन्तल, 2-14

साधूक्तमभिशाकुन्तम्-

**नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-**
**मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति॥**[19]

अहमत्र कविराजविश्वनाथवचसापि समुक्तम्मण्डयितुमीहमानस्सन्नस्मि कस्तावन्नेतेत्युक्ते सति विश्वनाथो निजगाद-

**त्यागी कृती कुलीनस्सुश्रीको रूपयौवनोत्साही।**
**दक्षोऽनुरक्तलोकस्तेजो वैदग्ध्यशीलवान्नेता॥**[20]

सन्दर्भतेऽथर्वा ऋषिश्चेह राजानं यथा-

**ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति॥**[21]

आनुश्राविकयुगेऽपि राष्ट्रं, राज्यं, सेनापतिः, प्रजाः, जनपदं, सेनानी, शत्रुरित्यादीनामाभीक्ष्ण्येन प्रवचनत्वात्तात्कालिकस्यामुष्य राज्ञोऽपि लक्षणस्य दृढतरं प्रमाणं साम्मुख्यं भजत एव-

**सुप्रजाः प्रजाभिस्स्याम।**[22] **शं न कुरू प्रजाभ्यः।**[23] **अस्मै विश एष वोऽमी राजा॥**[24] **ईशायै मन्यु राजानम्॥**[25] **राष्ट्रदा राष्ट्रम्मे देहि॥ अस्माकं वीरा उत्तरे भवन्तु॥**[26] **जहि शत्रून् अपमृद्योऽनुस्व॥**[27] **ये नः सपत्ना अप ते भवन्तु॥**[28]

**राजनीतिः-**

सामदामदण्डसन्धिविग्रहादीनि नन्वङ्गानि राजनीतेस्तत्र दण्डविधिर्गरीयान्सूक्ष्मश्च। तं यो यथायथं वर्तयति स नेदीयान्प्रजानान्नो चेद्दवीयानह्नाय सञ्जायते। दण्डविधिं विविदिषतां राज्ञामुचितानुचितयोश्च दण्डविधित्साकलाभृताम् प्रकृतिर्नापथम्प्रतिष्ठते।

**नियमयसि कुमार्गप्रस्थितानात्तदण्डः।**
**प्रशमयसि विवादं कल्पसे रक्षणाय॥**[29]

---

19. अभिज्ञानशाकुन्तल, 2-15
20. साहित्यदर्पण, 3-31
21. अथर्ववेद, 11-7-17
22. यजुर्वेद, 8-53
23. यजुर्वेद, 36-22
24. यजुर्वेद, 9-40
25. यजुर्वेद, 21-57
26. यजुर्वेद, 17-43
27. यजुर्वेद, 7-37
28. यजुर्वेद, 34-46
29. अभिज्ञानशाकुन्तल, 5-8

प्रेयान्नीतिविदत्रैवं समुवाच दण्डं शास्ति प्रजाः सर्वाः उक्तिरियमनूदिता हिन्द्याम्मानसकारेणापि समुदाहृता। यथा–

**विना भय होय न प्रीत।**[30]

अपराध्यन्तमाततायिनन्तस्करमातंकिनमपथानुक्रमिणन्धर्मद्रोहिणं राज्यविरोधिनन्नरं यो न यथा तथन्दण्डयीत तस्य राज्यमाह्वायापथं विसर्पद्धीयते, भारविर्विषयेऽत्र साधु संजगाद–

**तदाशु कर्तुं त्वयि जिह्ममुद्यते।**
**विधीयतान्तत्र विधेयमुत्तरम्।।**[31]

द्वैतवनमधिवसन्तम्वनेचरो भणति युधिष्ठिरं यच्छीघ्रं विधातव्यं दण्डं दद्यादरिष्ट–विधायिने प्रतिपक्षतामाचरते दुर्योधनाय।

**गुप्तचरः–**

महाभारतेऽभिगीतं चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः विचिन्त्य वक्तुं शक्यं यन्नृपस्तु निखिलं कृत्यजातमात्मना नेत्रेण न वीक्ष्य चारचक्षुर्भिरेवेक्षतेऽतो विश्वासभाजां रहस्यवेदिनान्नीतौ चास्य महत्त्वं स्थानं भवति। अतो नृपस्तु महितस्थलेषु नेदिष्ठान्नियोज्योपप्लवेभ्यः प्रागेव व्यवस्थितिं विदित्वा बाहीकमन्तरिकञ्चोपद्रवाञ्छामयेत्।

**क्रियासु युक्तैर्नृप चारचक्षुषः।।**[33]

चारचक्षुषाञ्चक्षुर्भिरेव चतुरोऽचलाचालको भूपः प्रतिवेशिनृपाणां रहस्यानि विदित्वा यथाविधि कृत्यमधिकुरूते–

**श्रियः कुरूणामधिपस्य पालिनीं, प्रजासु वृत्तिं यमयुंक्त वेदितुम्।**
**स वर्णिलिंगी विदितः समाययौ, युधिष्ठिरं द्वैतवने वनेचरः।।**[34]

माघोऽनिदाघोऽपीह सटीकं विवृणोति, उपमिमीते च शब्दविद्यया–

**अनुत्सूत्रपदन्यासा सद्वृत्ति सनिबन्धना।**
**शब्दविद्येव नो भाति राजनीतिरपभ्यशा।।**[35]

---

30. तुलसीकृत रामायण, सुन्दरकाण्ड, 57 दोहा
31. किरातार्जुनीय, 1–25
32. महाभारत, 138–34
33. किरातार्जुनीय, 1–4
34. किरातार्जुनीय, 1–1
35. शिशुपालवध, 2–112

**सन्धिविग्रहौ-**

द्वयोरन्यतरमेकमपीह नास्ति हेयम्। अर्थशास्त्रप्रणेतृभिश्चाणक्यैरगादि यद्यपि एकोऽपि अरारातिस्तर्हि सुखसंकल्पोऽपि विचिकित्सितव्य एव, अतः परिस्थित्यवलोकन-पुरस्सरमेतौ याथातथ्येनाभिप्रयोक्तव्यौ। कविवरेण्यमाघोऽपिएतद् अनुवर्तयन्तमुद्धार **ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम्** बलाबलयोरवगमनन्ततस्तौ विदध्येतान्नो चेत्परिणामः प्रतीपस्स्यात्। **गजपादयुद्धवद् बलवद्विरोधः** इति चाणक्यसूत्रम्। बलिनारिणा सह संदध्यान्निर्बलेन च विगृह्णीयादित्यस्य विनियोगविधिः। **अहो दुरन्ता बलबद्विरोधिता** इति भार विप्रोक्तमिहावोचम्।

**मन्त्रगुप्तिः-**

सञ्जीवनी मन्त्रगुप्तिस्तामात्मत्सात्कृत्य यथाकथमपि क्षितिभृता मन्त्रणां गोपायतात्मीयसम्पदैधितव्या।

> **महीभृतां सच्चरितैश्चरैः क्रियाः, सवेद निश्शेषमशेषितक्रियः।**
> **महोदयैस्तस्य हितानुबन्धिभिः, प्रतीयते धातुरिवेहितं फलैः॥**[36]
>
> **षट्कर्णाद् भिद्यते मन्त्रः। सर्वद्वारेभ्यो मन्त्रो रक्षितव्यः।**[37]

इति चाणक्यसूत्रद्वयं मन्त्रगुप्तिमेवेंगयति।

**राजामात्यसौमनस्यम्-**

राज्यश्रियंप्रशासन्नृपोऽमात्यवचांसिसम्यगुररीकृत्यतदनुष्ठातुमीहते। आत्मीयोऽपिनृ-पोक्तानिगोपयन्तद्वदेवजनश्रियमुत्थापयितुंराज्ञा सह सम्यगाचरितुं नीतितत्त्वानि विदांकुरुते तत्र तयोस्सौमनस्यात् प्रकृतिसम्पदोन्नतिरकाल्पनिकी जायत इति।

> **सदानुकूलेषु हि कुर्वते रतिम्।**
> **नृपेस्वमात्येषु च सर्वसम्पदः॥**[38]

सर्वसम्पद इत्युक्ते राजा, प्रजा, भूभागः, मन्त्रः, सीमा, नीतिः, दण्डः, स्थानं, कोष इत्यादीनि समस्तानि जाततत्त्वानि।

**उपसंहारः-**

समासतोराजनीतिबिन्दवोऽत्रन्यरूप्यन्त। **संस्कृतसाहित्येषु राजनीतिः** इत्यत्रोक्त-काव्यपदनियामकानिकानिचिदेवप्रसिद्धानितत्त्वानिविदुषांसमक्षंप्रस्तुतानि। विषयोऽयमगाध-

---

36. शिशुपालवध, 2-35
37. चाणक्यसूत्र, 57
38. किरातार्जुनीयम्, 1-5

श्रममपेक्षते। कोविदास्तत्र श्राम्यन्ति, मादृक्षस्तु चञ्चुप्रवेशं विधाय ततो विरन्तुमीहते। मन्ये सम्पादकश्रेष्ठो निर्वण्येदं शोधपत्रं न्यूनतामपाकृत्य तन्माञ्चसंकीर्त्यसत्पथंदर्शयेदिति। निजपद्येननिम्नोल्लिखितेनशोधविलेखनादधुनाविरमामि।

**सन्दर्भग्रन्थसूची-**


1. साहित्यदर्पणम्, विश्वनाथ कविराजः- आचार्य लोकमणिदाहाल, डॉ. त्रिलोकीनाथ द्विवेदी- चौखम्बासुरभारती प्रकाशन, वाराणासी-2008
2. नीतिशतकम् (भर्तृहरि), व्या. गोपाल शर्मा, हंसा प्रकाशन, जयपुर, 1997
3. अथर्ववेद संहिता : सं. श्री कण्ठ शास्त्री, माधव पुस्तकालय, कमलानगर, 1929
4. नैषधीयचरितम्, श्री हर्ष, निर्णय सागर प्रेस, मुम्बई 1942
5. अभिज्ञानशाकुन्तलम्, डॉ. कपिलदेवद्विवेदी, इलाहाबाद, 1968
6. यजुर्वेद संहिता- श्रीपाद्दामोदरसातवलेकर, स्वाध्यायमण्डल, परडी
7. मनुस्मृति, आचार्य मनु, पं, श्री जगन्नाथ शास्त्री, तैलङ्ग प्रकाशन, भारतीय विद्याभवन, 2002
8. महाभारत, वेदव्यास गीताप्रेस, गोरखपुर, 2015
9. कालिदासग्रन्थावली, कालिदास, सं. आचार्यसीतारामचतुर्वेदी, चौखम्बा अमर भारती प्रकाशन, वाराणसी
10. विदुरनीतिः, गीताप्रेस, गोरखपुर, 2013


✦✦✦

 ISSN : 0975-1769

# प्रश्नमार्गानुसारेण देवकोपविमर्शः

-अनिलकुमारदेसायिः *

-गिरीशभट्टः बि. **

-दिनेशमोहनजोशी ***

**शोधसारः** - ज्यौतिषस्य त्रयः स्कन्धाः भवन्ति - सिद्धान्तः, संहिता, होरा चेति। ज्यौतिषस्य यस्मिन् स्कन्धे मानवेन पूर्वजन्मनि कृतानां शुभाशुभकर्मणाम् अस्मिन् जन्मनि कानि फलानि अनुभोक्तव्यानि भवन्तीति निरूपितं भवति सः होरास्कन्धः। होरास्कन्धस्य हि पञ्च विभागाः - जातकं, ताजिकं, रमलं, प्रश्नः, स्वप्नः चेति। होरास्कन्धस्य यस्मिन् विभागे प्रश्नःलग्नमाधारीकृत्य शुभाशुभफलानाम् आदेशः कथं करणीयः इति निरूपितं सः प्रश्नः न इत्यभिधीयते। प्रश्नशास्त्रं हि केरळेषु बाहुल्येन प्रचलितं भवति। बहवो प्रश्नपग्रन्थाः सन्ति -प्रश्नधतन्त्रं, प्रश्नरनारदी, प्रश्न ज्ञानं, प्रश्नःसारः, प्रश्नमाणिक्यमाला, **'प्रश्नमार्गः'** इत्यादयः। तेषु 'प्रश्नमार्गग्रन्थः' अत्यन्तं प्रसिद्धः भवति। इदानीं दक्षिणभारतीयसंस्कृतविश्वविद्यालयेषु फलितज्यौतिष-पाठ्यक्रमे अयं ग्रन्थः निर्दिष्टः भवति। इदानीन्तनकाले अस्य ग्रन्थस्य आधारेणैव दैवज्ञाः प्रश्नरविमर्शनं कुर्वन्ति। प्रश्नेमार्गस्य ग्रन्थकर्तुः नाम ग्रन्थे न निर्दिष्टम्। केचन विद्वांसः प्रश्न मार्गस्य कर्तुः नाम "नारायणनम्बूतिरिः" अथवा "इटक्काट् नम्बूतिरिः" इति निर्दिशन्तिप। ग्रन्थेऽस्मिन् पूर्वार्धे 16 अध्यायाः, उत्तरार्धे 16 अध्यायाः - एवमाहत्य 32 अध्यायाः सन्ति। ग्रन्थेऽस्मिन् विविधप्रश्नाानां विमर्शः दृश्यते। अस्मिन् ग्रन्थे प्रतिपादितः कश्चन मुख्यः विचारः पञ्चदशतमे अध्याये प्रतिपादितः "बाधासमूहविमर्शः"। तत्रप्रतिपादितेषुबाधासमूहेषु देवकोपविमर्शः अत्यन्तं प्रधानो भवति। अतः अध्यायस्यादौ देवकोपविमर्शं प्रतिपाद्य अनन्तरम् इतरबाधानां विषये निरूपितवान्प्रश्नमार्गकारः। अस्मिन्शोधपत्रे प्रश्नमार्गकारेण निरूपितस्य देवकोपविमर्शस्य विचाराः प्रस्तूयन्ते।

---

* शोधच्छात्रः, ज्यौतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः, भारतम्।

** शोधच्छात्रः, ज्यौतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः, भारतम्।

*** मानविकी एवं समाजविज्ञानविभागः, भारतीयप्रौद्योगिकीसंस्थानम्, मुम्बई, महाराष्ट्रम्, भारतम्।

**प्रमुखशब्दाः** - देवकोपः, धर्मदैवबाधा, बाधा, बाधास्थानम्, सर्पबाधा।

**बाधासमूहाः** -

प्रश्नशमार्गग्रन्थे पञ्चदशे अध्याये बाधासमूहविमर्शः दरीदृश्यते। पञ्चदशाध्यायस्य आदिमश्लोके एव ते बाधासमूहाः प्रश्नामार्गकारेण सङ्गृहीताः। स च श्लोकः एवं भवति -

**देवैर्वा धर्मदेवैः फणिपितृगुरुभिः ब्राह्मणैः प्रेतभूतैः**
**पीडा या सा कृता सा तदनु भवति या दृग्भवा वाग्भवा वा।**
**या स्याद्भूयो विषोत्था पुनरिह रिपुभिर्याकृता सा च तासां**
**हेतुश्चापि क्रमेण प्रतिविधिरपि च प्रोच्यते पृच्छकानाम्॥**[1]

इति।

श्लोकेऽस्मिन् देवकोपः, धर्मदैवबाधा, सर्पबाधा, पितृशापः, गुरुशापः, ब्राह्मणशापः, प्रेतबाधा, भूतगणानां बाधा, दृष्टिबाधा, वाग्दोषः, विषभोजनं (क्ष्वेलभुक्तिः), शत्रुकृताभिचारः - एते बाधाः सङ्गृहीताः। प्रश्नममार्गस्य पञ्चदशे अध्याये तासां बाधानां हेतवः (निदानानि), लक्षणानि, प्रतिविधयः (प्रायश्चित्तानि) च चर्चितानि। तासु बाधासु देवकोपस्य कारण-लक्षण-प्रायश्चित्तादिविषये अस्मिन् शोधपत्रे चर्च्यते।

**देवकोपः** -

देवानां कोपः देवकोपः। अस्माभिः मनोवाक्कर्मभिः कृतैः देवविषयकापचारैः, देवस्वापहारादिभिश्च अस्माकमुपरि देवानां कोपो जायते। तत्परिणामेन अस्माकम् स्वास्थ्यस्योपरि, अस्माकं कुटुम्बस्योपरि वा अनिष्टानि सम्भवन्ति। तत्परिहारार्थं शास्त्रोभक्तााानि प्रायश्चित्तानि करणीयानि।

**दैवानुकूल्यचिन्तनम्** -

यदि कोऽपि दूतः दैवज्ञस्य समीपमागत्य प्रच्छकस्य कुटुम्बे सम्भवितानाम् अनिष्टानां कारणं पृच्छति तर्हि दैवज्ञः प्रश्नसकालिकग्रहस्थित्यादिभिः तत्कारणं किमिति चिन्तयेत्।

**दैवानुकूल्यं प्रतिकूलतां वा विचार्य सत्यां प्रतिकूलतायाम्।**
**तदानुकूल्याय विधिर्विधेयः..........................................॥**[2]

---

1. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 1
2. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 2

इत्युक्तयरीत्या दैवज्ञः आदौ प्रच्छकस्य दैवानुकूलतां प्रतिकूलतां वा चिन्तयेत्। यदि प्रश्नयकालिकग्रहस्थितिः प्रच्छकस्य दैवानुकूल्यं सूचयति तर्हि प्रच्छकस्य देवतानुग्रहः वर्तते इति वदेत्। यदि प्रश्निकालिकग्रहस्थितिः देवताप्रातिकूल्यं सूचयति तर्हि प्रातिकूल्यनिवारणार्थं दैवानुकूल्यार्थं च करणीयानि शास्त्रोलक्ता नि प्रायश्चित्तानि आदिशेत्। देवताः प्रच्छकस्य अनुकूलाः भवन्ति वा प्रतिकूलाः भवन्ति वा इति गुरोः आनुकूल्यवशात् प्रातिकूल्यवशाच्च चिन्तयेत्। प्रश्नवकालिकग्रहस्थितौ यदि गुरुः प्रच्छकस्य अनुकूलो भवति तर्हि सर्वेऽपि देवाः प्रच्छकस्य अनुकूलाः भवन्तीति चिन्तयेत्। यदि गुरुः प्रतिकूलः भवति तर्हि सर्वेऽपि देवाः प्रच्छकस्य प्रतिकूलाः भवन्तीति चिन्तयेत्। यतो हि धिषणे (गुरौ) सर्वेषां देवानां सान्निध्यं नित्यं वर्तते। तदेवोक्तभम् -

**सर्वेश्वराणां धिषणेऽस्ति नित्यं सान्निध्यमस्माद्धिषणेऽनुकूले।**
**प्रायोऽनुकूलास्सकलाश्च देवास्तत्प्रातिकूल्ये सति नानुकूलाः॥**[3]

इति।

एवं गुरोः आनुकूल्यवशात् सर्वेषां देवानाम् आनुकूल्यं चिन्तयेत्। अन्यैः ग्रहैरपि तत्तद्ग्रहोक्त देवतानाम् आनुकूल्यं प्रातिकूल्यं वा चिन्तयेत्। ग्रहाः इष्टभावस्थिताश्चेत् अनुकूलाः भवन्ति, तथा अनिष्टभावस्थिताश्चेत् प्रतिकूलाः भवन्ति। ग्रहाणाम् इष्टानिष्टभावाः एवं निरूपिताः-

**सौम्यानां व्ययशत्रुमृत्युसहजा नेष्टा अभीष्टाः परे।**
**पापानामभिमातिसोदरभवा इष्टा अनिष्टाः परे॥**[4] इति।

सर्वेषां शुभग्रहाणां लग्नात् व्यय(12)-शत्रु (6)-मृत्यु (8)-सहज (3) भावाः अनिष्टाः भवन्ति, अन्ये भावाः इष्टाः भवन्ति। पापग्रहाणां तु अभिमाति (6) -सोदर (3) -भव (11) भावाः इष्टाः भवन्ति, अन्ये भावाः अनिष्टाः भवन्ति। ये ग्रहाः अनुकूलाः भवन्ति तेषां सम्बन्धिन्यः देवताः अपि प्रच्छकस्य अनुकूलरूपेणैव भवन्ति। तथा ये ग्रहाः प्रतिकूलाः भवन्ति तेषां ग्रहाणां सम्बन्धिन्यः देवताः प्रच्छकस्य प्रतिकूलरूपेण भवन्ति। रव्यादिग्रहाणां सम्बन्धिन्यः देवताः एषु श्लोकेषु कथिताः -

**अर्कः शम्भुरुदाहृतोऽखिलगृहेष्वर्को यदि द्वन्द्वभे**
**द्रेष्काणे प्रथमे गुहोऽत्र कथितो विघ्नेश्वरो मध्यमे।**

---

3. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 3
4. प्रश्नमार्गः - चतुर्दशोऽध्यायः - श्लोकः 44

**दुर्गा शीतकरो बली स विबलः काली स एवाबल-**
**श्चामुण्डीप्रमुखास्तमोगुणजुषो भौमालयस्थो यदि॥**

**कुमारो भैरवादिर्वा स्वाश्रितर्क्षवशात्कुजः।**
**चामुण्डी भद्रकाल्याद्याः स चेद्युग्मसमाश्रितः॥**

**श्रीरामाद्यवतारविष्णुरितरक्षेत्रेषु चन्द्रात्मजोऽ-**
**प्यन्त्यत्र्यंशगतः स्थिरे तु भवने यद्येष गोपालकः।**

**त्र्यंशेऽन्त्येऽत्र स विष्णुरेव हि पुनर्जीवो महाविष्णुर-**
**प्युक्तोऽयं ह्यखिलेश्वरोऽत्र तु भिदा ज्ञेया ग्रहर्क्षान्वयात्॥**

**अन्नपूर्णेश्वरी लक्ष्मीः यक्षी वा भृगुनन्दनः।**
**मन्दः शास्तादिकं दैवं राहुः सर्पगणः स्मृतः॥**[5] इति।

सर्वेष्वपि गृहेषु विद्यमानेन अर्केण शिवानुकूल्यं चिन्तयेत्। द्वन्द्वराशौ प्रथमदृगाणे रविः वर्तते चेत् शम्भुना साकं गुहः अपि चिन्तनीयः। द्वन्द्वराशौ द्वितीयदृगाणे रविः वर्तते चेत् शम्भुना साकं विघ्नेश्वरः अपि चिन्त्यः। एते अर्कसूचितदेवताभेदाः। यत्र कुत्रापि राशौ स्थितः शीतकरः बली चेत् दुर्गा चिन्त्या; विबलश्चेत् काल्यादयः चिन्त्याः। यदि शीतकरः बलहीनस्सन् भौमालयस्थो भवति तर्हि तमोगुणप्रधानाः चामुण्डी-रक्तेश्वर्याद्याः देवताश्चिन्त्याः। एते चन्द्रसूचितदेवताप्रभेदाः। सात्त्विके ओजर्क्षे (सिंह-धन्वोरन्यतरे) व्यवस्थितेन कुजेन कुमारश्चिन्त्यः। अन्येषु ओजर्क्षेषु व्यवस्थितेन कुजेन भैरवादयश्चिन्त्याः। युग्मराशिगतेन कुजेन चामुण्डी-भद्रकाल्याद्याश्चिन्त्याः। एते कुजसूचितदेवताभेदाः। चरराशिषु उभयराशिषु वा व्यवस्थितेन बुधेन विष्णोः श्रीरामाद्यवताराश्चिन्त्याः। स्थिरराशौ प्रथमद्वितीयद्रेष्कोणयोः व्यवस्थितेन बुधेन गोपालकृष्णश्चिन्त्यः। स्थिरराशौ अन्त्यदृगाणे व्यवस्थितेन बुधेन साक्षात् महाविष्णुरेव चिन्त्यः। एते बुधसूचितदेवताभेदाः। गुरुः यत्रकुत्रापि स्थितश्चेत् प्राधान्येन महाविष्णोरानुकूल्यं चिन्त्यम्। तथा गुरोः सर्वेश्वरकारकत्वात् सर्वेषामपि देवानामानुकूल्यं गुरोः स्थितिवशाच्चिन्त्याः। नाम गुरुस्थितराशिवशतः, गुरुणा युक्ते न ग्रहेण, गुरोः उपरि येषां ग्रहाणां दृष्टिरस्ति तेषां वशाच्च तत्तद्ग्रहराशीनां कारकदेवतानामानुकूल्यं चिन्तयेत्। यथा सिंहराशिस्थितः गुरुः, सिंहनवांशकस्थः गुरुः, रविणा युक्तः दृष्टः वा गुरुः शम्भुं सूचयति। एवमेव गुरोः कर्कोटकराशेः चन्द्रस्य वा सम्बन्धः वर्तते चेत् दुर्गा सूच्यते। कुजस्य सम्बन्धेन सुब्रह्मण्यं चिन्तयेत्। एवमन्येषामपि ग्रहाणां दृग्योगादिसम्बन्धवशातगुरुः तत्तद्ग्रहोक्ताः न देवताः सूचयति। एवमेव तत्तद्समुदायस्य सर्वेश्वराः अपि गुरोः वशादेव चिन्त्याः। यथा-वैष्णवानां विष्णुः सर्वेश्वरः, शैवानां

---

5. प्रश्नमार्गः - पञ्चदशोऽध्यायः -4,5,6,7 श्लोकाः

शम्भुः सर्वेश्वरः, गाणपत्यानां गणपतिः सर्वेश्वरः भवति। एते सर्वेऽपि गुरुणा चिन्त्याः। एवं धिषणस्य सर्वेश्वरकारकत्वात् देवताभेदचिन्तने गुरोः अतीव महत्त्वं विद्यते। शुभक्षेत्रगतात् शुक्रात् अन्नपूर्णेश्वरी, लक्ष्मीः च चिन्त्ये। पापक्षेत्रगतशुक्रेण यक्षी चिन्त्या। शनैश्चरात् शास्ताः, भूतगणाः, शैवगणाश्च चिन्त्याः। एवमेव राहोः सर्पगणः चिन्त्यः। केतुः गणपतिं सूचयतीति केषाञ्चिन्मतम्। एते रव्यादिराहुपर्यन्तानां ग्रहाणां देवताप्रभेदाः।

ये ग्रहाः बाधकाधीश्वराः भूत्वा अनिष्टस्थानगताः भवन्ति तेषां ग्रहाणां निजोक्तादनां देवतानां पीडां वदेत्। एवं बाधकाधिपतित्वे सति अनिष्टस्थानगत्वं देवकोपस्य लक्षणम्। यथोक्तडम् -

**बाधकाधीश्वरास्सन्तो यदि सूर्यादिखेचराः।**
**देवतानां निजोक्तायनां पीडां ब्रूयुरनिष्टगाः॥**[6] इति।

बाधास्थानचिन्तनस्य पक्षत्रयं विद्यते। तेषु द्वौ बाधास्थानचिन्तनक्रमौ। एकः महाबाधास्थानचिन्तनक्रमः। बाधास्थानचिन्तनक्रमौ एवं भवतः -

**आरूढराशौ चर आयराशौ स्थिरे तु बाधा नवमे विचिन्त्याः।**
**तथोभये कामगृहे त्रयाणां केन्द्रेषु चौषामिति केचिदाहुः॥**[7]

इति।

आरूढराशिः चरराशिश्चेत् आयराशिः (आरूढराशितः एकादशराशिः) बाधास्थानं भवति। आरूढराशिः स्थिरराशिश्चेत् आरूढराशितः नवमराशिः बाधास्थानं भवति। आरूढराशिः द्विस्वभावराशिश्चेत् आरूढराशितः कामगृहम् अर्थात् सप्तमराशिः बाधाराशिर्भवति। एवं बाधाराशिचिन्तनस्य प्रथमपक्षः। चरराशीनाम् अन्ये चरराशयः, स्थिरराशीनाम् अन्ये स्थिरराशयः, द्विस्वभावराशीनाम् अन्ये द्विस्वभावराशयः बाधकराशयः इति द्वितीयः पक्षः। महाबाधाचिन्तनस्य पक्षः एवं भवति -

**कुम्भश्चराणामलिचापसिंहस्त्रीरणामली गोवृषभस्य नक्रः।**
**कुम्भस्य कर्की मिथुनस्य धन्वी मीनस्य चापं खलु बाधकं स्यात्॥**[8]

इति।

सर्वेषां चरराशीनां कुम्भराशिः महाबाधाराशिः भवति। वृश्चिक-धनु-सिंह-कन्याराशीनां महाबाधाराशिः वृश्चिकः भवति। वृषभस्य महाबाधाराशिः मकरः। कुम्भस्य महाबाधाराशिः कर्काटकः। मिथुनस्य महाबाधाराशिः धनूराशिः। मीनस्यापि

6. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 8
7. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 111
8. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 112

धनूराशिरेव महाबाधाराशिः। एवं महाबाधाचिन्तनक्रमः। अयं तृतीयः पक्षः। एषु त्रिषु पक्षेषु आदिमः अन्तिमश्च सर्वत्र ग्राह्यौ। द्वितीयः पक्षः क्वचित् ग्राह्यः। तदेवोक्तंष प्रश्नहमार्गकारेण -

**बाधानिरूपणे पक्षास्त्र य इत्येषु गृह्यताम्।**
**आदिमोऽन्त्यश्च सर्वत्र ग्राह्यो वा मध्यमः क्वचित्॥**[9] इति।

एवं बाधकस्थानचिन्तनम्।

यः ग्रहः अनिष्टस्थानगः भूत्वा तस्य अनिष्टस्थानस्य अत्रोक्तआरीत्या यो बाधाराशिर्भवति तस्य अधीश्वरः भवति तस्य ग्रहसम्बन्धिदेवतानां बाधाः वाच्याः।

देवकोपकारणानां, देवकोपशान्त्यैह करणीयानां प्रायश्चित्तानाञ्च चिन्तनम्-

एवं ग्रहस्थित्या देवकोपः अस्ति वा न वा इति विचिन्त्य यदि देवकोपः अस्ति तर्हि तस्य कारणं किमिति चिन्तयेत्। देवकोपकारणचिन्तनक्रमः एवं भवति-

**सूर्यादीनां ग्रहाणां व्ययभवनगतः पापखेटो यदि स्यात्**
**स्वोक्तागनां देवतानां वपुषि विकलता डुण्डुभस्पर्शनं स्यात्।**
**संयोगे मान्दिराह्वोरथ रविजयुतौ जीर्णता वाशुचिर्वा**
**योगे भौमस्य रक्षाविहतिरभिहिता रक्षकस्वान्तभेदात्॥**[10] इति।

सूर्यादिग्रहेषु यः ग्रहः देवकोपसूचकः भवति तस्मात् व्ययभवने यदि कोऽपि पापखेटः वर्तते तर्हि तद्ग्रहसम्बन्धिदेवतानां वपुषि विकलता जाता; तस्मात् तद्देवतायाः कोपः सञ्जातः इति कथयेत्। यदि देवकोपसूचकग्रहस्य मान्दिराह्वोः योगः वर्तते तर्हि देवबिम्बे डुण्डुभस्पर्शनात् देवकोपः सञ्जातः इति वदेत्। यदि देवकोपसूचक (कारक) ग्रहः शनैश्चरेण युक्तोश भवति तर्हि देवबिम्बस्य जीर्णतायाः कारणात् अथवा देवालये अशुचेः कारणात् देवकोपः सञ्जातः इति वदेत्। यदि देवकोपसूचकग्रहः कुजेन युक्तो भवति तर्हि रक्षाविहत्या रक्षकस्वान्तभेदाद्वा देवकोपः वाच्यः। एवं देवकोपस्य कारणं विचिन्त्य तद्दोषशान्त्यै किं प्रायश्चित्तं करणीयमिति चिन्तयेत्। तद्यथा-

**लग्नस्थे पापयुक्तेच सति खलु विहगे बिम्बदोषोऽत्र वाच्यो**
**बिम्बं भिन्नं हि तस्मिन् धरणितनुभुवाऽशुद्धिरेवान्यपापैः।**
**बिम्बं तत्र प्रदेयं भवति खलु मुदे खेचरेऽथालयस्थे**
**जीर्णं वेश्मालयं तन्नवमथ कुरुतां दीयतां वान्यवेश्म॥**[11] इति।

---

9. प्रश्नमार्गः - पञ्चदशोध्यायः - श्लोकः 113
10. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 10
11. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 11

यदि देवकोपकारकग्रहः लग्नस्थः पापयुक्त्श्च भवति तर्हि बिम्बदोषेण देवकोपः सञ्जातः इति वदेत्। स च पापग्रहः कुजश्चेत् बिम्बं भिन्नं भवतीति वदेत्। अन्यैः पापग्रहैः बिम्बे अशुद्धिः सञ्जातः इति वदेत्। तद्दोषशान्त्यै यदि बिम्बम् अधिकं भिन्नं भवति तर्हि नूतनं बिम्बं प्रदेयम्। अल्पे भिन्ने सति बिम्बे यत्र भिन्नता सञ्जाता तत्र शास्त्रोक्तविधिना भिन्नतानिवारणं कृत्वा कलशाभिषेकादिकं क्रियते चेत् बिम्बदोषस्य वारणं भवति। यदि देवालये अशुचिर्भवति तर्हि शास्त्रोक्तरीत्या देवालयस्य शुद्धिं कुर्यात्। यदि देवकोपकारकग्रहः चतुर्थभवने पापयुक्तो भवति तर्हि वेश्मालयस्य (देवालयस्य) जीर्णत्वात् देवकोपः सञ्जातः इति वदेत्। तद्दोषशान्त्यै नूतनदेवालयस्य निर्माणं करणीयम्। देवकोपकारकग्रहस्थितस्थानभेदात् देवकोपशान्त्यै इतोऽपि प्रायश्चित्तानि कथितानि। तद्यथा –

**नृत्तं द्यूनगते कुजार्कगृहगे खेटे प्रदीपः स्मृतः**
**शुक्रेन्द्वालयगे तु पायसमपि क्षीरं घृतं वा पुनः।**
**बौधे चन्दनमार्यमन्दिरगते मालाप्रसूनानि वा**
**मन्दर्क्षे खलु भूषणानि वसनं तत्तन्मुदे दीयताम्॥**[12]

इत्युक्तुरीत्या देवकोपकारकग्रहः द्यून (सप्तम) भावस्थितश्चेत् नृत्तकरणेन देवकोपशान्तिः भवति। देवकोपकारकग्रहः कुजगृहे (मेषवृश्चिकयोरन्यतरे) अर्कगृहे (सिंहे) वा भवति चेत् दीपाराधनेन देवकोपशान्तिः भवति। देवकोपकारकग्रहः शुक्रगृहे (वृषभतुलायोरन्यतरे) भवति चेत् पायस–क्षीर–घृतानां समर्पणेन देवकोपोपशमनं भवति। देवकोपकारकग्रहः बौधे = बुधगृहे (मिथुनकन्ययोरन्यतरे) वर्तते चेत् चन्दनगन्धादिसुगन्धद्रव्याणां समर्पणेन देवकोपोपशमनं भवति। देवकोपकारकग्रहः आर्यमन्दिरगतः = गुरुगृहगतः (धनुर्मीनयोरन्यतरगतः) चेत् मालाप्रसूनानां समर्पणेन देवकोपोपशमनं भवति। देवकोपकारकग्रहः मन्दर्क्षे = शनिगृहे (मकरकुम्भयोरन्यतरे) भवति चेत् वसनभूषणादिकानां समर्पणेन देवकोपोपशमनं भवति। तदेव रीत्या –

**रन्ध्रगे कर्मसंस्थे च पूजा वा बलिकर्म च।**
**गीतं वाद्यं च रिःफस्थे तत्तत्प्रीत्यै प्रदीयताम्॥**[13]

इत्युक्त रीत्या देवकोपकारकग्रहः रन्ध्रगः (अष्टमस्थः) कर्मसंस्थो (दशमस्थो) वा भवति चेत् पूजा–बलिकर्मादिभिः देवकोपोपशमनं भवति। देवकोपकारकग्रहः रिःफस्थः (द्वादशस्थः) भवति चेत् गीत–वाद्यादिभिः देवकोपस्योपशमनं भवति। तथा देवकोपकारकग्रहः लग्नादिषु कस्मिन् भावे वर्तते इति ज्ञात्वा तदुक्तिप्रायश्चित्तं कर्तव्यम्। तद्यथा –

---

12. प्रश्नमार्गः – पञ्चदशोऽध्यायः – श्लोकः 12
13. प्रश्नमार्गः – पञ्चदशोऽध्यायः – श्लोकः 13

**लग्नादौ प्रतिबिम्बदानजपपूजाधामसन्तर्पणै**
**रुक्शान्तिः प्रतिकारनृत्तबलिदेवोपासनैश्च क्रमात्।**
**दन्तिस्कन्धसमर्पितेन बलिनाम्भस्तर्पणेनान्त्यगे**
**बाधोक्तौम तु तदीश्वरे न च ततः प्रोक्तंत न किञ्चिद्व्ययेे।।**[14]

इत्युक्तौरीत्या यदि देवकोपकारकग्रहः लग्नभावे वर्तते तर्हि प्रतिबिम्बदानेन, द्वितीयभावे वर्तते चेत् जपेन, तृतीयभावे वर्तते चेत् पूजया, चतुर्थभावे वर्तते चेत् धामनिर्माणेन, पञ्चमभावे वर्तते चेत् सन्तर्पणेन, षष्ठभावे वर्तते चेत् प्रतिकारबल्या, सप्तमभावे वर्तते चेत् नृत्तसेवया, अष्टमभावे वर्तते चेत् बल्या, नवलभावे वर्तते चेत् देवोपासनया, दशमभावे वर्तते चेत् दन्तिस्कन्धसमर्पितेन बलिना, एकादशभावे वर्तते चेत् अम्भस्तर्पणेन च देवकोपस्योपशमनं भवति। किन्तु द्वादशभावे देवकोपकारकग्रहः वर्तते चेत् द्वादशभावस्य बाधाभावात् प्रायश्चित्तस्य आवश्यकता एव नास्ति। अतः द्वादशस्थदेवकोपकारकग्रहस्य किञ्चिदपि प्रायश्चित्तं नोक्तम् इति प्रश्नमार्गकारस्याभिप्रायः। देवकोपकारकग्रहभेदेनापि प्रायश्चित्तानि शास्त्रोषु कथितानि। तद्यथा –

**अर्के वार्कगृहस्थे वा विहगेऽनिष्टसंस्थिते।**
**देवाराधनमाधेयं पृच्छ्यं रोगोपशान्तये।।**
**चन्द्रे वा तद्गृहस्थे वा यवागूप्रतिपादनम्।**
**शङ्खाभिषेकधाराद्यमपि देवे विधीयताम्।।**
**देवे दीपसमर्पणं च हवनं भौमे च तत्क्षेत्रगे**
**चान्द्रे तद्गृहगे च नृत्तकरणं जीवे च तत्क्षेत्रगे।**
**कर्तव्यं द्विजभोजनं च वितरेद्देवाय हेमादिकं**
**शुक्रे तद्गृहगे च रोगशमनायान्नं प्रदेयं बहु।।**
**मन्दे मन्दगृहस्थे वा विहगेऽनिष्टसंस्थिते।**
**नीचानामन्नदानं स्याद्भूदानं चार्तिशान्तये।।**[15] इति।

देवकोपकारकग्रहः अर्कश्चेत् अथवा अर्कगृहस्थश्चेत् देवकोपवशात् सञ्जातस्य रोगस्य शान्तये देवताराधनं कुर्यात्। देवकोपकारकग्रहः चन्द्रश्चेत् अथवा चन्द्रगृहस्थश्चेत् यवागूप्रतिपादनं, देवे शङ्खाभिषेकधाराद्यं च विधेयम्। देवकोपकारकग्रहः कुजश्चेत् अथवा कुजगृहस्थश्चेत् देवे दीपसमर्पणं हवनं च विधेयम्। देवकोपकारकग्रहः बुधश्चेत् अथवा बुधगृहस्थश्चेत् नृत्तकरणेन देवकोपशान्तिर्भवति। देवकोपकारकग्रहः

14. प्रश्नमार्गः – पञ्चदशोऽध्यायः – श्लोकः 14
15. प्रश्नमार्गः – पञ्चदशोऽध्यायः –15,16,17,18 श्लोकाः

गुरुश्चेत् अथवा गुरुगृहस्थश्चेत् द्विजभोजनेन, होमादिना च देवकोपोपशमनं भवति। देवकोपकारकग्रहः शुक्रश्चेत् अथवा शुक्रगृहस्थश्चेत् देवकोपोत्थरोगशमनाय बहु अन्नदानं कर्तव्यम्। देवकोपकारकग्रहः शनिश्चेत् अथवा शनिगृहस्थश्चेत् देवकोपोत्थार्ति-शान्तये नीचानामन्नदानं भूदानं च कुर्यात्।

**लग्नस्थेषु स सत्सु इनादिषु वदेत्तद्देवतानुग्रहं**
**प्रष्टघ्णामथ बाधकालयगते धर्माधिपे प्राक्चिरम्।**
**यत्किञ्जित्समुपास्य दैवतममुष्योपेक्षया साम्प्रतं**
**तत्कोपोऽस्ति भजेत दैवतमदो भद्रार्थमित्यादिशेत्॥**[16]

इत्युक्तिरीत्या प्रश्नेत आरूढलग्ने रव्यादिषु ग्रहेषु यस्य ग्रहस्य शुभयोगः वर्तते तस्य ग्रहस्य सम्बन्धिनः देवताविशेषस्य अनुग्रहः प्रच्छकस्य अस्तीति वदेत्। धर्माधिपे बाधकालयगते सति प्रागाराधितदेवस्य पूजादीनां लोपेन अर्थात् प्रच्छकस्य पूर्वजैः परम्परानुगतं देवतानां याः पूजादयः कृताः आसन् तासां पूजादीनां स्थगनेन देवानां कोपः सञ्जातः, पुनः ताः पूजादिकाः यदि क्रियन्ते तर्हि देवतानुग्रहः प्राप्यते इति वदेत्।

**बाधकाद्यहितस्थाननाथे लाभार्थगे गृहे।**
**तत्तद्दैवतकोपस्स्याद्देवस्वस्यापहारतः॥**[17]

इत्युक्तोरीत्या बाधाधीशः अनिष्टस्थाननास्थश्च लाभे (11) अर्थगे (2) वा भवति चेत् देवस्वापहारात् अर्थात् देवालयसम्बन्धिद्रव्याणाम् अपहरणेन देवकोपः सञ्जातः इति वदेत्। कीदृशस्य देवस्वस्य अपहारेण देवकोपः सञ्जातः इति प्रश्नवलग्नराशेः प्रश्नलग्नस्थग्रहस्य च धातु-मूल-जीवभेदेन चिन्तयेत्। तद्यथा -

**चन्द्राराह्वसिताः सूर्यशुक्रौ ज्ञार्यौ चरादयः।**
**धातुर्मूलं च जीवश्च क्रमेण ग्रहराशयः॥**[18]

इत्युक्तवरीत्या चन्द्र-कुज-राहु-शनयः धातुकारकाः ग्रहाः। सूर्यशुक्रौ मूलकारकौ ग्रहौ। बुधगुरू जीवकारकौ ग्रहौ। तथा चर-स्थिर-द्विस्वभावराशयः क्रमेण धातु-मूल-जीवकारकग्रहाः। ग्रहाणां राशीनां च धातु-मूल-जीवकारकत्वचिन्तने एषः सर्वसम्मतपक्षः। तत्र केषाञ्चित्पक्षे एवं वर्तेते -

**चन्द्रारोरगसौरैर्धातुर्मूलं किलार्कशुक्राभ्याम्।**
**जीवो जीवबुधाभ्यां मेषाश्विन्यादिधात्वादि॥**[19]

---

16. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 19
17. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 20
18. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 24
19. प्रश्नमार्गः - पञ्चदशोऽध्यायः - श्लोकः 25

इत्युक्तारीत्या चन्द्र–कुज–राहु–शनयः धातुकारकाः, अर्कशुक्रौ मूलकारकौ, जीवबुधौ जीवकारकौ। तथा मेष–अश्विन्यादिभिः क्रमेण धातु–मूल–जीवाश्चिन्त्याः इति केचन वदन्ति। तथा –

**जीवो जीवेन वाच्यः क्षितिसुतफणिनौ धातुदौ सर्वपक्षे**
**धातुर्मूलं विकल्पाद्रविरवितनयौ द्वौ च धत्तो द्वयं च।**
**जीवो मूलं च तद्वद् बुधभृगुतनयौ धातुजीवौ शशाङ्को**
**धातुर्मूलं च जीवः क्रमश इहमता राशयो वै चराद्याः।।**[20]

इत्युक्तलरीत्या अन्ये केचन जीवः जीवकारकः, कुजराहू धातुदौ, रविशन्योः विकल्पेन धातु–मूलयोः कारकत्वं, जीवः मूलकारकः, बुधशुक्रयोः विकल्पेन धातु–जीवयोः कारकत्वं, शशाङ्कस्य धातुकारकत्वं, जीवस्य मूलकारकत्वं, चर–स्थिर–द्विस्वभावराशीनां क्रमेण धातु–मूल–जीवकारकत्वम् इति वदन्ति। एवं ग्रहाणां राशीनां च धातु–मूल–जीवकारकत्वनिर्णयः।

**हेतुर्धातुरुदाहृतश्चरगृहे धातुग्रहेवोदिते**
**मूलं मूलखगे स्थिरे द्वितनुभे जीवश्च जीवग्रहे।**
**मूलं भूमिमहीरुहाद्यमुदितं हेमादयो धातवो**
**जीवामर्त्यचतुष्पदप्रभृतयो राशेः समानाश्च ते।**
**जीवे हेतौ त्वात्मना कल्पितानां पश्चादीनामीश्वरस्य प्रदानात्।**
**कोपो देवस्यापहृत्याऽथवैषां जीवार्थं वागर्पितानर्पणाद्वा।।**
**धातौ हेतौ देयहेमाद्यदानात् स्वीकाराद्वा देवसम्बन्धिनोऽस्य।**
**मूले हेतौ भूमिधान्यादिकानां कोपो देवस्यापहाराद्यवद्यैः।।**[21]

इत्युक्तौरीत्या प्रश्नोलग्नं चरराशौ भवति चेत् अथवा धातुग्रहः प्रश्नलग्ने भवति चेत् देवालयसम्बन्धिनः धातुद्रव्यस्य अपहारेण देवकोपः सञ्जातः इति वदेत्। प्रश्न लग्नं स्थिरराशौ भवति चेत् अथवा मूलग्रहः प्रश्नोलग्ने भवति चेत् देवालयसम्बन्धिनः मूलद्रव्यस्य अपहारेण देवकोपः सञ्जातः इति वदेत्। प्रश्न लग्नम् उभयराशौ भवति चेत् अथवा जीवग्रहःप्रश्न लग्ने भवति चेत् देवालयसम्बन्धिनः जीवद्रव्यस्य अपहारेण देवकोपः सञ्जातः इति वदेत्। भूमि–वृक्षादीनि मूलद्रव्याणि। हेमादयः धातुद्रव्याणि। मर्त्य–चतुष्पदप्रभृतयः जीवाः। यदि जीवद्रव्यापहारेण देवकोपः सञ्जातः इति प्रश्नोन ज्ञायते तर्हि देवालये पशु–गवादीनां समर्पणस्य प्रतिज्ञां कृत्वा असमर्पणेन अथवा देवालयसम्बन्धिनां गवादीनामपहरणेन देवकोपः सञ्जातः इति

20. प्रश्नमार्गः – पञ्चदशोऽध्यायः – श्लोकः 26
21. प्रश्नमार्गः – पञ्चदशोध्यायः – श्लोकः 21

वदेत्। धातुद्रव्यापहारेण देवकोपः सञ्जातः इति प्रश्ने न ज्ञायते चेत् देवालये हेमादिधातूनां समर्पणस्य प्रतिज्ञां कृत्वा अनर्पणेन अथवा देवालयसम्बन्धिधातुद्रव्याणाम-पहरणेन देवकोपः सञ्जातः इति वदेत्। मूलद्रव्यापहारेण देवकोपः सञ्जातः इति प्रश्नेन ज्ञायते चेत् देवालये भूमि-वृक्षादीनां समर्पणस्य प्रतिज्ञां कृत्वा असमर्पणेन अथवा देवालयसम्बन्धिनां भूमि-वृक्षादीनामपहरणेन देवकोपः सञ्जातः इति वदेत्। तत्तद्रव्याणाम् अर्पणेन देवस्वापहारदोषस्य वारणं भूत्वा देवतानुग्रहः प्राप्यते इति वदेत्।

## परिणामः चर्चा च -

कैः कैः हेतुभिः देवकोपः समुद्भूयते तथैव रव्यादिभिः ग्रहैः के के देवताः चिन्तनीयाः इति स्थूलरूपेण अस्मिन्शोधपत्त्रे निरूपितम्। अस्य शोधपत्त्रस्यपठनेन देवकोपचिन्तनक्रमः अवगम्यते। एवमेव देवकोपस्य कारणं किम्? तस्योपशमनार्थकानि प्रायश्चित्तानि कार्याणीत्यस्य ज्ञानमपि अस्यशोध पत्रस्यावलोकनेन लप्स्यते। देवकोपः बाधासमूहेषु प्रमुखः भवति। अत एव प्रश्नममार्गग्रन्थे सर्वप्रथमं देवकोपविमर्शनं कृत्वा ततः परम् अन्यासां बाधानां विषये प्रतिपादितमस्ति। देवकोपप्रभृतीनां बाधानां विषये जातकग्रन्थेषु उल्लेखः न दृश्यते। केवलं होरास्कन्धस्य प्रश्नवशास्त्र विभागे एव देवकोपप्रभृतीनां बाधानां विषये उल्लेखः दृश्यते। प्रश्नहग्रन्थेषु प्रश्नपमार्गग्रन्थः प्रसिद्धोऽस्ति। केरल-कर्णाटक-आन्ध्रप्रदेशराज्येषु प्रश्नसशास्त्र विषये अस्यैव ग्रन्थस्य अध्ययनमध्यापनञ्च प्रचलति। प्रश्निमार्गग्रन्थस्य रचनातः प्राक् अनेके प्रश्न ग्रन्थाः आसन्, तेषु ग्रन्थेषु प्रतिपादिताः विचाराः सङ्ग्रहरूपेण प्रश्नशमार्गग्रन्थे प्रतिपादितास्सन्ति। एवं देवकोपविषयेऽपि पूर्वाचार्याणां मतानुसारेण प्रश्नरमार्गकारेण चर्चा कृता अस्ति। भविष्यकाले अस्माभिः अन्येषामपि प्रश्नाग्रन्थानाम् आधारेणापि शोधपर्त्तिरचनायाः प्रयासः करिष्यते।

## सन्दर्भग्रन्थसूची


1. इटक्काट्नम्पूतिरिः, प्रश्नमार्गः - प्रथमोभागः, व्याख्या - सुरकान्तझा, चौखम्बासंस्कृतसीरीजआफिस - वाराणसी।
2. इटक्काट्नम्पूतिरिः, प्रश्नमार्गः - द्वितीयोभागः, व्याख्या - सुरकान्तझा, चौखम्बासंस्कृतसीरीजआफिस - वाराणसी।
3. वराहमिहिरः, (2013), बृहज्जातकम्, व्याख्या - केदारदत्तजोशी, मोतीलाल बनारसीदास - वाराणसी।

4. वराहमिहिरः, (2014), बृहत्संहिता-प्रथमोभागः, व्याख्या - अच्युतानन्दझा, चौखम्बाविद्याभवनम् - वाराणसी।

5. वराहमिहिरः, (2014), बृहत्संहिता - द्वितीयोभागः, व्याख्या- अच्युतानन्दझा, चौखम्बाविद्याभवनम् - वाराणसी।

6. मन्त्रेश्वरः, (2015), फलदीपिका, व्याख्या - हरिशङ्करपाठकः, चौखम्बा सुरभारती प्रकाशनम् - वाराणसी।

7. नारायणभट्टः, (2007), चमत्कारचिन्तामणिः, व्याख्या - रमाशङ्करत्रिपाठी, चौखम्भाओरियन्टालिया - दिल्ली।

8. लोकमणिदाहालः, भारतीयज्योतिषशास्त्रस्येतिहासः (A History of Indian Astrology), चौखम्बासुरभारतीप्रकाशनम् - वाराणसी।

9. सुधाकरद्विवेदी, (2002), गणकतरङ्गिणी, सम्पादनम् - भारतभूषणमिश्रः, शिवसंस्कृतसंस्थानम् - वाराणसी।

10. वैद्यनाथः, (2009), जातकपारिजातः - प्रथमोभागः, व्याख्या - सत्येन्द्रमिश्रः, चौखम्बासंस्कृतसीरीजआफीस - वाराणसी।

11. वैद्यनाथः, (2009), जातकपारिजातः - द्वितीयोभागः, व्याख्या -सत्येन्द्रमिश्रः, चौखम्बासंस्कृतसीरीजआफीस - वाराणसी।

12. रामदैवज्ञः, (2015), मुहूर्तचिन्तामणिः, व्याख्या - गोविन्ददैवज्ञः, चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी।

✦✦✦

 ISSN : 0975-1769

# विविधशास्त्रदृशा उपसर्गपदार्थसमीक्षणं तदनुप्रयोगश्च

-डॉ. बिपिनकुमारझाः*
-डॉ. दीपिकादीक्षितः**

शोधसारः- संस्कृतवाङ्मये विद्यमानानां वैदिकलौकिकशब्दानां साधुत्वसम्पादनाय व्याकरणमिव निरुक्तमप्यतीव महत्त्वपूर्णं स्थानं भजते इति सार्वजनीनमेतत्। निरुक्तकारो यास्कोऽपि पाणिनीयव्याकरणशास्त्रप्रक्रियामाध्यमेन निष्पन्नानां साधुशब्दानां निर्वचनमकरोत्। तत्सन्दर्भे तेषां वैदिकलौकिकसाधुपदानां निर्वचनाय यास्केन नामाख्यातोपसर्गनिपाताः स्वीकृताः। तत्र उपसर्गो नाम कः, तस्यार्थः कः, तस्य व्युत्पत्तिः का, धातोः पूर्वं तस्य प्रयोगे किं कारणम्? उपसर्गार्थस्य धात्वर्थेन सह कथमन्वयः? उपसर्गेण योगे धातूनामर्थवैपरीत्यं उपसर्गमाध्यमेन अवग्रहप्रग्रहादिरूपो वैदिकविचारः ततो नव्यनैयायिक-मीमांसकादिमतनिराकरणपूर्वकं व्याकरणशास्त्रदृशा उपसर्गाणां द्योतकत्वसमर्थन-मित्यादिविषयान् अत्र समीक्षात्मकानुसन्धानमाध्यमेन सांगोपाङ्गं प्रस्तूयते।

**शोधपद्धतिः**

प्रकृतशोधे व्याख्यात्मक-विश्लेषणात्मशोधपद्धतीनां प्रयोगः कृतः, किमर्थमिति चेत् अत्र उपसर्गपदार्थव्याख्या तद्विश्लेषणं चास्त्यत्र।

**प्रमुखशब्दाः**-पाणिनीयव्याकरणम्, उपसर्गाः, निर्वचनम्, दार्शनिकप्रस्थानानि, शब्दसाधुत्वम्।

उपसर्गाः क्रियायोगे[1] इति सूत्रव्याख्यानावसरे वैय्याकरणासिद्धान्तकौमुद्यां पाणिनिना क्रियार्थवाचकधातुशब्दयोगे पूर्वेषां प्रादीनामुपसर्गसंज्ञा विहिता। उपपूर्वकसृज्धातोः हलश्च इति सूत्रेण घञि प्रत्यये ञकारस्य हलन्त्यमिति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य लोपे उप सृज् अ इति स्थिते पुगन्त लघूपधस्य च इति सूत्रेण सृज् धातोरवयवस्योपधा भूतस्य ऋकारस्य गुणे अकारादेशे रेफस्थानिकत्वात् रपरत्वे

---

* सहायकाचार्यः, संस्कृतम्, बाबासाहेब-भीमराव-अम्बेडकर-केन्द्रीयविश्वविद्यालयः, लखनऊ।

** सहायकाचार्यः, हिन्दू-अध्ययनम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली।

1. पा. सू. 1/4/8

उपसर्ग अ इति स्थिते चजोः कुघिण्यतोः[2] इति सूत्रेण जकारस्य कुत्वे गकारादेशे उपसर्गशब्दो निष्पन्नः।

भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्याम् उपसर्गाः क्रियायोगे[3] इति सूत्रार्थव्याख्यानावसरे द्वाविंशति उपसर्गाः प्रदर्शिताः ते च- प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते उपसर्गाः भवन्ति। एतेषामुपसर्गाणां क्रियायोगे उपसर्गसंज्ञा विधीयते। उपसर्गाणां लौकिकसाधुशब्दत्वप्रतिपादनं यथा-ष्ठाधातुः गतिनिवृत्त्यर्थः। गतिः नाम गमनक्रिया। यत्र लौकिकशब्दोदाहरणे ष्ठाधातोः पूर्वं प्रेत्युपसर्गः प्रयुज्यते तत्र धातोः प्रकर्षार्थम् उपसर्गः प्रयुज्यते। तद्यथा रघुवंशमहाकाव्ये रघुमहाराजस्य विजययात्रावर्णनसन्दर्भे कालिदासः चतुर्थसर्गे इत्थं श्लोकं प्रणिनाय-

**ततःप्रतस्थेकौबेरींभास्वानिवरघुर्दिशम्।**
**शरैरुस्त्रैरिवोदीच्यानुद्धरिष्यन्रसानिव।।[4]**

अस्य श्लोकस्य अयमर्थः- यथा मध्यन्दिनमार्तण्डभानुतेजः प्रतापानलाविष्ट-महानर्कः सूर्यः नदीजलानि स्वकीयोष्णप्रतापकिरणैः महता पराक्रमेणोद्धरति तथैव रघुमहाराजः चतसृषु दिशासु मध्ये तिस्रो दिशा विजयीकृत्य स्वकीयविजयध्वजप्रशस्ति-प्राप्तये युद्धाय कृतनिश्चयः सन् कौबेरीमीशान्यदिशां प्रतस्थे (जगाम) इति। अत्र श्लोके प्रतस्थे इति क्रियापदम्। तस्मिन् पदे प्र इत्युपसर्गः तस्थे इति लिटि प्रथमपुरुषैकवचनम्। तस्थे इत्यत्र स्था धातोः गतिरर्थः। गतिर्नाम गमनक्रियाश्रया। प्रकृते प्र इति उपसर्गस्य तस्थे इति क्रियावाचकतिङ्न्तेन योगे रघुः प्रकृष्टगमनक्रियाक्रमः संजातः इत्यर्थः फलति। तथा च स्थाधातोः विद्यमानस्य गमनक्रियारूपस्यार्थस्य प्रकर्षगमनक्रिपारूपत्वमुपसर्गवशादेव जायते इति कृत्वा उपसर्गाणां क्रियायोगत्वं सिध्यति। अत्र प्रतस्थे इति पदे तस्थे इति पदस्यैव विशेषगमनाक्रियाश्रयो रघुः इत्यर्थो लभ्यते। तमेवार्थं प्रेत्युपसर्गो द्योतयति। अतः उपसर्गो विशेषक्रियाद्योतको जायते।

एवमेव किरातार्जुनीयप्रथमसर्गे महाकविना भारविणा अयं श्लोकः लिखितः। स च इत्थम्-

**कृतप्रणामस्य महीं महीभुजे,**
**जितां सपत्नेन निवेदयिष्यतः।**

---

2. तत्रैव 7/352
3. तत्रैव 1/4/58
4. रघु. 4/66

**न विव्यथे तस्य मनो न हि प्रियं,**
**प्रवक्तुमिच्छन्ति मृषा हितैषिणः।**[5]

अस्य श्लोकस्यायमर्थः-पाण्डवानां वनवासकाले दुर्योधनस्य युवराजस्य परिपालनं कथम् अस्तीति विषये जनास्तं दुर्योधनं किं चिन्तयन्तीति विज्ञातुं युधिष्ठिरः एकं वनेचरं गुप्तचररूपेण प्रेषयामास। ततो गच्छति काले सः वनेचरः हस्तिनापुरं गत्वा तत्रत्यं सर्वं वृत्तान्तं विदित्वा द्वैतवनं प्रत्यागत्य युधिष्ठिरमुद्दिश्यैवमुवाच-हे राजन्! हस्तिनापुरे युवराजदुर्योधनस्य प्रजापालनं कथमस्ति, सर्वे जनाः तं कथं चिन्तयन्तीति निवेदने तव मनः खिद्येत। यतोहि युवराजदुर्योधनः स्वराज्ये असम्बद्धान् भृत्यान् इव, भृत्यान् मित्राणीव, मित्राणि बन्धूनिव बन्धून् भ्रातृभगिन्य इव, भ्रातृनात्मन इव पश्यन् यथानियमं न्यायमार्गेण धर्मपद्धत्या राज्यपालनं करोति। एतच्छ्रावयितुं मे मनः संकुचितं भवति। अथापि हितैषिणो नीतिकोविदाः असत्यवचनेन स्वकीयराजानं न वञ्चयन्ति। अतः सत्यवार्तां श्रावयितुं मे मनः न विव्यथे इति युधिष्ठिरं प्रति वनेचरो निवेदितवान्।

अस्मिन् श्लोके न विव्यथे तस्य इति श्लोकस्य द्वितीयचरणे विव्यथे इति तिङन्तपदे वि इत्युपसर्गार्थस्य व्यथधातुवाच्यव्यथक्रियायामन्वयः। अथापि केवल-व्यथधातोरेव विशेषव्यथेत्यर्थः वि इत्युपसर्गः तादृशविशेषव्यथायाः द्योतको भवति। एवं रीत्या संस्कृतवाङ्मये लौकिकशब्दानां साधुत्वनिरूपणावसरे तत्रापि तिङन्तस्थले उपसर्गाणां तत्समभिव्याहृतधात्वर्थक्रियाविशेषकत्वद्योतनाय गवेषकेण मया स्थालीपुलाकन्यायेन द्वित्राणि उदाहरणान्यत्र प्रास्ताविषत।

एवमेव संस्कृतवाङ्मये वैदिकशब्दानां साधुत्वनिरूपणावसरे वेदेषु बहुत्र वैदिकतिङन्तकृदन्त-पदान्तर्भूतोपसर्गाणां द्योतकत्वं गवेषकेण मया स्थालीपुलाकन्यायेन मदीयशोधप्रबन्धे यथाशक्ति यथामति यथाशोधनियमं प्रस्तूयते। तथा हि- वेदेषु उपसर्गपूर्वकानि तिङन्तपदानि कृदन्तपदानि च बहुत्र वर्तन्ते। प्रस्तुतशोधप्रबन्ध-विस्तारभयादहं केवलं कृष्णयजुर्वेदे तैत्तरीयसंहितायाः कतिपयोपसर्गपूर्वतिङन्त-कृदन्तपदानि स्वीकृत्योपसर्गाणां द्योतकत्वमनुसन्दधे। तथा हि-

1. तैत्तरीयसंहितायाः प्रथमकाण्डे प्रथमाध्याये प्रत्युष्टं रक्षः इत्याद्यनुवाके आशासाना सौमनसं प्रजां सौभाग्यं तनूम्। अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम् इति मन्त्रो वर्तते। अस्य मन्त्रस्य विकृतिपाठकरणसमये सुकृताय कम् इत्यत्र पदपाठे सुकृतायेति सु कृताय इति पदपाठो वक्तव्यः। तत्र सुकृतायेति पदे सु इत्युपसर्गपूर्वकस्य कृ धातोः क्तप्रत्यये तस्य कृदन्तत्वेन प्रातिपदिकसंज्ञायां ततः चतुर्थ्येकवचनप्रत्यये तस्य ङेर्यः इति सूत्रेण यादेशे सुपि च इति

---

5. किरात.1/2

सूत्रेणादन्ताङ्गस्य दीर्घे सुकृतायेति पदं निष्पन्नम्। अस्मिन् पदे कृतम् इत्यस्यैव सुकृतमित्यर्थः। तमर्थं सु इत्युपसर्गो द्योतयति। अतः सु इत्युपसर्गः सुकृतमिति विशेषार्थद्योतकः।

2. एवमेव कृष्णयजुर्वेदे तैत्तरीसंहितायाः पञ्चमकाण्डे षष्ठाध्याये वैश्वकर्मणीर-होरात्राण्येवास्य प्राजापत्या यदुक्तथ्यं बिभर्ति प्राजापत्या एव तदुपधत्ते यत् समिध आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुपधत्ते इति मन्त्रो वर्तते। अस्मिन् मन्त्रे समिध आदधाति इत्यत्र पदपाठे समिधः इति पदस्य समिध इति सम् इधः। आदधातीत्याऽऽदधाति इति अवग्रहप्रग्रहादिकं वक्तव्यम्। अत्र आदधातीत्येकमेव पदम्। अत्र आ इत्युपसर्गः। दधातीति तिङन्तपदम्। जुहोत्यादिप्रकरणस्थस्य डुधाञधारणपोषणयोरिति धातोः लटि प्रथमपुरुषैकवचने तिबादिकार्येषु कृतेषु आदधाति इति पदं निष्पन्नम्। अत्र धाधातोरेव आदधानमित्यर्थः। तादृशमादधानरुपं विशेषार्थमा इत्युपसर्गो द्योतयति। एवमेव श्रीकृष्णयजुर्वेदे तैत्तरीयसंहितायां चतुर्थे काण्डे प्रथमाध्याये यस्य प्रयाणमन्वन्य इद्ययुर्देवादेवस्य महिमानमर्चतः इति मन्त्रो वर्तते।

अस्मिन् मन्त्रे प्रयाणम् इति प्रग्रहात्मकं पदम्। यतो हि अत्र प्र इत्युपसर्गपूर्वकस्य या धातोः ल्युडिति कृत्प्रत्यये कृते लकारेकारटकाराणां इत्संज्ञालोपयोः कृतयोः प्रया य् इति स्थिते ल्युट्प्रत्ययावयास्य यकारस्य युवोरनाकौ इति सूत्रेण अनादेशे नकारस्य णत्वे प्रयाणमिति पदं निष्पन्नम्। अस्य पदस्य पदपाठे प्रयाणमिति प्र यानम् इति उच्चारणं कर्तव्यम्। अत्र याधातुप्रकृतिककृदन्तस्य यानम् इत्यस्यैव प्रयाणमित्यर्थः। तत्र प्रेत्युपसर्गः प्रयाणरूपविशेषार्थद्योतकः।

3. एवमेव श्रीकृष्णयजुर्वेदे तैत्तरीयसंहितायाः सप्तमकाण्डे प्रथमाध्याये प्रथममन्त्रः इत्थं वर्तते- प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट्छन्दसां ज्योतिर्विराड्वाचोग्नौ सन्तिष्ठते इति। अत्र पदपाठे प्रजननम् इति पदस्य प्रजननमिति प्र जननम् इति उच्चारणं कर्तव्यम्। अस्मिन् पदे प्र इत्युपसर्गः। तादृशोपसर्गपूर्वकः जनीप्रादुर्भावे इति धातोः ल्युट्-प्रत्यये लकारोकारटकाराणामित्संज्ञालोपयोः कृतयोः केवलस्य यकारस्य युवोरनाकौ इति सूत्रेण अनादेशे प्रजनन इति कृदन्तप्रातिपदिकात् विशिष्टात् सुपि विभक्तिकार्ये प्रजननमिति पदं निष्पद्यते। अत्र केवल जनधातोरेव प्रकर्षेण जननमिति विशेषार्थः। प्र इत्युपसर्गः तादृशविशेषार्थस्य द्योतकः।

एवं संस्कृतवाङ्मये वैदिकलौकिकशब्दानां साधुत्वनिरूपणसन्दर्भे वैदिकशब्देषु वैदिकतिङन्तकृदन्तपदानां साधुत्वनिर्णये उपसर्गार्णां द्योतकत्वमेव तथा लौकिक-शब्देष्वपि उपसर्गाणां द्योकत्वमेवेति व्याकरणशास्त्रीयनियमानुसारं तथा निरुक्तग्रन्थ-

नियमानुसारं चात्र निरूपितम्। एवं च वैदिकलौकिकशब्देषु यत्र क्वापि सोपसर्गधातवो वर्तन्ते तत्र सर्वत्राप्युपसर्गाणां द्योतकत्वमेव, न तु वाचकत्वमिति व्याकरणशास्त्रीय-मुख्यसिद्धान्तः अत्र साङ्गोपाङ्गं विवेचितः। इतः परं नव्यनैयायिकमीमांसकादि-दर्शनान्तरीयमतानुसारमुपसर्गाणां द्योतकत्ववाचकत्वविचारोत्र प्रस्तूयते। तथा हि-

### नैय्यायिकमतनिरूपणम्

संस्कृतवाङ्मये वैदिकलौकिकशब्दाः विराजन्ते। तेषु ये तिङन्तकृदन्तशब्दाः वर्तन्ते तेषु उपसर्गाणां निपातानां च धातुत्वेन सह सम्बन्धो भवति। तदा धातुरेव उपसर्गविशिष्टधात्वर्थं बोधयति तथा निपातस्थलेऽपि धातुरेव निपातविशिष्टधात्वर्थं बोधयति। तथा चात्र प्रपरा-इत्याद्युपसर्गाणां तथा च वै तु हि इत्यादि निपातानामपि द्योतकत्वमेव भासते। एवं स्थिते उपसर्गाणां निपातानां च द्योतकत्वमुत वाचकत्वमिति सन्देहे जाते नैय्यायिकादयः प्रपरा-इत्याद्युपसर्गाणां द्योतकत्वं च वै तु हि इत्यादिनिपातानां वाचकत्वमेवेति वदन्ति। अयमत्र नैय्यायिकमतसारांशः- प्रपरेत्याद्युपसर्गाणां द्योतकत्वं, तदितरचादिनिपातानां वाचकत्वम्। निपातानां वाचकत्वादेव साक्षात्प्रत्यक्षतुल्ययोः इति कोशग्रन्थः सङ्गच्छते।

### नैय्यायिकमतनिराकरणम्

वैदिकलौकिकशब्देषु तथा काव्यादिषु च ये निपाताः प्रयुज्यन्ते तेषां किं प्रयोजनमिति विचारे दोषप्रकरणे सप्तदशदोषेषु निरर्थकत्वदोषः एको वर्तते। किं नाम निरर्थकत्वमिति चेत् उच्यते-पादपूरणमात्रं यत् तन्निरर्थकमुच्यते। यथा रामो दाशरथिः श्रीमान् च वै तु हि च वै तु हि इत्यत्र रामो दाशरथिः श्रीमान् इति पदत्रयेणैव शाब्दबोधे जाते च वै तु हि इति निपातानां प्रयोगः किमर्थमिति चेत् अनुष्टुपच्छन्दो नियमानुसारं च वै तु हि इत्यादिनिपातानामप्रयोगे श्लोके पादपूरणं न स्यात्। अतः पादपूरणार्थं निपाताः प्रयुज्यन्ते। अत्र उपसर्गस्थले द्योत्ये एव उपसर्गविशिष्टार्थबोधकत्वात् उपसर्गाणां द्योतकत्वमस्तु। परन्तु निपातस्थले निपातविशिष्टसुबन्ततिङन्तपदार्थ-बोधकत्वस्यानुभवविरुद्धत्वात् निपातानां पृथगर्थबोधकत्वस्यानिवार्यत्वेन निपातानां वाचकत्वमेव। एवं च प्रपरा-इत्याद्युपसर्गाणां द्योतकत्वं चादीनां निपातानां वाचकत्वमेवेति नैयायिकानां मतम्।

### समीक्षा

एतावता प्रबन्धेनोपसर्गाणां तथा निपातानां[6] च द्योतकत्वमुत वाचकत्वमिति महत्संदेहे जाते नैय्यायिकादिभिः स्वकपोलकल्पितप्रमाणेन उपसर्गाणां द्योतकत्वमेव

---

6. उच्चावचेष्वर्थेषु निपतन्तीति निपाताः।

निपातानां वाचकत्वमेव इति स्वमतं प्रतिष्ठापितम्। एवं स्थिते कौण्डभट्टादयः प्राचीनवैय्याकरणाः उपसर्गाणामिव निपातानामपि द्योतकत्वं वाचकत्वं वा अस्तु पक्षद्वयेऽपि युक्तिसाम्यात् इत्यामनन्ति। तथा च प्राचीनवैय्याकरणानां मतानुसारमुपसर्गाणां निपातानां च वाचकत्वमेव स्वीकार्यमथवा उपसर्गाणां निपातानां च द्योतकत्वमेव स्वीकार्यम्। परन्तु प्रादीनामुपसर्गाणां द्योतकत्वमेव चादीनां निपातानां वाचकत्वमेवेति नैय्यायिकानां मतमयुक्तम्। तथा वैषम्ये बीजाभावात्। अन्ततः पर्यालोच्यमाने च वै इत्यादिनिपातानां द्योतकत्वमेव न्याय्यम्। यदि तेषां निपातानां वाचकत्वमङ्गीक्रियते तदा नामार्थधात्वर्थयोः भेदेन साक्षादन्वयस्यासंभवात् निपातार्थधात्वर्थयोः साक्षात् भेदेनान्वयोऽव्युत्पन्नः इति व्युत्पत्तिविरोधो नैय्यायिकानामपरिहार्यः स्यात्। निपातामपि द्वोतकत्वे नैय्यायिकानां पूर्वोक्तव्युत्पत्तिविरोधो न प्रसज्यते। अतः उपसर्गाणामिव निपातानामपि द्योतकत्वमेव नव्यनैय्यायिकमीमांसकादिभि-रप्यगत्या स्वीकार्यमेव। अत एव देवाय नमः इत्यादौ नमश्शब्दस्य नमस्कारार्थे, पूजार्थे च प्रसिद्धिस्सङ्गच्छते। न च निपातानां वाचकत्वे साक्षात्क्रियते गुरुः इत्यादौ कर्मणि लकारो न सिध्येत्। सकर्मकधातोरेव कर्मणि लकारविधानादत्र तु साक्षात्कारार्थे कृञ् धातोः सकर्मकत्वं नास्तीति चेदत्र स्वस्वामिव्याहृतनिपातान्यतरार्थफलशालित्वं सकर्मकत्वमिति लक्षणस्वीकारेण साक्षात्क्रियते गुरुः इत्यादौ कर्मणि लकारः सिध्यति। अतः उपसर्गाणां द्योतकत्वमेव निपातानां च वाचकत्वमेव इति नैय्यायिकानामाशयः। अन्यथा नामार्थधात्वर्थयोः साक्षात् भेदेन अन्वयः अव्युत्पन्नः इति व्युत्पत्तिविरोधापत्तेः। तस्याः इष्टत्वेऽपि तण्डुलः पचति इत्यत्रापि कर्मतया तण्डुलेन सह धात्वर्थे अन्वयापत्तिः।

किञ्च निपातानां वाचकत्वे प्र इति निपातस्यापि प्रकर्षार्थबोधकतया भूयान् प्रकर्षः इति प्रयोगवत् भूयान् प्र इति प्रयोगापत्तिः। एवं कीदृशो निश्चयः इतिवत् कीदृशो निर् इति प्रयोगापत्तिः। अपि च निपातानां वाचकत्वे षष्ट्यादिकं विना पूर्वपदार्थस्य उत्तरपदार्थे भेदेनान्वयः असंभवः स्यात्। तथैवान्वये तु राज्ञः पुरुषः इत्यत्र राजसंबन्ध्यभिन्नः पुरुषः इत्यर्थे राजसंबन्धवान् पुरुषः इति भेदबोधापत्तिः।

किञ्च नैयायिकमतानुसारं प्रौढ्या निपातानां वाचकत्वस्वीकारे शरैरुस्रैरिवोदी-च्यानुद्धरिष्यन् रसानिव इत्यत्र अन्वयो न स्यात्। तथाहि रघुवंशे चतुर्थ सर्गे अयं श्लोकः वर्तते-

**ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम्।**
**शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिव॥** (कालिदास, 1983)[7]

इति अत्र उदाहृतकालिदासपद्ये उस्रैः इति उपमा। शरैः इति उपमेयम्।

---

7. रघु. 4/66

इवार्थः सादृश्यम्। रसान् इति उपमा। उदीच्यान् इति उपमेयम्। इवार्थः सादृश्यम्। एवञ्चात्रोस्रसदृसैः शरैः रससदृशान् शत्रूनुद्धरिष्यन् रघुः भास्वानिव कौबेरीं दिशं जगामेति श्लोकार्थः।

निपातानां वाचकत्वस्यैव स्वीकारे प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पतिभङ्गापत्तिः। तथाहि– उस्रैः इत्यत्र विद्यमाना तृतीया करणे तृतीया। परन्तु तत्र उस्रः करणं न भवति। इवार्थस्य सादृश्यस्य करणत्वेऽपि तादृशकरणत्वम् उस्रपदोत्तरतृतीयया बोधयितुं न शक्यते अप्रकृत्यर्थत्वात्। उस्रैरित्यत्र तृतीयार्थकरणत्वस्य शरेषु अन्वयस्य असंभवात् नैयायिकानां तादृशव्युत्पत्तिविरोधापत्तिरपरिहार्या एव। इवशब्दस्य असत्त्वार्थकतया उस्रपदोत्तरं तृतीयाया विधानस्य असंभवाच्च। उपसर्गाणामिव निपातानामपि द्योतकत्वस्यैव स्वीकारे तु उस्रशब्दस्यैव उस्रसदृशार्थबोधकत्वेन अर्थाधिकरणनामार्थयोः साक्षात् भदेन अन्वयः अव्युत्पन्नः इति व्युत्पत्त्या उस्रसदृशाभिन्नैः शरैः रससदृशान् शत्रून् उद्धरिष्यन् रघुः कौबेरीं दिशं जगाम इति प्रकृतश्लोकार्थः संगच्छते।

अपि च उपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वमिति एतादृशवैषम्य-स्वीकारे प्रमाणाभावात्। अनुभूयते इत्यत्र अनुभवरूपधात्वर्थस्य अनु इत्युपसर्गो यथा द्योतको भवति तद्वदेव साक्षात्क्रियते गुरुः इत्यादावपि कृञ्धात्वर्थस्य साक्षात्कारस्य साक्षादिति निपातोऽपि द्योतक एव भवति। किञ्चानुभूयते इत्यादावनुभवादिफलस्य निपातवाच्यत्वे तस्यानुकूलरूपभेदसम्बन्धेनैव धात्वर्थव्यापारे अन्वयो वाच्यः। तथा चेत् नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयः अव्युत्पन्न इति व्युत्पत्तिभङ्गापत्तेः। तस्याः व्युत्पत्तेः निपातार्थेतरत्वेन सङ्कोचे प्रमाणाभावात्। अपि च साक्षात्क्रियते इत्यत्र साक्षात्कारस्य निपातार्थफलाश्रयत्वेऽपि तस्य क्रियान्वयं विना कारकत्वस्यासम्भवेन प्रकृते कर्मसंज्ञाया अप्राप्त्या कर्मणि लकारादीनां विधानस्यासम्भवापत्तेः। किञ्च निपातानां वाचकत्वस्यैव स्वीकारे घटं पटञ्च पश्य इत्यादौ घटमित्यस्य क्रियाया-मेवान्वयात् घटपदात् द्वितीयायां कृतायां घटसमुच्चयवन्तं पटं पश्य इति शाब्दबोधः फलति। एवञ्चास्मिन् वाक्ये समुच्चयस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वाद्घटस्यैव प्रतियोगित्वेन पटसमुच्चयस्याप्रतियोगित्वेन घटशब्दात् षष्ठीविभक्तिविधानं न स्यात्। अतो निपातानामप्युपसर्गाणामिव द्योतकत्वमेवाश्रयणीयम्। न च निपातानां द्योतकत्वे च, वै, तु, हि, साक्षादित्यादिनिपातानामर्थवत्त्वाभावेन अर्थवदधातुरप्रत्ययः प्रातिपदिकम्[8] इति सूत्रेण प्रातिपदिकसंज्ञायाः अप्राप्त्या च, वै, तु, हि इत्यादि निपातेभ्यः सु, औ, जस् इत्यादयः प्रत्ययाः नोत्पद्येरन्। निपातानां द्योतकत्वे तु द्योत्यार्थमादाय तेषामप्यर्थवत्त्वमूलकप्रातिपदिकत्वम्। ततः सुबादयश्च विधातुं शक्यन्ते। अब्राह्मणः

8. पा. सू. 1/2/45

इत्यादिसमासपदेषु विद्यमाननञादिनिपातानामपि द्योत्यार्थमादाय सुबादिविभक्तिविधानद्वारा तेषां साधुत्वं भवति। अब्राह्मणः इत्यादिसमासनिष्ठनञादिनिपातानामपि द्योतकत्वं सिध्यत्येव। नञादि निपातानामपि आरोपितार्थवत्त्वद्योतकत्वस्य स्वीकारादेव तस्मै इत्यादावपि, न सः असः, तस्मै इति विग्रहमाश्रित्य तत्रस्थस्य नञः अपि द्योत्यार्थत्व-स्वीकारादेव सर्वशब्दस्य सर्वादीनि सर्वनामानि इति सूत्रेण सर्वनामसंज्ञा, तन्मूलकः चतुर्थीविभक्त्येकवचनस्य ङे इति प्रत्ययस्य सर्वनाम्नः स्मै इति सूत्रेण स्मै आदेशश्च सिध्यति। पूर्वोक्तसिद्धान्तानाम्, विषयाणां च गवेषणानुसारमुपसर्गाणामिव सर्वेषां निपातानां द्योतकत्वमेव न तु वाचकत्वमथवा तेषां वाचकत्वस्वीकारेऽपि उपसर्गाणां द्योतकत्वमेव निपातानां वाचकत्वमेव इत्यादिमतनिराकरणपूर्वकमुपसर्गाणाम्, निपातानां च द्योतकत्वमेव, न तु वाचकत्वमथवा उपसर्गाणाम्, निपातानाञ्च वाचकत्वमेव न तु द्योतकत्वमिति प्रौढिवादमाध्यमेन प्रतिपादितं प्राचीनवैयाकरणमतमप्यप्रामाणिकमेव। यतो हि यथा एकैव पचाद्यर्थपाकक्रिया पाक इत्यादिस्थले सत्त्वभूततया, एवं पचतीत्यनेनासत्त्वभूततया अभिधीयते तद्वत् शब्दशक्तिस्वभावान्निपातानामपि नित्य-विशेषणतया भानस्य सर्वथा विरुद्धत्वात् चैत्रस्य पाक इत्यत्र चैत्रशब्दात् षष्ठीविभक्तिरपि न स्यात्। अतः पाणिनीयव्याकरणे मुनित्रयप्रणीतग्रन्थेषु तथा वैयाकरणभूषण-वैयाकरण-भूषणसार-परमलघुमञ्जूषा- वैयाकरणसिद्धान्तलघुमञ्जूषादि-बहुग्रन्थस्थविषयाणां तथा तत्तत्सम्बद्धग्रन्थस्थसिद्धान्तानाञ्च परिशोधनपूर्वकं यथाशक्ति यथामति मतान्तर-विमर्शात्मकसमीक्षापूर्वकमुपसर्गाणां निपातानाञ्च द्योतकत्वमेवेति सिद्धान्तो व्याकरण-महाभाष्यादिग्रन्थारुढ इति अनुसन्धानमकारि।

अत्र निपातानां द्योतकत्वरूपसिद्धान्तनिरूपणावसरे पृथक्तया निपातार्थ इति विचारशीर्षिका नैव स्थापिता। यतो हि वैयाकरणभूषणसारवैयाकरणसिद्धान्त-लघुमञ्जूषा-ग्रन्थयोः कौण्डभट्टनागेशाभ्यां प्रकरणविभागकाले अथ नामार्थनिर्णयः अथ निपातार्थनिर्णय इत्येव विभागो विहितः। उपसर्गनिपातार्थविचारास्सर्वेपि निपातार्थनिर्णये एव ताभ्यां कृताः। तद्दृष्ट्वा अत्र किञ्चिन्नूतनत्वप्रदर्शनाय तथा पूर्वोक्तग्रन्थकाराणां रीतिपरम्पराञ्चानुल्लङ्ध्य किञ्चिन्नावीन्यप्रदानपूर्वकं निपातार्थविचार इति पृथक् शीर्षिकमहं नैव प्रादर्शयम्। निपातार्थविचार इत्याकारकशीर्षिकाया अत्र पृथग्रूपेणा-विभाजनेऽपि निपातार्थसम्बद्धानामुपसर्गाणामिव निपातानां द्योतकत्वमेव न तु वाचकत्व-मित्यादयः गवेषणीयविषयास्तथा परिशोधिता। अन्योऽपि विषयोऽस्त्यत्र यत् उपसर्गाणां द्योतकत्वसिद्धान्तनिरूपणावसरे केवलधातोरेव उपसर्गविशिष्टधात्वर्थत्वमुपसर्गस्तत्र तादृशार्थद्योतकम् इति सप्रमाणं निरूपितम्। तथैव संस्कृतवाङ्मये विशेषस्थलेषु क्वचित् क्वचिदुपसर्गाणां संयोजनेन धातुरपि स्वकीयं धात्वर्थं परित्यज्य पृथगुपसर्ग-विशिष्टधात्वर्थं द्योतयति। तद्यथा हृञ्धातोः कर्मण्यण् इति सूत्रेणाणि, ततो हृ इत्यत्र ऋकारस्य अचो ञ्णिति इति सूत्रेण वृद्धौ, रेफस्थानिकत्वेन रपरत्वे च कृते हारः

इति पदं निष्पन्नम्। अस्य हारः इति पदस्य स्वर्णाभूषणमित्येव नैसर्गिकोऽर्थः। परन्तु तत्तदुपसर्गसंयोजनेन तादृशो हृञ् धातुरपि विपरीतार्थानां द्योतको भवति। तद्यथा हार-इत्यस्मात् पूर्वं प्रेत्युपसर्गयोजने प्रहार इति, आ इत्युपसर्गयोजने आहार इति समित्यपसर्गयोजने संहार इति वि इत्युपसर्गयोजने विहार इत्याकारकान् अनेकान् विरुद्धार्थान् बोधयत्युपसर्गः। उक्तञ्च वैयाकरणसिद्धान्तकौमुद्याम्-

**उपसर्गेणधात्वर्थोबलादन्यत्रनीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्॥** इति।

अत्रायं मुख्यो विषयः उपसर्गाणां वाचकद्योतकत्वादिविषये प्राचीननवीन-वैयाकरण-नैयायिकानामनेकविधमतभेदसत्त्वेऽपि तत्तदुपसर्गसंयोजनेन तत्तद्धातूनां तत्तद्विपरीतार्थ-बोधकत्वमप्यस्तीति मुख्यसिद्धान्तप्रतिष्ठापनावसरे तेषामैकमत्यमेवा-वच्छेदकावच्छेदेन वर्तत इति आशयः।

## सन्दर्भग्रन्थसूची ( APA अनुश्रित्य )

1. अथर्ववेद, भाष्यकारः श्रीपाद दामोदर सातवलेकर (1985), प्रकाशकः बसन्त श्रीपाद सातवलेकर, स्वाध्याय मण्डल, पारडी (जि. बलसाड), संस्करणः चतुर्थ।
2. अमरकोश, लेखकः अमरसिंह, सम्पादकः विश्वनाथ झा (1969), प्रकाशकः दिल्ली मोती लाल बनारसी दास, संस्करणः प्रथम।
3. अवस्थी, शिवशङ्कर (डॉ०), वाक्यपदीयम् - ब्रह्मकाण्ड (2010), चौखम्बा विद्याभवन, वाराणसी।
4. ऋग्वेद, भाष्यकारः श्रीपाद दामोदर सातवलेकर, प्रकाशकः बसन्त श्रीपाद सातवलेकर (1985), स्वाध्याय मण्डल, पारडी, (जि बलसाड), संस्करणः
5. जैमिनिसूत्रम्-2.1.46, श्रीबद्रीनारायणशास्त्री, सुरभि प्रकाशन, दिल्ली, पृ-103
6. द्विवेदी डॉ० कपिलदेव, अर्थविज्ञान और व्याकरणदर्शन, विश्वविद्यालय प्रकाशन, वाराणसी, 2008।
7. निरुक्त, लेखकः श्री यास्काचार्य (1982), प्रकाशकः मेहरचंद लच्छनमनदास, नई दिल्ली-110002।
8. पाणिनीय व्याकरण, सम्पादकः पण्डित हरिशङ्कर पाण्डेय (2006), प्रकाशकः शिवालिक प्रकाशन 27/16, शक्तिनगर, दिल्ली-7, संस्करणः
9. महाभाष्यम्-2.1.1, चौखम्भा कृष्णदास अकादमी, वाराणसी, पृष्ठ-63।
10. वर्णी डॉ० रामप्रकाश (2006), संस्कृत-व्याकरणदर्शन के विविध सोपान, परिमल पब्लिकेशन्स, दिल्ली।

 ISSN : 0975-1769

# श्रीमद्रामायणे त्रिजटास्वप्नवृत्तान्तः-एकमनुशीलनम्

- **पूर्णम वेङ्कटा नागा किशोर***

**प्रस्तावना**

सुविपुले संस्कृतवाङ्म्ये श्रीमद्रामायणं रचना शैल्या प्राञ्जलतया, सर्वेषां रसानां यथा स्थानम् उपन्यसात्, भाषया माधुर्यौजप्रसादगुणसमन्वितत्वेन अर्थगौरवेन, अलङ्काराणां सुनियोजनेन, विशिष्टत्वेन गाम्भीर्येण आदिकाव्यत्वेन चकास्ति।

आदिकाव्यतया इतिहासात्मना च प्रसिद्धे वाल्मीकि विरचिते श्रीमद्रामायणे, सुन्दरकाण्डे सप्तविंशतितमे सर्गे त्रिजटाख्यया वृद्धया राक्षस्या, सीतावशीकरणोपायता, नियुक्तानां राक्षसीनां मध्ये प्रस्तुतः स्वप्नवृत्तान्तः प्रमुखं स्थानं लभते।

सत्पविंशतितमे सर्गे एकपञ्चाशत् श्लोकाः वाल्मीकिना प्रकीर्तिताः। तेषु प्रथमं वर्णिताः नव श्लोकाः प्रस्तावनात्मकाः भवन्ति। अन्तिमः श्लोकस्तु सीतया राक्षसीनां विषये अभयदानरूपतया कथितः। मध्ये स्थिताः श्लोकास्सर्वे चत्वारिंशत् संख्याकाः, त्रिजटया अनुभूतं स्वप्नम् अधिकृत्य समुपवर्णितः। तस्य स्वप्नस्य फलव्याख्यारूपा अपि श्लोकाश्चत्वारिशत् श्लोकेषु अन्तर्भूताः दृश्यन्ते।

रावणप्रेरिताः राक्षस्य, बहुधा सीतां रावणस्य वंशे स्थापयितुं प्रयत्नम् अकार्षुः। परं सीता "अहं रावणस्य तृष्णां तर्पयितुं नेच्छामि, यदि अहम् अवशास्यां बलन्मरिष्यामि" -इति राक्षसीभ्यः प्रतिज्ञातवती। वृत्तान्तमिमं रावणाय निवेदयितुं काश्चन राक्षस्यः तत्समीपमगच्छन्। अवशिष्टाः घोरदर्शनाः राक्षस्यः सीतामुपागम्य दुस्सहैः वचोभिः पीडयन्ति।

**इत्युक्तास्सीतया घोरा राक्षस्यः क्रोधमूर्तिताः**
**काश्चिज्जग्मुस्तदाख्यातुं रावणस्य तपस्विनः॥**

**ततस्सीतामुपागम्य राक्षस्यो घोरदर्शनाः**
**पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन्॥**[1]

---

* एम.फिल्. (संस्कृत), बी.एड., शोध अध्येता, श्रीविश्वेश्वराविश्वविद्यालयः, तिरुपतिः।

1. रामायणे- सुन्दरकाण्डे-27 सर्गाः-1, 2

एवमनार्थाभिः निशाचरस्त्रीभिः संतर्जितां सीतां दृष्ट्वा०वृद्धा०त्रिजटा नाम राक्षसी स्वयं दृष्टं स्वप्नम् अन्यराक्षसीभ्यः कथयितुं प्रबुद्धसती स्वस्वप्नवृत्तान्तं प्रस्तुतवती।

केयं त्रिजटेति विचारणा- एषा विभीषणस्य दुहिता-इति रामायणस्य गोविन्दराजीये व्याख्याने परिदृश्यते। परं तिलकाख्ये व्याख्याने तु- वृद्ध पदव्याख्यान समये-धर्मे, योगे, ज्ञाने, वयसि च वरिष्ठा-इति कथनमुपलभ्यते। यस्मिन् कस्मिन्नपि समाजे समस्या समुद्रगमे, तत्र किं करणीयमिति विषये तद्विषयपरिज्ञानशालिनि वृद्धे निवेदनं सामान्यतया सूच्यते। अत्र तु स्वयं वृद्धा त्रिजटा राक्षसजातेः भयानकं, सीतायाः आमोदजनकं च स्वप्नमिति स्वयं निश्चित्य राक्षसीभ्यः निवेदयति।

त्रिजटा कथयति-अद्य मया दारुणः स्वप्न दृष्टः। स्वप्नोऽयं राक्षसविनाशम्, सीताभर्तुर्विजयं च सूचयति-इति। तन्निशभ्य क्रोधेन विवेकशून्या अपि भीताः राक्षस्यः सर्वाः मिलित्वा स्वप्नं कीदृशमिति कथयितुं त्रिजटां प्रार्थयामासुः। तन्निशम्य त्रिजटा उषः काले आत्मना दृष्टं स्वप्नं प्रति कथयितुमारेभे।

**"उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम्"**[1]

परं "काले" इति पदस्य गोविन्दराजीये तथा तिलकव्याख्यायां च उषक्काले इति व्याख्यानं सुस्पष्टं परिदृश्यते। तृतीये यामे दृष्टः स्वप्नः नूनं शुभमशुभं वा फलम् अवश्यं दास्यतीति स्वप्नशास्त्रे निश्चितमस्ति। तन्मनसि निधाय काले स्वप्नसंश्रितं वचनमुवाचेति-कविः प्राकटयत्।

श्वेतैः कुसुमैर्वस्त्रैश्च अलङ्कृतः श्रीरामः स्वभ्राता लक्ष्मणेन सहितः, हंससहस्त्रेण युक्ताम्, अन्तरिक्षयानशीलां दिव्यां शिबिकां गजदन्तमयीमारुह्य लङ्कानगरमुपयातः।

एवं शुक्लमाल्याम्बरधरा सीता सागरेणावृतं श्वेतं पर्वतमारुढा सती, यथा प्रभाभास्करमुपगच्छति तथा रामेण सङ्गता स्वप्ने परिदृष्टा।

तद्यथा-

**गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम्**
**युक्तं हंससहस्त्रेण स्वयमास्थाय राघवः।**
**शुक्लमाल्याम्बरधरो लक्ष्मणेन सहागतः॥**[2]

अत्र स्वप्नद्वयं वणितम्। प्रथमे स्वप्ने लक्ष्मणसहितस्य रामनस्य लङ्कानगरे समागमनमुपवर्णितम्। वृत्तान्तोऽयं सीतायाः परमानन्ददायकोऽस्ति। हंससहस्त्रयुक्तत्वं गजदन्तमयत्वं च स्वप्नशास्त्रे शुभफलदायकं वर्णितमस्ति।

---

1. रामायणे- सुन्दरकाण्डे-27 सर्गाः-9
2. रामायणे- सुन्दरकाण्डे-27 सर्गाः-10

**स्वप्नमध्ये पुमान्यश्च सिंहाश्वगजधेनुजैः**
**युक्तं रथं समारोहेत्सभवेत्पृथिवीपतिः**[1]

इति स्वप्नशास्त्रे वर्णितमस्ति।

ततश्चायं प्रथमः स्वप्नः सीतायाः अत्यन्तं शुभं फलं दिशति रामसङ्गमरूपम् इत्यत्र नास्ति सन्देहः। रामलक्ष्मणयोरागमनवर्णनात् प्रतिरोधकस्य शत्रुसमूहस्य विनाशोऽपि स्पष्टं व्यज्यते।

द्वितीये स्वप्ने सीतायाः शक्लमाल्याम्बरावृतत्वं, क्षीरसागरसंवृतस्तश्वेतपर्वतस्य अग्रभागे स्थितिः, रामेण सङ्गमश्च स्पष्टं वर्णितः।

स्वप्नद्वयमिदं लङ्कायाः राक्षसजातेश्च विनाशं सीतायाः भर्तृसङ्गमं च निश्चितम्-इति निश्चित्यैव स्वयं राक्षसी सती त्रिजटा अन्यराक्षसीभ्यः निवेदयितुं प्रयतन्ती दृश्यते श्रीमद्रामायणे।

मया स्वप्ने सहलक्ष्मणः राघवः चतुर्दन्तं शैलसंकाशं महागजमारुढ़ः चचार। ततस्तौ राघवलक्ष्मणौ स्वतेजसा प्रकाशमानौ शुक्लमाल्याम्बरधरौ जानकीपरितः विराजतः। ततस्तस्य पर्वतस्याग्रे आकाशे विराजमानस्य भद्रगजस्य रामेणालङ्कृतस्य स्कन्धं जानकी समाश्रितवती। अनन्तरं कमललोचना जानकी भर्तृरङ्कात् उत्थाय चन्द्रसूर्यौ पाणिना परिमार्जयन्ती। मया स्वप्ने दृष्टा ततस्ताभ्यां कुमाराभ्यां सीतया च परिशोभितः गजोत्तमः लङ्कायाः उपरि विद्योतते।

अस्मिन् स्वप्ने अष्टभिः पाण्डुरैः युक्तेन रथेन सीतासमेतः राघवः लङ्कानगरम् उपयातः। अन्यत्र शुक्लमाल्याम्बरः लक्ष्मणेन सहितः, वीर्यवान् सत्यपराक्रमः रामः सीतया परिवृतः दिव्यां सूर्यसंकाशं पुष्पकं विमानम् आरुह्य उत्तरां दिशिं पश्यन् जगाम।

अस्मिन् तृतीये स्वप्ने-श्रीरामलक्ष्मणाभ्यां चतुर्दन्तेन गजेन यानेन लङ्कां प्रति जानकी समीपागमनं, सीतया सूर्यचन्द्रयोः परिमार्जनं चोपवर्णयत्।

**"आदित्यमण्डलं वापि चन्द्रमण्डलमेव वा**
**स्वप्ने गृह्णाति हस्ताभ्यां महद्राज्यं समाप्नुयात्"**[2]

अयमपि स्वप्नः राक्षसविनाशं, सीतारामयोः समागमं च फलरूपमिति स्वष्टं संसूचयति।

---

1. स्वप्नशास्त्रम् 2-27
2. स्वप्ननिर्णयः

**आरोहणं गोवृषकुञ्जराणां प्रसादशैलाग्रवनस्पतीनां**
**विष्ठानुलो रुदितं मृतं च स्वप्नेष्वगम्यागमनं च धन्यम्॥**[2]

चतुर्थे स्वप्ने अष्टवृषभयुक्तेन पाण्डुरेण रथेन सीतया सह रामस्य लङ्कानगरगमनम्, सीतां गृहीत्वा उत्तरया दिशा पुष्पकम् आरुह्य स्वनगरं प्रतिगमनं च वर्णितम्। वर्णित विषयः सर्वेषाम् अवश्यं शुभपरम्परा सूचयति।

श्रीमद्रामाणस्य व्याख्याने गोविन्दराजीये त्रिजटास्वप्नवृत्तान्तः गायत्रीमन्त्र व्याख्यानरूप इति, रामायणे सुन्दरकाण्डं मध्यमणि सदृशम्, तत्रापि अयं स्वप्नवृत्तान्तः सुन्दरकाण्डस्य सारभूतों इति व्याख्यानं परिदृश्यते।

अस्मिन् स्वप्नवर्णने रामस्य गायत्री मन्त्राधिष्ठानभूतस्य परब्रह्मणश्च अभेदः प्रतिपादितः। चतुर्षु स्वप्नदृश्येषु क्रमशः हंसः, ऐरावतः, वृषभाश्च वाहनतया समुपवर्णिताः इति त्रिपदा गायत्री, ब्रह्म, विष्णु शिवात्मिका इति च व्यनक्ती भवति। प्रथमो हंसः ब्रह्मणः वाहनभूतः। ऐरावतो यद्यपि इन्द्रस्य वाहनभूतस्तथापि, विष्णुरपि उपेन्द्र एवेति तत्सान्निध्यं युक्तमिति भाष्यते। तृतीयो वृषभस्तु लयकर्तुरीश्वरस्यवाहनः इत्यत्र नास्ति सन्देहः।

गायत्री देवता श्वेतवर्णा सांख्यानसगोत्रा गायत्री इति कीर्त्यते, अत्रापि स्वप्नवृत्तान्ते सर्वेषां श्वेतवर्णानामेव गजदीनामुपवर्णनं दृश्यते प्राधान्येन।

## उपसंहार

एवं रीत्या न केवलं श्रीमद्रामायणे अपि तु महाभारत-पुराण-काव्येष्वपि स्वप्नावृत्तान्ताः भूरिशः दृश्यन्ते।

## उपयुक्तग्रन्थसूची

1. श्रीमद्रामायणम्-वाल्मीकि-गीताप्रेस्, गोरखपूर्।
2. स्वप्नविवेकः-श्री विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृतसिरीज, वाराणसी।

✦✦✦

2. स्वप्ननिर्णयः

# विशेषपदार्थलक्षणसम्बन्धिवैशेषिकाशयविमर्शः

- **सुजन-दासः** *

**शोधसारः**

शोधप्रबन्धेऽस्मिन् विशेषपदार्थस्य लक्षणविचारो न्यायवैशेषिकदृष्ट्या मया कृतः। सजातीयपरमाणूनां भेदसाधकत्वे विशेषस्वीकारे याः युक्तयः वैशेषिकनिर्देशिताः, ताः उपस्थापिताः अत्र। विशेषस्य स्वतोव्यावर्तकत्वं सिद्धान्तमप्युपवर्णितमस्ति। रघुनाथशिरोमणिदिशा विशेषस्य पदार्थत्वे युक्त्यभावात् विशेषखण्डनं कृतम्। अन्ते च सयुक्त्या तन्मतखण्डनेन वैशेषिकानां विशेषस्वीकारे प्रासङ्गिकता न्यायकन्दलीदिशा मयोपस्थापिता।

**प्रमुखशब्दाः**- नित्यं, परमाणुः, विशेषः, विशेषखण्डनं, स्वतोव्यावर्तकः चेत्यादयः।

## आमुखम्

भारतीयेषु षडास्तिकदर्शनेषु वैशेषिकदर्शनम् अन्यतमम्। कणादसूत्रे षण्णामुद्देशः सत्यपि अभ्युपगमसिद्धान्तेन[1] परवर्तिभिः व्याख्यातृभिः जगतः पदार्थानां सप्तधा विभज्य मोक्षप्राप्तेः सोपानं निर्देशितम्। तस्मादेव पदार्थचिन्ताचतुरोपाध्या विभूषिताः। वल्लभाचार्येण[2] नियतपदार्थवादिरूपेण वैशेषिकं निर्दिष्टम्। ते खलु द्रव्यगुणकर्मसामान्य-विशेषसमवायाभावाः। तेषु सप्तपदार्थेषु विशेषपदार्थः वैशेषिकानामभिनवः सृष्टपदार्थः। परमाण्वादिनित्यपदार्थानां परस्परभेदसिद्ध्यर्थं पदार्थस्यास्य कल्पनं तैः कृतम्। यमधिकृत्य वैशेषिकदर्शनमिति नामकरणं प्रसिद्धमस्ति न्यायनये। अतः दर्शनेऽस्मिन् विशेषपदार्थस्य चर्चायाः प्रासङ्गिकता अतीव गुरुत्वपूर्णा इत्यत्र नास्ति कश्चित् संशयः।

---

* शोधच्छात्रः, संस्कृतसंकायः, कोचबिहार-पञ्चाननवर्मा-विश्वविद्यालयः, कोचबिहारः, पश्चिमवङ्गः।

1. "अभावस्तु स्वरूपवानपि नोद्दिष्टः, प्रतियोगिनिरुपणाधीननिरुपणत्वात् न तु तुच्छत्वात्"। -किरणावली, अभावप्रकरणे।
2. "सम्बन्धानन्त्येऽपि नैयायिकानामनियतपदार्थवादित्वेन विरोधाभावात्"। -न्यायलीलावती, समवायप्रकरणे।

**शोधपद्धतिः**

शोधप्रबन्धेऽस्मिन् विषयस्योपस्थापनार्थं विश्लेषणात्मिका गवेषणापद्धतिः मया अनुसृता। खण्डनमण्डनरीत्या विशेषपदार्थस्य विमर्शात्मिका चर्चा बहुधा न्याय-वैशेषिकाचार्यैः कृता। तेषां व्याख्यातॄणां मतमुद्धृतपुरःसरं विशेषपदार्थस्य विमर्शनं नैव विश्लेषणात्मिकेतरैः गवेषणापद्धतिभिः सम्भवतीति। तदर्थमियं शोधपद्धतिः मयानुसृतात्र।

## परिणामः चर्चा च

### 0.1. विशेषपदार्थस्य लक्षणविचारः

वैशेषिकानां पञ्चमः पदार्थस्तावत् विशेषः। इतरेषु दर्शनेषु पदार्थोऽयमुपेक्षितः। परमाणुकारणवादे अस्वीकृते सति विशेषपदार्थस्वीकारे नास्ति काचित् यौक्तिकता। विशेषपदार्थस्य स्वीकरणात् कणादप्रणीतं दर्शनं वैशेषिकदर्शनमित्युच्यते। महर्षिकणादेन केषाञ्चित् विभाजकधर्माणामुल्लेखः कृतः। तेषां स्वतन्त्रपदार्थस्वीकारे चन्द्रामतेर्प्राथम्यं[1] दृष्टम्। 'अवयवभेदादवयविभेदः' इति नियमात् घटादिकार्यवस्तूनां एवं गुणक्रियातो विजातीयपरमाणुनां व्यावृत्तिबुद्धिः उत्पद्यते। सजातीयपरमाणुषु व्यावृत्तिबुद्धेर्जनकरूपे विशेषः स्वीकर्तव्यो भवति। अन्यथा सृष्टिकाले ईश्वरस्य संजिहीर्षावशात् सृष्टिप्रक्रिया[2] वर्णयितुं न शक्यते। न केवलं परमाणुषु आकाशादिपञ्चकेऽपि द्रव्ये विशेषस्य विद्यमानत्वेन नित्यद्रव्यवृत्तिरिति विशेषः[3] कथ्यते। केवलमेव व्यावृत्तिबुद्धेर्जनकत्वेन विशेषे अङ्गीकृते सति सामान्येऽपि तल्लक्षणमतिव्याप्तम्। सामान्ये अनुगतबुद्ध्या समं व्यावृत्तबुद्धेरपि जनकत्वमस्ति। तदर्थं विशेषः अन्त्यविशेष इत्युच्यते। विशेषस्यास्य लक्षणे व्याख्यानद्वयं प्रचलितमस्ति। प्रथमपक्षस्य मतानुसारेण अन्त्यः इति लक्षणं, नित्यद्रव्यवृत्तिरिति विशेषस्य स्थानञ्च निर्देशितम्[4]। द्वितीयपक्षस्य मतानुसारेण पदद्वयम् एव लक्षणघटकं भवति।

---

1. The category particularity is that which exists in substances only, has one substance as its substratum, and the cause of the intellection of excluding others and determining the one. -Daśapadārthaśāstra, Ed. F.W. Thomas, Page-100.
2. "अन्त्येषु भवा अन्त्या इति। उत्पादविनाशयोरन्तेऽवस्थितत्वादन्तशब्दवाच्यानि नित्यद्रव्याणि"। -न्यायकन्दली, सम्पा- ब्रह्मचारी मेधाचैतन्य, पृष्ठा 247।
3. "नित्यद्रव्यवृत्तयोऽन्त्याः विशेषाः। ते खलु अत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद्विशेषाः"। -प्रशस्तपादभाष्यम्, उद्देशप्रकरणम्।
4. "नित्यद्रव्यवृत्तिरिति विशेषाणां स्थानकथनं, न तल्लक्षणे प्रविष्टं प्रयोजनाभावात्"। -दिनकरी टीका (कारिकावली), शङ्करराम-शास्त्री, पृष्ठा-९८।

## 0.2. विशेषलक्षणे प्रथमा व्याख्या

प्रथमपक्षैः अन्त्यपदस्य लक्षणत्वं स्वीकृतम्। 'अवयवभेदादवयविभेदः' इति नियमात् सूक्ष्मतमावयविनो द्व्यणुकस्य भेदः परमाणुभेदेन सिद्धः। तदनु परमाणोः भेदसिद्ध्यर्थं स्वीकृते विशेषे कश्चित् भेदको धर्म अस्ति, न वा। कारणं हि अव्यावृत्तो धर्मो विशेषः कदापि तदाश्रयं परमाणुं व्यावर्त्तयितुं न शक्नोति। तस्मात् विशेषस्य व्यावृत्त्यर्थं कश्चिद्धर्मः स्वीकर्तव्यो भवति। विशेषे विशेषान्तरः, तद्विशेषे विशेषान्तर इत्यनेन अनवस्थादोषो जातः। कस्माच्चिदपि भेदकधर्माभावात् विशेषः स्वतः स्वं व्यावर्त्तयति। ततः स्वतोव्यावृत्तत्वं विशेषस्य लक्षणमिति मन्यते।

### 0.2.1. स्वतोव्यावृत्तत्वमित्यस्य अर्थविश्लेषणम्

स्वतोव्यावृत्तत्वं विशेषस्य असाधारणो धर्मो भवति। विशेषे विशेषान्तरस्य भेदं विशेषः स्वयमेव सिद्ध्यति। विशेषो विशेषान्तराद् भिन्नः स्वस्मात् इत्यनुमानेन प्राप्तं स्वप्रयोज्यस्वनिष्ठस्वसजातीय प्रातियोगिकभेदवत्त्वं स्वतोव्यावृत्तस्य शास्त्रीयः अर्थः। स्वयं व्यावर्त्तकत्वेन स्वप्रयोज्यत्वं, स्वाधिकरणत्वेन स्वनिष्ठत्वं, सजातीयविशेषान्तर-भेदवत्वेन सजातीयप्रातियोगिकभेदवत्त्वं च विद्यमानात् विशेषस्य स्वतोव्यावर्त्तकत्वं सिद्धम्। ननु जातेरभावात् एकेन विशेषेण समम् अपरविशेषस्य साजात्यं कथं सिद्धम्? तत्र खलु उपाधित्वेन विशेषस्य सजातीयत्वं सम्भवति। जात्यभावे सत्यपि पदार्थविभाजकोपाधिरूपं विशेषत्वं सर्वेषु विशेषेषु विद्यते।

ननु घटो घटान्तराद्भिन्नः स्वस्मात् इत्यनुमानेन घटे स्वतोव्यावृत्तत्वम् अतिव्याप्तं भवति। तन्निवारणाय दिनकरीकारेण स्वभिन्नलिङ्गकत्व-स्वप्रयोज्यक-स्वसजातीयेतर-भेदानुमितेः अविषयत्वमिति स्वतोव्यावृत्तत्वस्य अर्थः किञ्चित् भिन्नप्रकारेण व्याख्यातः[1]। अत्र स्वपक्षकत्वं स्वसजातीयेतरभेदसाधकत्वं स्वभिन्नलिङ्गकत्वञ्च इति विशेषण-विशिष्टानुमितेः विषयो यो न भवति, स एव विशेष इत्यर्थः। विशेषो विशेषान्तराद् भिन्नः स्वस्मात् इत्यनुमानस्य विषयरूपेण विषय उपस्थाप्यते। किन्तु विशेषस्य स्वलिङ्गकत्वेन स्वभिन्नलिङ्गकत्वस्य अभावात् अस्यानुमिते अविषयरूपेण विशेष एव प्राप्तः। अपरपक्षे घटो घटान्तराद् भिन्नो घटान्तरावयवभिन्नावयवसमवेतत्वाद् इत्यत्र विशिष्टावयवसमवेतत्वेन स्वभिन्नलिङ्गकत्वं विद्यमानत्वात् विषयरूपेण घटः प्राप्यते। तस्माद् अनुमानेऽस्मिन् घटस्य अविषयत्वेन घटे स्वतोव्यावृत्तत्वं नातिव्याप्तम्।

अपि च रामरूद्रेण अन्त्यपदस्य लक्षणत्वमङ्गीकृतम्। केषुचित् स्थलेषु सम्बन्धिद्वयस्य नित्यत्वेन समवायसम्बन्धस्य नित्यद्रव्यवृत्तित्वात् समवाये विशेषलक्षण-

---

1. "स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजातीयेतरभेदानुमित्यविषयत्वम्"। -दिनकरी टीका (कारिकावली), शङ्करराम-शास्त्री, पृष्ठा-119।

मतिव्याप्तम्। द्रव्यवृत्तित्वं समवायेन निर्दिष्टं सन्नपि नित्यद्रव्यपदस्य वैयर्थ्यं सिद्धं भवति। ततो नित्यद्रव्यवृत्तिरिति विशेषस्य स्थानकथनं निर्देशितम्[1]।

स्वतोव्यावृत्तत्वस्य स्वीकारे प्रधानतः द्विधा आपत्तिर्सम्भवति। व्यावर्त्तत्वक-धर्माश्रयस्य एव व्यावृत्तिबुद्धेर्जनकत्वेन व्यावर्त्तकत्वधर्मविरहादपि विशेषस्य तद्बुद्धिजनकत्वं कथं सम्भवति। तदनु परमाणूनां स्वतोव्यावृत्तत्वे स्वीकृते सति विशेष इति पृथक् पदार्थस्वीकारे नास्ति काचित् यौक्तिकता। तदुत्तरे कथितं हि- सर्वे पदार्था इतरस्वभावविशिष्टाः भवन्ति। घटं दर्शयितुं प्रदीपस्य अपेक्षता वर्तते, किन्तु प्रदीपं प्रति प्रदीपान्तरापेक्षा नास्ति। यद्वा अन्नस्य अशुचिता गोमांसनिर्भरा, किन्तु गोमांसस्य अशुचिता स्वतः सिद्धा[2]। व्यावृत्तिबुद्धेर्नियामकत्वेन व्यावर्त्तक-धर्माश्रयत्वस्य नियामकत्वे सिद्धे सति तद्धर्माभावादपि विशेषस्य व्यावृत्तिबुद्ध्यर्थं व्यावर्तकत्वधर्मान्तरस्य नास्ति प्रयोजनम्। स तु स्वतोव्यावृत्त इत्यर्थः।

## 0.3. विशेषलक्षणे द्वितीया व्याख्या

विशेषस्य लक्षणघटकयोः पदद्वयोर्लक्षणत्वं स्वीकुर्वतः प्रभाटीकाकारस्य[3] मते अन्त्यपदेन निरवयवद्रव्यवृत्तित्वं ज्ञेयम्। आकाशादीनां नित्यद्रव्यानां निरवयवत्वात् नित्यद्रव्यवृत्तिरिति पदेन पुनरूक्तिदोषो जातः। तन्न भवति, घटादिकार्यवस्तूनि प्रति कपालाद्यवयवानामपि विशेषत्वं शक्यमिति सिद्धान्तात्। निरवयवत्वेन परमाणूनां भेदसिद्धौ निरवयवत्वमिति उत्कीर्तनेन नोक्तदोषो जायते[4]।

## 0.3.1. अवयविभेदे अवयवभेदकारणत्वे युक्तिः

प्रथमतः अवयविनो भेदः प्रत्यक्षप्रमाणेन गृहीतो भवति। कारणं हि द्व्यणुकस्य अप्रत्यक्षयोग्यत्वे सत्यपि घटादिस्थूलवस्तूनां प्रत्यक्षयोग्यत्वं शक्यम्। प्रत्यक्षे सम्भवे सति न केनचिद् अनुमानाश्रयो गृहीतः। किन्तु स्थूलवस्तूनां व्यावृत्तिबुद्धौ अनुमानस्य

---

1. "तथापि समवेतत्वमात्रेणैव तत्रातिव्याप्तिवारणसम्भवे नित्यद्रव्यांशवैयर्थ्यस्य दुर्वारत्वादित्यभि-प्रायेणाह......विशेषाणां स्थानकथनमिति"। -रामरूद्री टीका (कारिकावली), शङ्कररामशास्त्री, पृष्ठा-121।
2. "यथा गवांशमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषां तथेहापि तादात्म्यादन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगाद् परमाण्वादिष्विति"। -प्रशस्तपादभाष्यम्, ढुण्ढिराजशास्त्री, पृष्ठा-287।
3. "अवसान इति। निरवयवद्रव्य इत्यर्थः"। -प्रभा टीका (कारिकावली), शङ्करराम-शास्त्री, पृष्ठा-119।
4. " कपालाद्यवयवानामेव घटादिविशेषतया विशेषाणां निरवयववृत्तित्वोक्त्या तल्लाभसम्भवात्"। -मञ्जुषा टीका, (कारिकावली), शङ्करराम-शास्त्री, पृष्ठा-120।

साहचर्य्यं कथं स्वीकृतम्। तदुत्तरे उक्तं- अन्वयव्यातिरेकेन प्रत्यक्षयोग्यवस्तूनां भेदसिद्धिः अवयवभेदज्ञानादेव सिद्धा भवति। वस्तुतस्तु प्रत्यक्षमनुमानं यत्किमपि वा भवतु व्यावृत्तिबुद्ध्यर्थम् अवयवभेदज्ञानस्यैव[1] नियामकत्वमस्ति।

द्वितीयतः प्रत्यक्षेण भेदनिश्चये सत्यपि ज्ञानस्य अप्रामाण्यशङ्कां निराकर्तुं, भेदविषयकसंस्कारं दृढतरं कर्तुं च लोकेऽस्मिन् अवयवभेदज्ञानस्य प्रयोजकत्वं लब्धम्। अपि च प्रत्यक्षयोग्ये पदार्थे अनुमानस्य अविषयत्वे नास्ति युक्तिः। तर्कप्रियैः[2] प्रत्यक्षयोग्यं पदार्थमपि अनुमानेन सिद्ध्यर्थं प्रयत्नो दृष्टः। यथा पर्वते वह्नेर्प्रत्यक्षयोग्यत्वे धुमात् वह्नेरनुमितौ नास्ति प्रतिबन्धकः।

नृसिंहशास्त्रिणो मते अन्त्यो नित्यद्रव्यवृत्तिरिति पदद्वयेन द्विविधं लक्षणं सूचीतम्। विशेषलक्षणस्य लाघवात् अन्त्यपदेन नित्यद्रव्यवृत्तित्वं विशेषत्वमुक्तम्। अत्र नित्यद्रव्यवृत्तेः अवधारणार्थो बोध्यः। ततो विशेषस्य केवलं नित्यद्रव्यवृत्तित्वमिति लक्षणं सिद्धम्। तल्लक्षणे कृते सति परममहत्परिमाणस्य केवलमाकाशवृत्तितया तत्परिमाणे अतिव्याप्तम्। तन्निवारणाय उक्तं हि- अनित्यद्नव्यवृत्ति-अवृत्ति-पदार्थविभाजकोपाधिमत्त्वम् इति[3]। अर्थात् तादृशस्य पदार्थविभाजकोपाधेः आश्रयत्वेन ग्रहीतव्यं, यस्य अनित्यद्रव्यवृत्तिपदार्थे वृत्तित्वं नास्ति। विशेषत्वस्य अनित्यद्रव्यवृत्तिपदार्थे गुणादौ अविद्यमानत्वेन, नित्यद्रव्ये वृत्तित्वेन च विशेषाश्रयः सम्भवति। किन्तु गुणत्वेन अनित्यद्रव्यवृत्तित्वात् परममहत्परिमाणे लक्षणघटकम् अनित्यद्रव्यवृत्त्यवृत्तित्वं नास्ति। तस्मात् परममहत्परिमाणे नातिव्याप्तम्। इत्थं प्रकारेण नित्यद्रव्यवृत्तिरिति पदस्य लक्षणघटकत्वं दर्शयित्वा विशेषाश्रयत्वरूपं मतं निराकृतम्। तदनु सर्वाधारताप्रयोजकत्वसम्बन्धेन अनित्यद्रव्यवृत्तित्वात् विशेषलक्षणम् अनित्यद्रव्ये अतिव्याप्तम्। अत्र सर्वाधारताप्रयोजकत्वसम्बन्धेन कालिकसम्बन्धः इत्यवधेयम्। तत्सम्बन्धेन विशेषस्यापि अनित्यद्रव्ये विद्यमानत्वात् तत्सम्बन्धभिन्नसम्बन्धो ज्ञातव्यः[4]।

---

1. "अतो व्यावर्तकत्वं तत्तदवयवभेदस्य सिद्धमेव"। -मञ्जुषा टीका, (कारिकावली), शङ्कर‌राम-शास्त्री, पृष्ठा-122।
2. "अत एवोक्तं प्रत्यक्षपरिकल्पितमप्यर्थमनुमानेन वुभुत्सन्ते तर्करसिका इति"। -मञ्जुषा टीका, (कारिकावली), शङ्कर‌राम-शास्त्री, पृष्ठा-122।
3. "तथापि अनित्यद्रव्यवृत्त्यवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य तदर्थत्वेनोक्तदोषाभावात्। अत एव नित्यद्रव्यवृत्तिरिति विशेषाणां स्थानकथनं नतु लक्षणप्रविष्टं प्रयोजनाभावादिति केषांचिन्मूलाभिप्रायवर्णनमपास्तम्"। -प्रभा टीका, (कारिकावली), शङ्कर‌राम-शास्त्री, पृष्ठा-129।
4. "अनित्यद्रव्यवृत्तित्वं च सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेन इति नानुपपत्तिः"। -मञ्जुषा टीका, (कारिकावली), शङ्कर‌राम-शास्त्री, पृष्ठा-124।

व्योमशिवाचार्येण श्रीधरभट्टेन च नित्यद्रव्यवृत्तिरिति पदेन विशेषस्य लक्षणं विहितम्। प्रशस्तपादस्य मते अन्त्यशब्दस्यार्थो भवति नित्यद्रव्यवृत्तिरिति। कारणं हि उत्पत्तेः विनाशस्य च अन्ते नित्यद्रव्यं व्यावस्थितम्[1]। विशेषस्य केवलमेव नित्यद्रव्यवृत्तित्वेन द्रव्यगुणकर्मसामान्येषु नातिव्याप्रम्। द्रव्यगुणकर्मणां त्रयाणामनित्य-द्रव्येऽपि विद्यमानत्वात् नित्यद्रव्यवृत्तित्वं न भवति। द्रव्यभिन्ने गुणकर्मणि सामान्यस्य वृत्तितया नास्ति नित्यद्रव्यवृत्तित्वम्। बुद्धेः शब्दस्य च नित्यद्रव्यवृत्तित्वे सत्यपि सर्वेषु नित्यद्रव्येषु अविद्यमानत्वेन नित्यद्रव्यवृत्तित्वं न सम्भवति। बुद्धेः आत्मनि, शब्दस्य आकाशे च केवलं वृत्तिता दृष्टा। किन्तु सर्वनित्यद्रव्यवृत्तितया एव विशेषो निर्देशितः।

### 0.3.2. जगदीशतर्कालङ्कारस्य मतम्

नव्यनैयायिकेन जगदीशतर्कालङ्कारेण द्वयोः पदयोः लक्षणत्वमङ्गीकृतम्। तस्य मतानुसारेण नित्यपदस्यार्थो भवति सर्वदा इति, न तु उत्पत्तिविनाशशून्यः। यस्य सर्वदा समवायेन वृत्तित्वं, तदेव विशेष इत्यर्थः[2]। समवेतद्रव्यानां जन्यत्वात् उत्पत्तेः पूर्वं विनाशस्य च परं द्रव्यवृत्तित्वं न सम्भवति। कर्मण अपि जन्यत्वेन क्षणिकत्वेन च सर्वदा द्रव्यवृत्तित्वं न शक्यम्। सामान्यस्य नित्यत्वेन सृष्टिकाले प्रलयकाले च द्रव्यवृत्तित्वमसिद्धम्। इत्थं विशेषस्य सर्वदा नित्यद्रव्यवृत्तित्वमिति लक्षणं विहितम्।

सर्वदा द्रव्यसमवेतः इत्युक्ते सति नित्यगुणे द्रव्यत्वे चातिव्याप्तिर्भवति। आकाशपरिमाणस्य नित्यत्वेन सर्वदा आकाशद्रव्यवृत्तित्वमस्ति। द्रव्यत्वजातेः नित्यद्रव्ये आत्मनि सर्वदा समवेतत्वेन विशेषत्वं स्वीकृतं भवति। तन्निवारणाय उक्तं हि- अन्त्यपदेन नित्यद्रव्यवृत्तिजातिगुणयोः भेदवत्त्वात् तन्निवारितं भवति। अन्त्यपदेन व्यावृत्तिः बोध्या। कस्मात् व्यावृत्तिः इत्युत्तरे नित्यद्रव्यवृत्तिजातिगुणाभ्यां व्यावृत्तिः ज्ञेया इति जगदीशेन कथिता। अर्थात् सर्वदा नित्यद्रव्यवृत्तित्वे सति नित्यद्रव्यवृत्ति-जातिगुणेभ्यो भिन्नत्वं यस्य विद्यते, स एव विशेष इत्यर्थः। कर्मणि अतिव्याप्तिवारणाय अन्त्यपदस्य महाप्रलयरूपः अर्थो बोधितव्यः। तथापि घटत्वे, ध्वंसे च विशेषलक्षण-मतिव्याप्तम्। किन्तु तयोः असमवेतत्वेन विशेषलक्षणत्वं नास्ति। पुनश्च नित्यगुणे अतिव्याप्तिवारणाय कर्मावृत्तिसामान्यशून्यत्वं, आत्मनि अतिव्याप्तिवारणाय नित्यद्वय-समवेतान्यत्वं चेति विशेषणद्वयं लक्षणे निवेशितव्यम्[3]।

---

1. "तथा च वक्ष्यति नित्यद्रव्याण्युत्पत्तिविनाशयोरन्ते व्यावस्थितत्वादन्तशब्दवाच्यानि"। -व्योमवती, उद्देशप्रकरणम्।
2. "नित्यं सर्वदा द्रव्यवृत्तयो द्रव्यसमवेता इत्यर्थः"। -सूक्ति टीका, विशेषप्रकरणे।
3. " कर्मावृत्तिसामान्यशून्यत्वे सति नित्यद्वयसमवेतान्यत्वेनापि विशेषणीयत्वादिति भावः"। -जागदीशी।

### 0.4. विशेषस्य इतरलक्षणम्

विशेषस्य निर्दोषलक्षणविषये व्याख्यातृभिः बहुधा चर्चिता। प्रायशः सर्वैः नैयायिकैः विशेषविषये स्वकृतलक्षणमुपस्थापितम्। तेषु द्वयोर्लक्षणयोः व्याख्यानं वयमत्र द्रक्ष्यामः। उदयनाचार्यस्य मतव्याख्यानं कुर्वता वर्धमानोपाध्यायेन सुचितं लक्षणं तावत्– "निःसामान्यत्वे सति एकद्रव्यमात्रवृत्तित्वम्"[1] इति। यः पदार्थः सामान्यस्य अनाश्रयो भवति, अपि च एकद्रव्यमात्रवृत्तिर्भवति, स एव विशेष इत्यर्थे गृहीते सति एकद्रव्यवृत्तित्वेन निःसामान्यत्वेन च आकाशत्वे अतिव्याप्तं जातम्। वृत्तित्वमत्र समवायेन गृहीतं चेत् स्वरूपसम्बन्धेन वृत्तितया आकाशत्वे अतिव्याप्तिः निवारिता भवति।

निःसामान्यत्वमिति पदं व्यतिरिच्य कृतं लक्षणम् एकद्रव्यमात्रसमवेतत्वेन गुणे कर्मणि चातिव्याप्तम्। एकस्य घटस्य रूपं घटान्तरे अविद्यमानात् एकद्रव्यवृत्तिरिति। देवदत्तनिष्ठक्रियायाः यज्ञदत्ते अवृत्तितया क्रियायामपि एकद्रव्यवृत्तित्वमस्ति। किन्तु गुणकर्मणि सामान्यस्य विद्यमानात् निःसामान्यरूपेण तयोर्ग्रहणं न भवति।

निःसामान्यत्वं विशेषत्वमिति लक्षणं कृते सति सामान्याभावात् जातौ, समवाये, अभावे तल्लक्षणं चातिव्याप्तम्। एकद्रव्यमात्रवृत्तित्वमिति पदसंयोजनात् अनेकद्रव्य-वृत्तित्वेन जातौ नातिव्याप्तम्। समवायाभावयोः सर्वत्रैव समवायेन वृत्त्यभावात् विशेषत्वं नैव सम्भवति। निःसामान्यरूपेण एकघटवृत्तितया घटत्वे विशेषलक्षणमतिव्याप्तम् जातम्। किन्तु मात्रग्रहणात् अनेकघटवृत्तित्वेन घटत्वस्य एकघटमात्रवृत्तित्वं ग्रहीतुम-शक्यम्। माधवाचार्येण[2] अन्योन्याभावविरोधित्वमिति लक्षणे प्रयुक्तम्। अर्थात् परमाण्वादिवृत्तिविशेषे अन्योन्याभावो विद्यते इत्यर्थः।

अध्यापकमृणालकान्तिगङ्गोपाध्यायेन स्वकीये ग्रन्थे लक्षणमेकमुपस्थापितं यत्– "जातिजातिमद्भिन्नत्वे सति समवेतत्वम्"[3] इति। यस्य पदार्थस्य सामान्यत्वं नास्ति, सामान्यविशिष्टत्वमपि नास्ति, किन्तु समवेतत्वमस्ति, तदेव विशेष इति। जातिभिन्नत्वमिति विशेषणरहितस्य लक्षणस्य जातौ अतिव्याप्तं भवति। जातेरभावात् जातौ जातिमद्भिन्नत्वेन, स्वाश्रये समवेतत्वेन च विशेषत्वस्य वृत्तित्वं सम्भवति। जातिभिन्नत्वमिति पदयोजनात् जातेः जात्यभिन्नत्वेन ग्रहणमशक्यम्। ततो जातौ अतिव्याप्तिः निवारिता। जातिमद्भिन्न-त्वमिति विशेषणं व्यतिरिच्य लक्षणे कृते सति जातिभिन्नत्वेन समवेतत्वेन च

---

1. "निःसामान्यत्वे सति एकद्रव्यमात्रवृत्तित्वम्"। –किरणावलीप्रकाशः, विशेषप्रकरणम्।
2. "विशेषो नामान्योन्याभावविरोधिसामान्यरहितः समवेतः"। –सर्वदर्शनसंग्रहः, सम्पा– उमाशंकरशर्मा ऋषि, पृष्ठा 350।
3. "जातिजातिमद्भिन्नत्वे सति समवेतत्वम्"। –भाषापरिच्छेदे सप्तपदार्थ, सम्पा– मृणालकान्ति–गङ्गोपाध्याय, पृष्ठा–29।

द्रव्यगुणकर्मसु अतिव्याप्तम् जातम्। किन्तु जातिमद्भिन्नत्वमिति विशेषणेन द्रव्यादौ नातिव्याप्तम्। कारणं हि द्रव्यादेः जातिमत्त्वमस्ति न तु जातिमद्भिन्नत्वमिति। तदनु केवलं समवेतत्वं लक्षणं चेत् द्रवादौ तल्लक्षणमतिव्याप्तम्। द्रव्यादीना चतुर्णां पदार्थानां समवायेन स्वाश्रयवृत्तिर्भवति। पुनः जातिजातिमद्भिन्नत्वे सति वृत्तित्वमिति लक्षणं भवति चेत् अभावे अतिव्याप्तिः जाता। कारणं हि अभावस्य जातिभिन्नत्वं, जातिमद्भिन्नत्वं, स्वाश्रये भूतले स्वरूपसम्बन्धेन वृत्तित्वमस्ति। किन्तु समवायेन तद्वृत्तित्वं निर्दिष्टं चेत् अभावे लक्षणस्य अतिव्याप्तिदोषो निवारितः। इत्थं जातिजातिमद्भिन्नत्वे सति समवेतत्वमिति विशेषस्य निर्दोषलक्षणं व्याख्यातम्।

## 0.5. रघुनाथशिरोमणिदृष्ट्या विशेषखण्डनम्

नव्यनैयायिकेन रघुनाथशिरोमणिना विशेषस्य पृथक् पदार्थत्वं निराकृतम्[1]। विशेषो यदि एको भवति तदा व्यावर्त्तके नाना चेत् तेषां परस्परमव्यावृत्तत्वे सति आश्रयाणां व्यावर्त्तकत्वं कथं सिद्धम्। तदुत्तरे कथ्यते हि- विशेषा एव स्वतो व्यावृत्ता इति। अपि च विशेषस्य स्वतोव्यावृत्तत्वेन नित्यद्रव्यानामपि स्वतोव्यावृत्तत्वे स्वीकृते तत्र को दोषः। यद्वा आकाशस्य शब्दसमवायिकारणत्वे शब्दवत्त्वम् अवच्छेदकं ज्ञेयम्। शब्दात्मकस्य अवच्छेदकत्वे गौरवदोषात् आकाशे विशेषसिद्धिरिति अप्रामाण्यम्। शब्दोत्पत्तौ एकवृत्तिकारणताया अवच्छेदकापेक्षा नास्ति। एकवृत्तिकारणतया अवच्छेदकं विनापि शब्दस्य समवायिकारणत्वं सिद्धं भवति।

### निष्कर्षः

पारिशेष्यात् वक्तुं शक्यते यत्- विशेषपदार्थस्य अनङ्गीकृतत्वे सति जगतः सृष्टिसंहारयोः अन्तराले परमाण्वादिनित्यपदार्थानां नित्यत्वे अनुपपत्तिर्स्यात् मानाभावात्। अपि च सृष्ट्यारम्भे द्वयोः परमाण्वोः संयोग एकस्याः पृथिव्याः द्व्यणुकोत्पत्तिर्न सम्भवति विशेषाभावात्। अर्थात् विशेषं विना जगतः सृष्टिसंहारयोर्व्याख्या[2] दातुमशक्ता। मत्पक्षतः अनया दृष्ट्या अभिनवपदार्थरुपेण विशेषस्य निर्देशनात् वैशेषिकदर्शनमिति नामकरणं समीचिनमेवेति शम्।

---

1. " विशेषोऽपि न पदार्थान्तरम्, मानाभावात्। विनापि व्यावर्तकं धर्मं परेषां विशेषाणामिव नित्यानां द्रव्याणामपि स्वतः एव व्यावर्तकत्वात्"। -पदार्थतत्त्वनिरूपणम्, पृष्ठा-63।
2. "अन्त्येषु भवा अन्त्या इति। उत्पादविनाशयोरन्तेऽवस्थिततत्वादन्तशब्दवाच्यानि नित्यद्रव्याणि"। -न्यायकन्दली, सम्पा- ब्रह्मचारी मेधाचैतन्य, पृष्ठा 247।

**ग्रन्थानुक्रमणिका**

1. उदयनाचार्यः, किरणावली (सम्पा.) नरेन्द्रचन्द्र वेदान्ततीर्थ, कलिकाताः एशियाटिक सोसाइटि, 2002।

2. गोतमः, न्यायदर्शनम् (सम्पा.) पद्मप्रसादशास्त्री एवं हरिरामशुक्ल, वाराणसीः चौखम्भा संस्कृत भवन, 2018।

3. प्रशस्तदेवाचार्यः, पदार्थधर्मसंग्रहः (सम्पा.) नारायणमिश्र, वाराणसीः चौखम्भा संस्कृत संस्थान, 2016।

4. मृणालकान्तिगङ्गोपाध्यायः, भाषापरिच्छेदे सप्तपदार्थ, प्रथमसंस्करण, कलिकाताः संस्कृत वुक डिपो, 1421।

5. रघुनाथशिरोमणिः, पदार्थतत्त्वनिरूपणम् (सम्पा.) मधुसूदन भट्टाचार्य, कलिकाताः संस्कृत कालेज, 1976।

6. विश्वनाथतर्कपञ्चाननः, कारिकावली (सम्पा.) सी शङ्कररामशास्त्री, द्वितीयसंस्करण, दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान, 2016।

7. व्योमशिवाचार्यः, व्योमवती (सम्पा.) गौरीनाथशास्त्री, वाराणसीः चौखम्भा संस्कृत संस्थान, 1984।

8. शङ्करमिश्रः, वैशेषिकसूत्रोपस्कारः (सम्पा.) नारायणमिश्र, वाराणसीः चौखम्भा प्रकाशन, 2019।

9. शङ्करमिश्रः, कणादरहस्यम् (सम्पा.) विन्ध्येश्वरीप्रसाद-द्विवेदि, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, 2007।

10. शिवादित्यः, सप्तपदार्थी (सम्पा.) तपनशङ्कर भट्टाचार्य, कलिकाताः संस्कृत बुक डिपो, 2012।

12. श्रीधराचार्यः, न्यायकन्दली, (सम्पा.) जे.एस्. जेटलि एवं वि.जि पारिख, भादोद्राः एम्.एस् युनिभार्सिटि अफ् वरोदा प्रेस्, 1991।

13. Bhaduri, Sadananda, Nyaya & Vaisesika Metaphysics, First Reprint, Pune : Bhandarkar Oriental Research Institute, 2021.

14. Dasapadarthasastra, Ed. F.W. Thomas, 3rd Edition, Varanasi : Chowkhamba Sanskrit Series Office, 1999.

15. Potter, Karl H. Encyclopedia of Indian Philosophies, Ed. Sibajiban Bhattacharyya, 1st Edition, Vol- XIII- Delhi : Motilal Banarsidass, 2011.

 ISSN : 0975-1769

# साङ्ख्ययोगन्याय-वैशेषिकदर्शनदिशा सुखस्य तुलनात्मकम् अध्ययनम्

-**पूर्णचन्द्रमण्डलः** *

**शोधसारः**- भारतीयषड्विधास्तिकदर्शनेषु साङ्ख्यदर्शनं योगदर्शनञ्च अतिप्राचीने अन्यतमे च दर्शने। साङ्ख्ययोगदर्शनयोः मौलिकतत्त्वे पुरुषः प्रकृतिश्च। साङ्ख्ययोगदर्शनानुसारं सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। त्रिविधगुणेषु सत्त्वगुणः प्रीत्यात्मकः अर्थात् सुखस्वरूपं, रजोगुणः अप्रीत्यात्मकः अर्थात् दुःखस्वरूपं, तमोगुणः विषादात्मकः अर्थात् मोहस्वरूपम्। अत एव सुखं जडप्रकृतेः वैशिष्ट्यम्। यस्मात् त्रिगुणात्मकप्रकृतिः सुखदुःखमोहात्मिका। अपरपार्श्वे न्यायवैशेषिकदर्शन-प्रकरणग्रन्थेषु रूपरसादिचतुर्विंशतिगुणेषु अन्यतमगुणः सुखम्। आचार्यः अन्नंभट्टः तस्य तर्कसंग्रहग्रन्थे सुखस्वरूपम् उक्तवान् यत् सर्वेषामनुकूलतया वेदनीयं सुखम् इति। अर्थात् सकलप्राणिनां यत् स्वाभाविकाभिलाषस्य विषयरूपेण ज्ञायते तत् सुखम्। सुखमिदं आत्मनः विशेषगुणः- बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। एवञ्च तर्कभाषानामकग्रन्थे सुखप्रसङ्गे उक्तं - प्रीतिः सुखम्। तच्च सर्वात्मनामनुकूलवेदनीयम्। उपर्युक्तालोचनातः वक्तुं शक्यते साङ्ख्ययोगानुसारेण सुखं त्रिगुणात्मकप्रकृत्या सह सम्बन्धयुक्तम्। सुखादयः जडप्रकृतेः विषयाः यत् सृष्टेः अनन्तरं प्रकृतिः पुरुषाय भोगरूपेण प्रददाति किञ्च पुरुषः सुखादिविषयाणां भोक्ता भवति। प्रकृतपक्षे सुखादिविषयाः पुरुषस्य न भवन्ति, प्रकृतिपुरुषसंयोगवशात् पुरुषे आरोप्यते। किन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखं जीवात्मनः विशेषगुणः यत् गुणगुणिरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। अत एव साङ्ख्ययोगन्यायवैशेषिकदर्शनदृष्ट्या सुखविषकयिकी: या अवधारणा तस्य तुलनात्मकं विश्लेषणं मम निबन्धस्य प्रतिपाद्यविषयः।

**प्रमुखशब्दाः**- सुखं, गुणः, प्रकृतिः, आत्मा, साङ्ख्यम्।

**आमुखम्**-भारतीयदर्शनम् आध्यात्मिकतावादस्य दर्शनम्। केवलं चार्वाकदर्शनं व्यतिरिच्य सर्वाणि दर्शनानि आध्यात्मिकानि। भारतीयदर्शने दर्शनशब्देन तत्त्वदर्शनं तत्त्वदर्शनस्य उपायाश्च बोध्यन्ते। भारतीयदर्शने सर्वदा सत्योपलब्धेः तत्त्वोपलब्धेः उपरि वा गुरुत्वम् आरोप्यते। मानवजीवनस्य परमपुरुषार्थः भवति मोक्षः मुक्तिः वा। किञ्च अयं मोक्षः भारतीयाध्यात्मिकदर्शनसम्प्रदायानां मूलालोचनायाः विषयः।

---

* शोधछात्रः, विश्वभारती विश्वविद्यालयः, पश्चिमवङ्गः।

भारतीयदर्शनसम्प्रदायानां चरमलक्ष्यं परमपुरुषार्थः मोक्षः, किन्तु तस्मिन् विषये समन्वयलक्षितत्वेऽपि प्रमाणगतप्रमेयगतकार्यकारणवादप्रभृतिविषये भारतीयदर्शनसम्प्रदायेषु मतवैषम्यं वर्तते। प्रत्येकदर्शनसम्प्रदायशास्त्रेषु तस्य तस्य दर्शनानुसारं इदं रहस्यमयं जगत्, जगतः सर्वेषां तत्त्वानां यथार्थस्वरूपं, तेषां यथार्थज्ञानलाभोपायः इत्यादिविषयाः यथायथं प्रतिपादिताः। एवं साङ्ख्ययोगे न्यायवैशेषिकदर्शने चापि प्रत्येकजीवानां आकांक्षितसुखस्वरूपम् उपस्थापितम्। अन्यान्यदर्शनसम्प्रदायरीत्या साङ्ख्ययोगस्य न्याय-वैशेषिकदर्शनस्य च मुख्यलक्ष्यं जागतिकदुःखात् निवृत्तिलाभः। तस्मात् जागतिकदुःखस्य अभावः सुखम्। सुखप्रसङ्गे साङ्ख्ययोगे न्यायवैशेषिकदर्शने च अधिकतया सादृश्यं दृश्यते चेदपि सुखस्य अधिष्ठानविषये मतभेदः लक्ष्यते।

**शोधपद्धतिः**- अत्र तुलनात्मकं शोधविधिः प्रयुज्यते।

**साङ्ख्ययोगदर्शने सुखस्य अवधारणा-**

महर्षिकपिलस्य साङ्ख्यदर्शनं महर्षिपतञ्जलेः योगदर्शनं च समानतान्त्रिकदर्शनम्। योगदर्शने साङ्ख्यदर्शनस्य पुरुषादि पञ्चविंशतिः तत्त्वानि आलोचितानि। साङ्ख्य-योगदर्शनयोः मूलं मौलिकतत्त्वद्वयं पुरुषः प्रकृतिश्च। साङ्ख्यदर्शनानुसारं पुरुषः कैवल्यनिमित्तं, प्रकृतिः सुखदुःखमोहात्मकभोग्यविषयस्य दर्शननिमित्तं पङ्ग्वन्धन्यायेन परस्परं संयुक्तौ।[1] तस्मात् पुरुषस्य सन्निधिवशतः प्रकृतौ विक्षोभ उत्पद्यते किञ्च तस्य कार्यरूपेण महदादित्रयोविंशतिः तत्त्वानि जायन्ते। महर्षिकपिलमुनिः तस्य साङ्ख्यसूत्रग्रन्थस्य प्रथमाध्यायस्य द्वाषष्टितमसूत्रे सृष्टिप्रक्रियायाः आलोचना प्रसङ्गे प्रकृतिलक्षणम् उक्तवान् - सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः।[2] साङ्ख्यदर्शने सत्त्वं, रजः तमः च एते त्रयः गुणाः स्वीकृताः, त्रिविधगुणानां साम्यावस्था प्रकृतिः। साङ्ख्यदर्शने पृथग्रूपेण सुखस्य लक्षणं यद्यपि न प्रतिपादितं तथापि त्रिविधगुणानाम् आलोचनायां सत्त्वगुणस्य स्वरूपप्रसङ्गे सुखविषय उपस्थापितः। आचार्य ईश्वरकृष्णः तस्य साङ्ख्यकारिकाग्रन्थे त्रिविधगुणस्वरूपविषये आलोचितवान् यत् सत्त्वगुणः प्रीत्यात्मकः, रजोगुणः अप्रीत्यात्मकः, तमोगुणः विषादात्मकश्च। सत्त्वगुणस्य प्रयोजनं हि प्रकाशः, रजोगुणस्य प्रयोजनं हि प्रवृत्तिः, तमोगुणस्य प्रयोजनं नियमनं, किञ्च त्रिविधगुणानां व्यापाराः भवन्ति अन्योन्याभिभवः, अन्योन्याश्रयः, अन्योन्यजननः अन्योन्यमिथुनश्च।[3] अर्थात् त्रिगुणस्य लक्षणविषये उक्तं सत्त्वगुणः प्रीत्यात्मकः

---

1. पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः। (सांख्यकारिका-21)
2. सांख्यसूत्रम्- 1/62।
3. प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः। अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः। (सांख्यकारिका- 12)

अर्थात् सुखस्वरूपः, रजोगुणः अप्रीत्यात्मकः अर्थात् दुःखस्वरूपः, तमोगुणः विषादात्मकश्च अर्थात् मोहस्वरूपः।[4] अत्र सुखविषये आचार्यः वाचस्पतिमिश्रः तस्य साङ्ख्यतत्त्वकौमुदीटीकायाम् अवदत् प्रीतिः सुखं, प्रीत्यात्मकः सत्त्वगुणः। अर्थात् सुखं सत्त्वगुणस्य स्वरूपम्। त्रिगुण शब्दे आत्मशब्दस्य प्रयोजनं किम्? अस्य आशङ्कायाम् उत्तरयति कौमुदीकारः- परमतनिराकरणाय आत्मशब्दस्य प्रयोगः कृतः। केचन चिन्तयन्ति प्रीतिः दुःखाभावस्वरूपम्। प्रीतिः दुःखाभावस्वरूपं चेत् प्रीतिनामकं भिन्नं वस्तु नास्ति, दुःखमपि प्रीत्यभावस्वरूपम्, प्रीत्यभावभिन्नं दुःखनामकं वस्तु नास्ति- अस्य मतस्य खण्डननिमित्तं आत्मशब्दः प्रयुक्तः।[5] सुखं दुःखं च परस्परं प्रति न अभावस्वरूपम्। सुखं नाम दुःखाभावः, दुःखं नाम सुखाभाव एवं न बोध्यते। सुखादेः भावपदार्थत्वं बोधयितुम् आत्मशब्दः प्रयुक्तः। एवञ्च प्रीतिशब्दस्य व्याख्यायां श्रीज्वालाप्रसादगौडः तस्य कृष्णानामकटीकायाम् अवोचत् प्रीतिः आर्जवं, श्रद्धा, अनुकम्पा, क्षमा, लज्जा, सन्तोषः, विवेकः इत्यादिविषयाणां समष्टिः।[6] अनुरूपतया पातञ्जलयोगदर्शने अपि जडप्रकृतेः विषयत्वेन सुखं स्वीकृतम्। योगसूत्रस्य साधनपादे सुखदुःखयोः हेतुविषये उक्तं- जन्म, आयुः दुःखम् च एते पुण्यद्वारा सम्पाद्यन्ते चेत् सुखकारणम् किञ्च पापद्वारा सम्पाद्यन्ते चेत् दुःखकारणम्।[7] विषयभोगकाले योगिनां निकटे सुखं दुःखं च कथम् अनुभूतं भवति अस्मिन् विषये आलोचनाप्रसङ्गे आचार्यव्यासदेवः तस्य योगभाष्ये सुखलक्षणविषये उक्तवान् विषयभोगद्वारा इन्द्रियाणां या तृप्तिः तृष्णायाः उपशान्तिः भवति तत् सुखम्।[8] अत एव सुखं भवति अनुभूतिशीलद्रव्यविशेषः यत् सुखात्मकधर्मविशिष्टसत्त्वगुणस्य स्वरूपम्।

साङ्ख्ययोगमते चेतनपुरुषः यथा नित्यः तथैव त्रिगुणात्मकप्रकृतिरपि नित्या। पार्थक्यं केवलं पुरुषः भवति अपरिणामी प्रकृतिः भवति परिणामशीला। सत्कार्यवादानुसारं प्रकृतेः परिणामसम्भूतानां समस्तवस्तूनां स्वरूपाणि सुखात्मकता, दुःखात्मकता मोहात्मकता च। अत्र जिज्ञासा उत्पद्यते यत् अस्माकं यः सुखादेः अनुभवः जायते तेषामुत्पत्तिः कथं भवति? सत्कार्यवादसाङ्ख्यमते अस्माकं अन्तः करणेषु एव

---

4. एतदुक्तं भवति - प्रीतिः सुखम्, प्रीत्यात्मकः सत्त्वगुणः। अप्रीतिः दुःखम्, अप्रीत्यात्मको रजोगुणः, विषादः मोहः, विषादात्मकस्तमोगुणः इत्यर्थः। (सांख्यतत्त्वकौमुदी -12)
5. ये तु मन्यन्ते न प्रीतिर्दुः खाभावादतिरिच्यते, एवं दुःखमपि न प्रीतिभावादन्यदिति, तान् प्रति आत्मग्रहणम्। (सांख्यतत्त्वकौमुदी- 12)
6. अत्र प्रीतिशब्देन आर्जवश्रद्धानुकम्पाक्षमालज्जासन्तोषविवेकादीनां संग्रहः। (सांख्यकारिका/कृष्णा- 12)
7. ये ह्लादपरितापफलाः पुण्यहेतुत्वात्। (योगसूत्रम्- 2/14)
8. या भोगेष्विन्द्रियाणां तृप्तेरुपशान्तिस्तत्सुखम्। (व्यासभाष्यम् - 2/15)

सुखादेः सत्ता वर्तते किञ्च अस्मिन् अन्तः करणे वस्तुसंस्पर्शात् सुखादयः उत्पद्यन्ते। यदि अन्तः करणे सुखस्य सत्ता न स्यात्त तर्हि वस्तुसंस्पर्शेन अन्तः करणे उत्पत्तेः पूर्वम् अविद्यमानं सुखं न उत्पद्यन्ते। तस्मात् वस्तुसंस्पर्शेन अन्तः करणे सुखस्य आविर्भावः भवति। वैदान्तिकमते सुखं जागतिकवस्तुनः स्वाभाविकधर्मः नास्ति, सुखं ब्रह्मस्वरूपस्य अन्तर्गतम्। किन्तु साङ्ख्यदर्शने एवं न स्वीक्रियते, यतो हि वेदान्तदर्शने अज्ञानं त्रिगुणात्मकं स्वीकृतम्। अज्ञानस्य परिणामः अयं जागतिकविषयः त्रिगुणात्मकः नास्ति एतत् युक्तिपूर्णं नास्ति। साङ्ख्यमते सुखं वस्तुनः धर्मः। सुखं यदि वस्तुनः धर्मः न स्यात् तर्हि अन्तःकरणे सुखस्य आविर्भावः अपि न स्यात्।

अत एव साङ्ख्यदर्शनानुसारं सुखं भवति त्रिगुणात्मकप्रकृतिविषयः, यस्य वस्तुसंस्पर्शेन बुद्ध्यादयः अन्तः करणे उत्पद्यन्ते। पुरुषप्रकृत्योः मध्ये संयोगवशात् यथा पुरुषे कर्तृत्वं, प्रकृत्यां चेतनताम् आरोप्य पुरुषः स्वं कर्तारं प्रकृतिः स्वं चेतनं च मनुते। अनुरूपतया अन्तःकरणे उत्पन्नसुखादिविषयाः आरोप्यन्ते किञ्च पुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। एवञ्च वक्तुं शक्यते यत् यतो हि सुखं दुःखं च भोग्यविषयाः तस्मात् भोग्यविषयस्य भोक्तृरूपेण सुखदुःखमोहात्मकवस्तुभिन्नः पुरुषः स्वीकृतः। यतो हि पुरुषः सुखदुःखमोहात्मकवस्तुनः भोक्ता तस्मात् भोक्तृपुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। अत एव संयोगकाले पुरुषे सुखादिविषयाः आरोप्यन्ते चेदपि सुखादिविषयाः प्रकृतेः।

## न्यायवैशेषिकदर्शने सुखस्य अवधारणा-

भारतीयास्तिकदर्शनेषु न्यायवैशेषिकदर्शनसम्प्रदायः सुप्रसिद्धः अन्यतमश्च। न्यायवैशेषिकदर्शनयोः समानतान्त्रिकसत्त्वे अपि न्यायदर्शनस्य मुख्यालोच्यविषयः प्रमाणं, वैशेषिकदर्शनस्य आलोच्यविषयः प्रमेयः पदार्थो वा। न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थेषु वैशेषिकदर्शनसम्मतपृथिव्यादयः सप्त पदार्थाः न्यायदर्शनसम्मतप्रत्यक्षादीनि चत्वारि प्रमाणानि वर्णितानि। द्रव्यादिसप्तपदार्थेषु द्वितीयपदार्थरूपेण गुणः प्रसिद्धः। रूपरसादिभेदेन गुणाः चतुर्विंशतिप्रकाराः। चतुर्विंशतिगुणेषु सुखम् अन्यतमम्। आत्मनामकपदार्थानाम् अष्टसु विशेषगुणेषु सुखम् अन्यतमम्। केषाञ्चन आचार्याणां मते अहं सुखी इति अनुव्यवसायात् यस्य ज्ञानस्य प्रतीतिः भवति तत् सुखम्। पुनश्च अन्याचार्याणां मते सुखम् आत्मनः विशेषगुणः, यस्य असाधारणकारणं धर्मः।[9] आचार्यः अन्नंभट्टः तस्य तर्कसंग्रहनामकन्यायवैशेषिकग्रन्थे सुखप्रसङ्गे उक्तवान् सकलप्राणिनां यत् स्वाभाविकाभिलाषस्य विषयरूपेण ज्ञायते तत् सुखम्।[10] शत्रोः

---

9. धर्ममात्रासाधारणकारणो गुणो वा सुखम्। (तर्कसंग्रहः/पदकृत्यम्- पृ.- 261)
10. सर्वेषामनुकूलतया वेदनीयं सुखम्।। (तर्कसंग्रहः- पृ.- 260)

कृते यत् अनुकूलं मित्रस्य कृते तत् प्रतिकूलम्। तस्मात् शत्रुमित्रयोः अनुकूलं यत् तत् सुखम्। अत एव ग्रन्थकारः सुखलक्षणे सर्वेषाम् इति शब्दं प्रयुक्तवान्। सकलप्राणिनां अभिलाषविषयः सुखम् इति सुखलक्षणं नास्ति। सुखत्वजातिद्वारा सुखलक्षणं कर्तव्यम्। सुखपदशक्यतावच्छेदकरूपेण सुखत्वजातिः सिध्यति किञ्च सुखत्वजातिविशिष्टं सुखम् इति वक्तव्यम्। वेदे यानि कर्माणि विहितानि तेषाम् अनुष्ठानद्वारा यः धर्मः उत्पद्यते स धर्मः सुखस्य असाधारणकारणम्। सुखमिदं आत्मनः बुद्ध्यादिषु अष्टसुविशेषगुणेषु एकम्।[11] अर्थात् सुखस्य आधारद आत्मा। बुद्धिः, इच्छा प्रयत्नश्च एते त्रयः गुणाः ईश्वरे नित्याः, जीवात्मनि अनित्याः। जीवात्मनि सुखादिगुणानां सत्त्वात् ते अनित्याः।[12] अनुरूपतया आचार्यः केशवमिश्रः तस्य दर्शनसम्मततर्कभाषाग्रन्थे सुखप्रसङ्गे उक्तवान् प्रीतिः आनन्दो वा सुखम्। सकलप्राणिनां स्वाभाविकाभिलाषस्य विषयरूपेण सुखं प्रतीयते।[13] बुद्धेः द्वेषपर्यन्तं षट् गुणाः मानसप्रत्यक्षस्य विषयाः। अर्थात् मानसप्रत्यक्षेण सुखोपलब्धिः भवति।[14]

वैशेषिकसूत्रस्य उपरि रचिते प्रशस्तपादभाष्ये कारणभेदेन चतुर्विधानि सुखानि उल्लिखितानि- सामान्यसुखं, स्मृतिसुखं, सङ्कल्पजसुखं, विद्याशमसन्तोषादिजन्यसुखम्। अन्यरीत्या स्वकीयपरकीयभेदेन अपि सुखस्य वर्गीकरणं कर्तुं शक्यते। स्वकीयसुखं स्वानुभवद्वारा उत्पद्यते। किन्तु परकीयसुखं स्वानुमानेन उपलभ्यते। पुनश्च लौकिकसुखं वैषयिकमानसिकाभ्यासिकाभिमानिकभेदेन विभज्यते।

## साङ्ख्ययोगन्यायवैशेषिकदर्शनसम्मतसुखस्य तुलनात्मकं विश्लेषणम्

उपर्युक्तसाङ्ख्ययोगन्यायवैशेषिकदर्शनसम्मतसुखस्य आलोचनायाः गभीरतया विश्लेषणं क्रियते चेत् द्रष्टुं शक्यते यत् सुखस्य स्वरूपविषये उभयदर्शने तथा वैसादृश्यं न परिलक्ष्यते, सुखस्य आश्रयविषये सादृश्यमपि न लक्ष्यते। यद्यपि साङ्ख्यदर्शने सत्त्वं, रजः, तमः च एते त्रयः गुणाः प्रकृत्या सह अन्तर्गतंसन्ताः पृथक्तया स्वभावविशिष्टद्रव्यपदार्थाः किञ्च द्रव्यपदार्थसत्त्वे अपि वैशेषिकसम्मतगुणपदार्थाः इव न सन्ति। यतो हि साङ्ख्यदर्शने वर्णितप्रकृत्याश्रितसुखात्मकदुःखात्मकमोहात्मकाः त्रिविधगुणाः किञ्च न्यायवैशेषिकदर्शने प्रतिपादितपृथिव्यादिद्रव्याश्रितगुणाः समानाः अथवा एक एव नास्ति। साङ्ख्यमते सत्त्वादिगुणाः भवन्ति द्रव्यपदार्थाः किन्तु न्यायवैशेषिकमते रूपादिगुणाः द्रव्यात् भिन्नद्रव्याश्रितगुणपदार्थाः। यथा पशोः बन्धनं

---

11. बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। (तर्कसंग्रहः- पृ.- 266)
12. बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य अनित्या जीवस्य।। (तर्कसंग्रहः- पृ. - 266)
13. प्रीतिः सुखम्। तच्च सर्वात्मनामनुकूलवेदनीयम्।। (तर्कभाषा- पृ.- 111)
14. बुद्ध्यादयः षट् मानसप्रत्यक्षाः। (तर्कभाषा- पृ.- 111)

येन रज्जुना सम्पाद्यते स रज्जुः गुण उच्यते तथैव साङ्ख्यदर्शने पुरुषबन्धनकारकत्वेन एतानि त्रिविधसत्त्वादिद्रव्याणि गुणशब्देन अभिधीयन्ते। तन्मध्ये सत्त्वगुणस्य स्वरूपं सुखात्मकम्।

साङ्ख्ययोगदर्शनस्य न्यायवैशेषिकदर्शनस्य चउ सुखस्य अधिष्ठानविषये मतभेदः परिलक्ष्यते। साङ्ख्ययोगदर्शनानुसारं सुखस्य अधिष्ठानंद त्रिगुणात्मकजडप्रकृतिः प्रकृतेः सुखदुःखमोहात्मकत्वात्। सुखादयः जडप्रकृतिविषयाः ये सृष्टेः अनन्तरं प्रकृतिपुरुषेण भोगरूपेण गृह्यन्ते किञ्च पुरुषः तेषां सुखादिविषयाणां भोक्ता। प्रकृतपक्षे सुखादिविषयः पुरुषस्य नास्ति, प्रकृतेः। प्रकृतिपुरुषयोः संयोगवशात् पुरुषे आरोप्यते। यथा पुरुषप्रकृत्योः संयोगवशात् पुरुषे कर्तृत्वं प्रकृतिमध्ये चेतनतां च आरोप्य पुरुषः स्वं कर्ता प्रकृतिश्च चेतनः मनुते।[15] सत्कार्यवादिसाङ्ख्यमते अस्माकं अन्तःकरणेषु एव सुखादिसत्ता विद्यते किञ्च अस्मिन् अन्तः करणे वस्तुसंस्पर्शेन सुखादयः उत्पद्यन्ते। यदि अन्तःकरणे सुखस्य कापिए सत्ता न विद्यते तर्हि वस्तुसंस्पर्शेन अन्तःकरणे उत्पत्तेः पूर्वम् अविद्यमानं सुखं न उत्पद्येत। तस्मात् वस्तुसंस्पर्शेन अन्तःकरणे सुखस्य आविर्भावः भवति। अन्तःकरणे उत्पन्नसुखादिविषयाः पुरुषे आरोप्यन्ते अपि च पुरुषस्य अहं सुखी, अहं दुःखी इत्येवं ज्ञानं भवति। साङ्ख्ययोगदर्शनानुसारं सुखं त्रिगुणात्मकप्रकृतिविषयः यः वस्तुसंस्पर्शेन बुद्ध्याद्यन्तः करणे उत्पद्यन्ते।

कन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखम् आत्मनः बुद्ध्याद्यष्टविशेषगुणेषु एकम्। अर्थात् सुखस्य आधारः आत्मा। बुद्धिः, इच्छा प्रयत्नश्च एते त्रयः गुणाः ईश्वरे नित्याः, जीवात्मनि अनित्याः। सुखादिगुणाः जीवात्मनि अनित्याः। जीवात्मनः विशेषगुणः सुखं यत् गुणगुणिरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। सकलप्राणिनाम् अनुकूलतया स्वाभाविकाभिलाषस्य विषयरूपेण सुखं प्रतीयते। यदा कस्यापि जीवस्य अनुकूलविषयेण सह सम्बन्धो भवति तदा स जीवः सुखमनुभवति। न्यायवैशेषिक-दर्शनानुसारं मनसा सुखोपलब्धिः भवति। बुद्धेः द्वेषपर्यन्तं षट् गुणाः मानसप्रत्यक्षविषयाः। अर्थात् सुखस्य उपलब्धिः मानसप्रत्यक्षेण भवति। एवञ्च वेदे यानि कर्माणि विहितानि तेषाम् अनुष्ठानद्वारा यो धर्म उत्पद्यते स धर्मः सुखस्य असाधारणकारणम्।

**उपसंहारः-**

उपर्युक्तालोचनातः वक्तुं शक्यते यत् साङ्ख्ययोगदर्शनानुसारं सुखं त्रिगुणात्मक-प्रकृतेः सह सम्बन्धयुक्तम्। प्रकृतपक्षे सुखादिविषयः पुरुषस्य नास्ति प्रकृतिपुरुष-संयोगवशात् पुरुषे आरोप्यते। किन्तु अपरपार्श्वे न्यायवैशेषिकदर्शने सुखं जीवात्मनः

---

15. तस्मात्तत्संयोगदचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः। (सांख्यकारिका -20)

विशेषगुणः यः गुणगुणिरूपसमवायसम्बन्धेन जीवात्मनि तिष्ठति। किन्तु साङ्ख्यदर्शने पुरुषस्य आत्मनाम्ना अभिधायकत्वे अपि सुखम् आत्मनः विषयः नास्ति, पुरुषस्य विपरीतधर्मी प्रकृतिविषयः। अत्रैव उभयदर्शनयोः द्विमतलक्षितत्वे अपि वयं द्वयोः मतयोः समन्वयं कर्तुं शक्नुमः। न्यायवैशेषिकदर्शनस्य जगतः यथार्थस्वरूपं प्रतिपादितं यत्र जागतिकपदार्थेषु आत्मा द्रव्यं किञ्च आत्मनः विशेषगुणः सुखम्। अपरपार्श्वे साङ्ख्ययोगमते यतो हि जगदिदं पुरुषप्रकृत्योः संयोगवशात् उत्पद्यते किञ्चउ बन्धनकाले पुरुषस्य सुखादिविषयाणाम् उपलब्धिः भवति तस्मात् सुखात्मकगुणः पुरुषे आरोप्यते चेदपि न्यायवैशेषिकदर्शनमिव विरोधिता न जायते। यतो हि उभयदर्शने तेषां कार्यकरणानि किञ्च सृष्टिप्रक्रियासिद्धान्तानुसारं सुखस्वरूपं यथार्थतया उपस्थापितम्।

## सन्दर्भाः


1. आचार्यः, गोविन्दः, तर्कसंग्रहः; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; 2015।
2. उपाध्यायः, श्रीवलदेवः, संस्कृतवाङ्मयस्य बृहद् इतिहासः (नवमः खण्डः); उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनौ; १९९९।
3. गोस्वामी, नारायणचन्द्रः, तर्कसंग्रहः; संस्कृतपुस्तकभाण्डारः, कलकाता; 2006।
4. गोस्वामी, नारायणचन्द्रः, साङ्ख्यतत्त्वकौमुदी; संस्कृतपुस्तकभाण्डारः, कलकाता; 2016।
5. गौडः, श्रीज्वालाप्रसादः, साङ्ख्यतत्त्वकौमुदी; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; 2019।
6. भट्टाचार्यः, विधुभूषणः, साङ्ख्यदर्शनस्य विवरणम्; पश्चिमबङ्गराज्यपुस्तकपरिषत्, कलकाता; 2008।
7. भट्टाचार्यः, समरेन्द्रः, भारतीयदर्शनम्; बुक्-सिण्डिकेट्-प्राईभेट्-लिमिटेड्, कलकाता; 2015।
8. मुसलगांवकरः, गजाननशास्त्री, साङ्ख्यदर्शनम्; चौखम्बासंस्कृतसंस्थानम्, वाराणसी; 2019।
9. रायचौधुरी, अनामिका, तर्कभाषा; संस्कृतबुक्डिपो, कलकाता; 2010।

10. वागची, दीपककुमारः, भारतीयदर्शनम्; प्रगतिशीलप्रकाशकः, कलकाता; 2020।

11. शर्मा, पूर्णचन्द्रः, पातञ्जलदर्शनम्; पश्चिमबङ्गराज्यपुस्तकपरिषत्, कलकाता; 2005।

12. श्रीवास्तवः, सुरेशचन्द्रः, पातञ्जलयोगदर्शनम्; चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी; 2021।

✦✦✦

 ISSN : 0975-1769

# योगसूत्रभगवद्गीतयोर्योगपदार्थपर्यालोचनम्

-डॉ. संजयकुमारः*


**सारः**

"अथ योगानुशासनम्" इति पातञ्जलयोगसूत्रे भाष्यकारो व्यास आह "योगः समाधिः।" तत्र तत्त्ववैशारदीव्याख्याकारो वाचस्पतिमिश्रो योगसमाधिपदे नार्थान्तरीयके इति ब्रुवन्नाह "युज समाधौ इत्यस्माद् व्युत्पन्नः समाध्यर्थो, न तु युजिर् योगे इत्यस्मात् संयोगार्थ इत्यर्थः।" संयोगार्थापि योगपदव्युत्पत्तिर्योगसूत्रेषु संभाव्यते न वेति विचारोऽत्र श्रीमद्भगवद्गीतासाहाय्येन प्रस्तूयते।


**प्रमुखशब्दाः**- कैवल्यम्, निर्वचनम्, योगः, संयोगः, समाधिः।

## आमुखम्

महर्षिः पतञ्जलिः प्रमाणविपर्ययविकल्पनिद्रास्मृतीनां चित्तवृत्तीनां सर्वासामन्यतमाया वा एकाग्रतालक्षणं निरोधं योगत्वेन परिभाषितवान्- "योगश्चित्तवृत्तिनिरोध"[1] इति। तत्र सर्ववृत्तिनिरोधे सत्यसम्प्रज्ञातः समाधिर्भवति, अन्यथा सम्प्रज्ञात इति व्यासभाष्ये विस्तरेण प्रतिपादयन् व्यासो महर्षिः "योगः समाधिः"[2] इति पदाभ्यां योगसमाधिपदे नार्थान्तरीयके इति प्रोक्तवान्। तथा च तत्र तत्त्ववैशारदीव्याख्याकारो वाचस्पतिमिश्रो योगः समाधिरिति व्यासमहर्षेर्वचनाभिप्रायं शब्दसादृश्यजन्यसन्देहहेतुकार्थसन्देहापनिनीषयेति व्याचक्षाणो युज समाधौ इति दिवादिगणस्थाद् युज्यते युज्येते युज्यन्ते इत्यादितिङन्तरूपात्मकाद्धातोरेव योगशब्दव्युत्पत्तिर्न तु रुधादिगणस्थाद् युनक्ति युङ्क्तः युञ्जन्ति इत्यादितिङन्तरूपात्मकाद् योगार्थकाद्युजिर्धातोरिति प्रत्यपद्यत- "योगः समाधिरिति, युज समाधौ इत्यस्माद्व्युत्पन्नः समाध्यर्थो, न तु युजिर योगे इत्यस्मात् संयोगार्थ इत्यर्थ"[3] इति। तथा च योगसूत्रप्रतिपादित-समाधितत्फलयोः कैवल्यहेतुकत्वात् कैवल्यपदस्य च केवलात्मत्वाभिप्रायत्वं संवीक्ष्य गीतोपनिषदादिशास्त्रप्रतिपाद्यब्रह्मभावस्वरूपयोगाद् गीतायाञ्च "समत्वं योग उच्यते" "योगः कर्मसु

---

* Ph.D., McGill University Montreal, QC Canada.

1. पातञ्जलयोगसूत्रम् 1.2
2. पातञ्जलयोगसूत्रम् 1.1
3. पातञ्जलयोगसूत्रम् 1.1 इत्यत्र व्यासभाष्यं प्रकृत्य वाचस्पतिमिश्रटीका।

कौशलम्"[4] चेत्यादिवाक्यैर्योगस्य परिभाषितत्वाद्योगसूत्रप्रतिपाद्ययोगस्वरूपं भिद्यत इति प्रतिपत्तिरपि संभाव्यते। एतस्या एव विप्रतिपत्त्याः प्रतिचिख्यासया प्रबन्धोऽयमारभ्यते।

**विषयविस्तारः**

योगः समाधिरिति पदार्थज्ञानं योगसमाधिपदार्थज्ञानेन तदर्थप्रयुक्तेतरपदार्थज्ञानेन तत्स्वरूपप्रतिपत्त्या च साध्यम्। तच्च न योगस्य युजिर्योग इति धातोर्व्युत्पत्तिसाधनं बाधतेधातुव्याख्यानस्यास्पष्टार्थत्वात्, तस्य युज समाधौ इत्यत्रापि नियोगसम्भवाच्च। पाणिनिप्रतिपादितेषु बहुषु सन्दिग्धार्थेषु धातुषु युजिर्योगे इत्यपि वर्तत एव। संयोगार्थो योगशब्दो युजिर्धातोर्व्युत्पन्नः, युजिर्धातुरेव च योगपदप्रकृतिरितीतरेतरदोषप्रसङ्गः। इतरेतराश्रयाणि च कार्याणि व्याकरणशास्त्रे न प्रकल्पन्ते। ततश्च प्रथमं योगपदार्थ एवास्पष्टः। तत्र संयोगार्थयोगशब्दव्युत्पत्तिसमर्थेतरधातावनुपलभ्यमान इतरेतरदोष आपद्यते। सम्भाव्यत एव यद् युज समाधौ इत्यतो व्युत्पन्नो योगशब्द एव युजिर्योगे इत्यत्र व्याख्याने पाणिनिना प्रयुक्तः। तस्मात् पदप्रयोगविज्ञानादृते युजिर्धातोर्व्युत्पन्नयोगपदस्यार्थ-निश्चयोऽवधारयितुमशक्यः। तस्य च योगशास्त्रतत्सम्प्रदायेषु बहुधा विनियोगदर्शनात्तत्रैव यथार्थमनुसन्धेयम्। उषर्बुधार्याः पाणिनिमतमासृत्य योगशब्दस्य त्रिधा व्युत्पत्तिं प्रकल्पयन्ति-युज समाधौ युज संयमने युजिर्योगे चेति धातुभ्यः व्युत्पादयितुं शक्यत्वात्-*yuj* of the fourth conjugation (*yujyate*), meaning "samādhi"; *yujir* of the sixth conjugation (*yunakti*), meaning ‘samādhi"; and *yuj* of the tenth conjugation (*yojayati*), meaning "to join" or "to restrain", or "to keep under control, as in yoking."[5] अत्र न व्यासस्य योगः समाधिरिति वचनं समाध्यर्थादेव धातोर्योगपदस्य व्युत्पत्त्यभिप्रायमित्यधिगन्तव्यम्, योगशास्त्रे त्रिष्वप्यर्थेषूपपत्तेः। तथा च समाधिपदस्य योगार्थत्वं स्पष्टतरं भवति। तद्धि कथं योगदर्शन उपपद्यत इत्युपरिष्टात् प्रवेदयिष्यामः।

श्रीमद्भगवद्गीतासु हि त्रिष्वप्यर्थेषु युजधातोस्ततो व्युत्पन्नस्य च योगशब्दस्य व्यवहारः संदृश्यते। तद्यथा-समाध्यर्थे

**योगी युञ्जीत सततमात्मानं रहसि स्थितः।**
**एकाकी यतचि त्तात्मा निराशीरपरिग्रहः॥**

**युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।**
**शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥**

---

4. श्रीमद्भगवद्गीता 2.48, 2.50
5. Yoga Sūtras of Patatjali with the Exposition of Vyāsa: A Translation and Commentary 1-1, page 73.

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।**
**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥**

**मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।**
**असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥**[6]

**संयमार्थेऽपि तावद् योगव्यवहारः-**

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥**

**यदाविनियतं चित्तमात्मन्येवावतिष्ठते।**
**निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥**

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।**
**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥**[7]

अप्येतत्स्याद्यत्सर्वतन्त्रस्वतन्त्रप्रज्ञा वाचस्पतिमिश्रा "योगः समाधिरिति, युज समाधौ इत्यस्माद्व्युत्पन्नः समाध्यर्थो, न तु युजिर योगे इत्यस्मात् संयोगार्थ इत्यर्थ" इति ब्रुवाणा भ्रान्ता इति। इयं भ्रान्तिः कैवल्यपदमूला स्यादिति चिन्तयामि। योगशास्त्रे हि बुद्धेर्गुणैरतिसम्पृक्तस्य विस्मृतस्वभावस्य कर्तृत्वमविद्यावशाद्भवतीति सिद्धम्। यद्यपि पुरुषो सदा मुक्तो बुद्धेर्गुणैर्न कदापि बन्धमोक्षभावौ गच्छति, तथापि दुःखहेतुभूतां त्रिगुणैरेकात्मतामिवापन्नोऽनादिवासनाविचित्रस्य त्रिगुणात्मकस्य चित्तस्य वशीभूतो जगत्प्रपञ्चे परिणीयमाने आत्मानमेव परिणीयमानमनुभवति। इयञ्चौकात्मता बुद्धिपुरुष-योरसरूपत्वेऽपि सति तयोर्नात्यन्तं विरूपत्वात् सम्भवति। पुरुषो दृक्शक्तिर्बुद्धिर्दर्शन-शक्तिरित्येतयोरेक-स्वरूपापत्तिरिवास्मिता क्लेश उच्यते।

भोक्तृभोग्यशक्त्योरत्यन्तविभक्तयोरत्यन्तासङ्कीर्णयोरविभागप्राप्ताविव सत्यां भोगः कल्पते। ततश्च कर्मफलाशयैर्मनसि वर्तमानैरात्मानमेकीकृत्यात्मानमेव बद्धं मुक्तं वा भ्रान्तिवशान्मन्यते। एतस्या एव भ्रान्त्या विमोच्य योगः प्रधानपुरुषयोर्भेदानाविष्कृत्य योगिनं बन्धाद्विमोच्य स्वरूपे प्रतिष्ठापयति। तदेव हि सत्त्वपुरुषयोरन्यतादर्शनेन पुरुषस्य बुद्धेर्गुणैरात्यन्तिको वियोगो योगेनोपदिश्यते- "तद् दृशेः कैवल्यं पुरुषस्यामि-श्रीभावः पुनरसंयोगो गुणैरित्यर्थ"[8] इति व्यासवचनात्। त्रिगुणसंयोगावसाने च पुरुषः स्वरूपप्रतिष्ठो भवति। भूयो व्यास उवाच- "तदेतेषां गुणानां मनसि कर्मक्लेशविपाक-स्वरूपेणाभिव्यक्तानां चरितार्थानां प्रतिप्रसवे पुरुषस्यात्यन्तिको गुणवियोगः कैवल्यम्,

6. श्रीमद्भगवद्गीता 6.10, 15, 19; 7.1
7. श्रीमद्भगवद्गीता 6.17-19
8. योगसूत्रव्यासभाष्यम् 2.25

तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष"[9] इति। अन्यत्र च व्यासेन बुद्धिसत्त्वस्य पुरुषस्य चोभयो: कैवल्यप्राप्तिर्व्याख्याता- "कृतभोगापवर्गाणां पुरुषार्थशून्यानां य प्रतिप्रसव: कार्यकारणात्मकानां गुणानां तत्कैवल्यम्। स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानभि-सम्बन्धात्पुरुषस्य चितिशक्तिरेव केवला, तस्या: सदा तथैवावस्थानं कैवल्यमिति,"[10] "स्वरूपप्रतिलम्भे तु तयो: कैवल्यमेव भवति कुतो भोग इति।"[11] तस्मात् सत्त्वरजस्तमोगुणेभ्यस्तदुद्भूतसृष्टिप्रपञ्चाच्च वियोगो योगशास्त्रे कैवल्यत्वेन प्रसिद्ध:। अयमेव च भाव: श्रीमद्भगवद्गीतास्वपि "तं विद्याद्दु: खसंयोगवियोगं योगसंज्ञितम्"[12] इति पदै: परिभाषित:। तस्मान्न योगस्वरूपं योगशास्त्रे गीतासु वा सर्वथा भिद्यत इति वक्तुं युक्तं प्रतिभाति।

कथं पुर्गीतायामुच्यमान: पुरुषेश्वरसंयोगो योगशास्त्रे प्रसिध्यति, तस्य कैवल्य-पदप्रतिष्ठार्थत्वव्याघातहेतुत्वात्? पुरुषेश्वरसंयोगे ह्यभ्युपगम्यमाने योगशास्त्रप्रसिद्धं कैवल्यमपि पीड्यते, कैवल्ये केवलस्य पुरुषस्य स्वरूपप्रतिष्ठाविवक्षाहेतो:। सत्यम्, किन्तु न हि योगशास्त्रे कैवल्यपदेनेश्वर: सर्वथा तिरस्क्रियते। ईश्वरप्रणिधानं हि योगशास्त्रे समाध्युपायत्वेनाङ्गीकृतम्, ईश्वरप्रणिधानस्यापि पुरुषस्य स्वरूपज्ञाने साधनभूतत्वात्। प्रणवस्य जपेन तस्यैवार्थभावनेन च योगिनश्चित्तमेकाग्रतालक्षणं स्थितिपदं लभते, ततश्चास्य परमात्मा प्रकाशते। तस्य फलं पतञ्जलिर्वदति- "तत: प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च"। तत्र व्यासस्य भाष्यं स्फुटतरं सूत्राभिप्रायं प्रकटयति- "ये तावदन्तराया व्याधिप्रभृतयस्ते तावदीश्वरप्रणिधानान्न भवन्ति, स्वरूपदर्शनमप्यस्य भवति। यथैवेश्वर: पुरुष: शुद्ध: प्रसन्न: केवलोऽनुपसर्गस्तथायमपि बुद्धे: प्रतिसंवेदी य: पुरुष इत्येवमधिगच्छति"[13] इति। स्पष्टमेवात्रेश्वरप्रणिधानात् स्वरूपोपलब्धि: पुरुषस्य दर्शिता। यद्यपि परमेश्वरेण संयोगोऽत्र पुरुषस्य नोक्तस्तथापि नेश्वरस्य स्वरूपज्ञानं प्रत्यासत्तिरूपसंयोगादृते सम्भवतीत्यस्त्येवात्र साक्षात्कारहेतु: संयोग:। वाचस्पतिमिश्रोऽत्राह- "प्रत्यासत्तिस्तु स्वात्मनि साक्षात्कारहेतुर्न परात्मनि" इति। यद्यपि स्वात्मनि साक्षात्कारहेतु:, परन्तु परमेश्वरेण प्रत्यासत्तिस्तत्स्वरूपज्ञानं च विद्यत एव। न हि गीतासु पुरुषेश्वरयोरेकत्वं क्वचिदुपदिश्यते, येन सांख्ययोगाभिमत: पुरुषसद्भाव: पीड्येत। साधर्म्यमेव तु पुरुषस्येश्वरेण प्रदर्श्यते- "पूता मद्भावमागता:" "मम साधर्म्यमागता:"[14] इत्यादिवचनात्। यत्र हि पुरुषेश्वरयो: संयोगो गीतासु

9. योगसूत्रव्यासभाष्यम् 2.25
10. योगसूत्रव्यासभाष्यम् 4.34
11. योगसूत्रव्यासभाष्यम् 2.6
12. श्रीमद्भगवद्गीता 6.23
13. योगसूत्रव्यासभाष्यम् 1.29
14. श्रीमद्भगवद्गीता 4.10, 14.2

श्रूयते, तत्र योगशास्त्रानुसारमेव प्रत्यक्चेतनाधिगमरूपा व्याख्या विधेया। योगशास्त्र इव गीतास्वपीश्वरसाक्षात्कारः पुरुषस्य स्वरूपबोधाय कल्पिष्यते। तथा च योगशास्त्रेऽपीश्वरप्रणिधानस्य समाधिलाभे समाधिफले च हेतुत्वम् "ईश्वरप्रणिधानाद्वा" "समाधिसिद्धिरीश्वरप्रणिधानात्"[15] इति द्वयोः सूत्रयोः प्रकटीकृतम्। गीतासूपदिश्यमान-मीश्वरे सर्वकर्मफलसमर्पणरूपं कर्मफलानभिसन्धिरूपं वेश्वरप्रणिधानं योगसूत्रेऽपि समानम्।

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥**

**कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।**
**जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥**

**त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।**
**कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥**

**ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
**लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥**

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**
**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥**

**युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।**
**अयुक्तः कामकारेण फले सक्तो निबध्यते॥**

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।**
**यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥**[16]

**योगसूत्राणां वयासभाष्येऽपि-**

प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण। तदभिध्यान-मात्रादपि योगिन आसन्नतमः समाधिलाभः समाधिफलं च भवतीति।[17]

ये तावदन्तराया व्याधिप्रभृतयस्ते तावदीश्वरप्रणिधानान्न भवन्ति। स्वरूपदर्शन-मप्यस्य भवति। यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गस्तथायमपि बुद्धेः प्रतिसंवेदी पुरुष इत्येवमधिगच्छति।[18]

---

15. पातञ्जलयोगसूत्रे 1.23, 2.45
16. श्रीमद्भगवद्गीता 2.48, 2.51, 4.20, 5.10-12, 18.11
17. योगसूत्रव्यासभाष्यम् 1.23
18. योगसूत्रव्यासभाष्यम् 1.29

ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा।[19]

ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मार्पणम्।[20]

तत्राशुक्लं योगिन एव फलसंन्यासादकृष्णं चानुपादानात्[21] चेत्यादि।

सम्प्रज्ञातसमाधिपरिभाषायामयं भावः पतञ्जलिना व्यासेन चोपपादितः। असम्प्रज्ञात- समाधेरङ्गभूतस्य सम्प्रज्ञातसमाधेरालम्बनत्वात्संयोगार्थं विहाय न बुद्धिगम्यमर्थमुपलभामहे। महर्षिर्व्यासः समाधिं सार्वभौमं प्रख्यापयन् विक्षिप्तभूमिवर्जं क्षिप्तादिचतसृष्वपि भूमिषु लब्धं योगपक्षे वर्तयति। तत्र वितर्कविचारानन्दास्मितानुगतः सम्प्रज्ञातसमाधिस्तैलधारावदच्छिन्नप्रत्ययप्रवाहाश्रयेणालम्बनीभूतं प्रत्ययं वस्तु वा प्रद्योतयति। अत्र सम्प्रज्ञातसमाधौ हि संयोगार्थादेव युजिर्योग इति धातोर्योगपदव्युत्पत्ति-र्योगसूत्रेष्वपि द्रष्टव्या। यथा व्यासः "क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" इति सूत्रे व्याचचक्षे- "ग्राह्यालम्बनोपरक्तं चित्तं ग्राह्यसमापन्नं ग्राह्यस्वरूपाकारेण निर्भासत"[22] इति। एतच्च ग्रहणग्रहीतृविषयमप्येवमेव बोध्यम्। योगपक्षे संयोगार्थः सर्वथैव तिरस्कृतः स्याच्चेद् ग्राह्यादिसमापत्तिस्तत्तद्रूपेणैव च निर्भासनं यथाधिगतसमाध्यर्थमुपहन्यात्, तथा चेष्टहानिरनिष्टप्रसङ्गश्चापतेत। न हि चित्तस्य ग्राह्याद्यालम्बनाननुगतस्य तत्तत्स्वरूपाकारनिर्भासः सम्भवति। स च संयोग एव, न किञ्चिदन्यत्। न चायमविद्याजनितसत्त्वपुरुषान्यताख्यात्यभावरूपाविवेकाग्रह-निबन्धनास्मिताख्यक्लेशत् वेन संशयितव्यः, तस्य त्रिगुणात्मिकप्रकृतिप्रपञ्चेन पुरुषस्वरूपादत्यन्तविविक्तेनापि दृश्येन दृक्शक्तेः पुरुषस्यैकात्मतेवेत्युक्तेः। सम्प्रज्ञात-समाधौ तु प्रत्ययनिबन्धनां वितर्कविचाराद्यालम्बनचतुष्टयानुगतां स्वरूपानुभवशून्यां स्थितिं योगिनः प्राप्नुवते। न त्वस्मिताक्लेशसम्भवास्मितारूपः पुरुषस्य तद्विपरीतधर्मस्य प्रधानस्य तत्प्रपञ्चस्य वेतरेतराध्यासरूपो भ्रमः।

यत्तु गीतासु "समत्वं योग उच्यत" इति योगस्य परिभाषा कृता, सापि न योगसूत्रमतं विरुणद्धि। गुणैर्वियुक्त एव तु पुरुषः कर्तृत्वाभिमानरहितः कर्मफलानासक्तश्च सिद्ध्यसिद्ध्योः समत्वं भजते। न हि त्रिगुणप्रवृत्तस्य कामक्रोधलोभमोहादिभि-र्बलादपह्रियमाणस्य कर्मफलेष्वासक्तस्य पुरुषस्य समत्वमुपयुज्यते। तस्मादेवोक्तम्- "योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यत"[23] इति। साम्यावस्थैव गुणानां पुरुषस्य कैवल्ये हेतुः। यदपि च "योगः

19. योगसूत्रव्यासभाष्यम् 2.1
20. योगसूत्रव्यासभाष्यम् 2.32
21. योगसूत्रव्यासभाष्यम् 4.7
22. योगसूत्रव्यासभाष्यम् 1.41
23. श्रीमद्भगवद्गीता 2.48

कर्मसु कौशलम्" इत्युक्तम्, तदप्यविरुद्धम्; तत्रापि सुकृतदुष्कृतयोः परिहारस्य विवक्षितत्वात्। समाहितचित्त एव तु योगी धर्माधर्मात्मककर्मस्वनासक्तः फलसंन्यासाद् कर्मभिर्न बध्यते। अयं भावश्च व्यासेन "कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्" इति सूत्रे स्फुटं दर्शितः "तत्राशुक्लं योगिन एव फलसंन्यासादकृष्णं चानुपादानादिति। अस्तु तावत् सम्प्रज्ञातसमाधौ संयोगबुद्धिः। असम्प्रज्ञातसमाधौ तु केवलस्य पुरुषस्य स्वरूपप्रतिष्ठैव योगसूत्रेषु प्रतिपाद्यत इति चेन्न, व्यासेन समाधिलाभः समाधिफलं च भवतीत्युक्तेः। तथा च व्यास आह- "ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा।" अथ चान्यत्रापि- "ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मार्पणम्।" न च गीतासु परमगुरावीश्वरे सर्वकर्मभावसमर्पणार्थे पुरुषेश्वरसाक्षात्कारार्थे एव वा योगो भवतीत्युच्यते। तत्रापि पतञ्जलेः योगश्चित्तवृत्तिनिरोधः इति लक्षणानुसारिणी वागुपलभ्यत एव, "यत्रोपरमते चित्तं निरुद्धं योगसेवया"[24] इति।

अत्र प्रश्नः सम्भवति- योगसूत्रेषु समाध्युपलब्धिर्नेश्वरप्रणिधानमात्राश्रया श्रूयते, वाशब्देनान्येषु साधनेषु सत्सु यस्येश्वरप्रणिधानं भक्तिरूपं सहजं स्यात्, स ईश्वरप्रणिधानमाचरतु। अपरे पुनर्यथासम्भवं यथाशक्ति चापरोपायप्रवृत्ताः समाधिं प्राप्स्यन्ति। परन्तु गीतासु तु भक्तिरूपमीश्वरप्रणिधानमेव प्रधानं मतम्। सत्यम्, परन्तु गीतास्वप्यभ्यासवैराग्ययोरुपदेशः- "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" "अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय"[25] इति। यत्त्वीश्वरप्रणिधानस्य प्राधान्यं गीतास्वभिप्रेतं तदपि योगसूत्राविरुद्धमेव, अर्जुनस्य व्युत्थितचित्तत्वात्। अर्जुनो हि स्वजनमोहवशङ्गतः स्वधर्मपालनविमुखो "न च शक्नोम्यवस्थातुं भ्रमतीव च मेमनः" "कार्पण्यदोषोपहतस्वभाव"[26] इत्यादिशब्दैश्चित्तस्यानवस्थितत्वं भ्रान्तत्वं च व्यवृणोत्। योगसूत्रेषु हि व्युत्थितचित्तेभ्यो जनेभ्यस्तपः स्वाध्यायेश्वरप्रणिधानं वैशिष्ट्येन प्राधान्येन चोपदिष्टम्। भाष्यकारो व्यासः साधनपादस्योपोद्घात आह- "उद्दिष्टः समाहितचित्तस्य योगः, कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यत"[27] इत्युक्त्वा "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग" इति सूत्रं व्याख्यातुमुपचक्रमे। अयं हि क्रियायोगः समाधिभावनार्थः क्लेशतनूकरणार्थश्च इति पतञ्जलिर्द्वितीयेऽध्याये प्रास्तावीत्। अत्र वाचस्पतिमिश्रोऽप्याह "अभ्यासवैराग्ये हि योगोपायौ प्रथमे पाद उक्तौ, न च तौ व्युत्थितचित्तस्य द्रागित्येव सम्भवत"[28] इति। अर्जुनस्य व्युत्थितचित्तत्वं परीक्ष्यैव भगवता कृष्णेन यथोपयुक्तः सांख्ययोग उपदिष्टः। "अनित्याशुचिदुः खानात्मसु

---

24. श्रीमद्भगवद्गीता 6.20
25. श्रीमद्भगवद्गीता 6.35, 12.9
26. श्रीमद्भगवद्गीता 1.30, 2.7
27. योगसूत्रव्यासभाष्यम् 2.1
28. योगसूत्रव्यासभाष्ये तत्त्ववैशारदी 2.1

नित्यशुचिसुखात्मख्यातिरविद्या"[29] इति योगसूत्रमाधृत्य मिथ्याज्ञानेन स्वजनेषु हतेष्वस्मज्जीवनस्याप्यानर्थक्य- प्रसङ्गभावोऽर्जुने दृश्यते- सत्सु तेष्वहमप्यस्म्यसत्सु च तेषु नाहमपीति।

असम्प्रज्ञातसमाधावेव हि कैवल्यानुभूतिर्योगिनः श्रूयते, न तु सम्प्रज्ञातसमाधौ। सम्प्रज्ञातसमाधौ च संयोगार्थो योगशब्दः फलिष्यतीति न पातञ्जलवैयासिक-सिद्धान्तविरोधः। न हि योगशास्त्रेणात्यन्तिक एकवाद प्रस्तुतः। तत्र सदा मुक्तस्य पुरुषस्य स्वरूपं केवलत्वेन तदेव च योगाभ्यासेन प्राप्यमिति बहुधा स्पष्टम्।

**सन्दर्भाः**

सांख्ययोगदर्शनम् अर्थात् पातञ्जलदर्शनम् (पातञ्जलरहस्य-तत्त्ववैशारदी-योगवार्तिक-भास्वती-सांख्यप्रवचनादिसमन्वितम्); गोस्वामी दामोदरदासः शास्त्री (सम्पादकः); चौखम्भा संस्कृत संस्थान, वाराणसी; 1990।

श्रीमद्भगवद्गीता 'शङ्करानन्दी' व्याख्यासहिता; श्रीवासुदेव- लक्ष्मणः पणशीकरः (सम्पादकः); चौखम्बा सुरभारती प्रकाशन, वाराणसी; 1989।

Arya, Usharbudh. 1986. Yoga Sūtras of Patañjali with the Exposition of Vyāsa: A Translation and Commentary. The Himalayan International Institute of Yoga Science and Philosophy of the U.S.A., Honesdale, Pennsylvania.

✦✦✦

29. योगसूत्रम् 2.5

 ISSN : 0975-1769

# कठोपनिषद्दिशा अध्यात्मयोगस्वरूपपरामर्शः

- प्रलय-नन्दी*

**शोधसारः**- कठोपनिषदि आख्यायिकामाध्यमेन आत्मविज्ञानस्य साधु प्रतिपादनं दृश्यते। तत्राभ्यन्तरे अध्यात्मयोगस्य विषयेऽपि विचारः अवलोक्यते। प्रस्तुते प्रबन्धे तस्याध्यात्मयोगस्य स्वरूपादिविषये शाङ्करभाष्यदिशा विचारो विहितः। अध्यात्मयोगस्य उल्लेखः दर्शनशास्त्रेषु प्रायेण सर्वत्रैव दृश्यते किन्तु किं तस्य स्वरूपमिति कथञ्च तत्र प्रक्रियेति विषये विचारावसरो दृश्यते। अत्र प्रबन्धे शाङ्करभाष्यदिशा अध्यात्मयोगस्य किं स्वरूपमिति प्रथमतः प्रतिपादितंतदनु तत्र का प्रक्रियेति सविस्तरं वर्णितम्। तत्र परिशीलनावसरे लौकिकजीवने अध्यात्मयोगस्य किं प्रयोजनमिति विषयमाश्रित्य श्रीमद्भगवद्गीतादिग्रन्थदिशा आलोचनं प्रस्तुतम्। अन्तिमे च अध्यात्मयोग-निर्विकल्पकसमाध्योः सादृश्यवैसादृश्य-सम्भावनामादाय तुलनात्मकम् अध्ययनं प्रस्तुतम्।

**प्रमुखशब्दाः**- आत्मा, जीवः, ब्रह्म, योगः, समाधिः।

## आमुखम्

"एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात्, सद्वा न जिहासितं, जिहासितं वाशक्यसमुच्छेदम्"[1] इति वचनदिशा नूनं जगति वर्तते किञ्चिद्दुःखं यन्निरसनाय दृश्यते जनानां शास्त्रेषु प्रवृत्तिः। एतेषु च शास्त्रेषु सर्वोत्तमं वेदान्तशास्त्रं, यतोऽत्रैवातिविस्तृततया सारल्येन च वर्ण्यते आत्मतत्त्वम्, यद्धि मोहमयाजगतो मुक्तौ मूलभूतम्। नामरूपाभ्यामेव जगदिदं निर्मितम्, तदुच्यते-

**"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।**
**आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥"**[2] इति।

एवम्भूताद्विचित्राज्जगतो मुक्तिरेव मोक्षपदाभिधेया। अस्या एव मूलम् आत्मतत्त्वम्। परन्तु आत्मविद्याया अतिसूक्ष्मत्वात् साधारणतः स्थूलमतयः संसारिणो नात्र प्रवर्तन्ते।

---

* शोधच्छात्रः, संस्कृत-दर्शन-विभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्, पश्चिमवङ्गः।

1. सा.त.कौ. पत्राङ्कः- 05
2. स.र.उ.- 3.23-3.24

अतोऽस्याः सारल्येनावगमार्थं कृष्णयजुर्वेदीयकाठकोपनिषदि आख्यायिकामाध्यमेन आत्मतत्त्वं प्रस्तूयते। तत्र च सुकुमारमतीनां संसारिणां प्ररोचनार्थम् आख्यायिकैका प्रस्तूयते। तत्र दृश्यते बालो नचिकेतास्तृतीयवररूपेण आत्मतत्त्वं वृणीते। यमेन प्रदर्शितेऽपि पुत्रादिप्रलोभने नचिकेता अचलः सन् "तवैव वाहास्तव नृत्यगीते"[3]-इत्यादि ब्रुवन् सर्वमपि प्रलोभनं तिरस्कृत्यात्मज्ञान एव दृढचेता अभूत्। अथ यम आत्मतत्त्वोपदेशं प्रारेभे। एतस्मिन्नवसर एवाध्यात्मयोगविषयो यमेन प्रत्यपादि, एनमेवाध्यात्मयोगमाश्रित्य कठोपनिषद्दिशा एको विचारः प्रस्तूयते।

## शोधपद्धतिः

प्रकृतप्रबन्धे अध्यात्मयोगस्य विषये विमर्शात्मकम् अध्ययनं प्रस्तूयते। अध्यात्मयोगस्य किं स्वरूपमिति विषये बहुत्र मतभेदा अवलोक्यन्ते। अतः प्रथमतोऽत्र विविधग्रन्थदिशा अध्यात्मयोगस्य संक्षिप्तं समीक्षणं विहितम्। कृते च समीक्षणे अध्यात्मयोगः काचित् प्रक्रियेति अवबोध्यते। अत्र तस्याः प्रक्रियायाः तथा तत्र स्थितानां सर्वेषामपि पर्यायाणां सविस्तरं परिशीलनं कृतम्। निर्विकल्पकसमाधिरेव अध्यात्मयोग इति केचन आचार्याः प्रतिपादितवन्तः। अतोऽत्र प्रबन्धे अध्यात्मयोगस्य निर्विकल्पकसमाधेश्च तुलनात्मकम् अध्ययनं विहितम्।

## अध्यात्मयोगपरिचयः

जीवो ब्रह्मैव नापरः इति सर्वभूतेषु विराजमान आत्मा एक एव तथापि मोहावेशात् सर्वाण्यपि भूतानि पृथक् पृथग्भान्ति संसारिणाम्। एवं द्वैतबुद्धेः कामक्रोधलोभमोहादयः, एतेषां विद्यमानत्वाच्चअयमेव लोको नास्त्यपरः परलोक-इत्याकारिका बुद्धिः, अतश्च परमात्मावाप्तेश्च्युतिः, ततश्च जननमरणचक्र आवृत्तिः। तदुक्तं-

**न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।**
**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे।।**[4] इति।

अस्माच्चक्रान्मुक्तेरुपाय आत्मविज्ञानम्, अस्मिञ्जाते सति जीवात्मनः परमात्मनि लयः, लये च मोक्षः। अत्र जीवात्मनः परमात्मनि विलये या प्रक्रिया, तस्यामेका स्थितिरध्यात्मयोगः। श्रुतिः, मननं निदिध्यासनमिति तत्रावस्थाः। आदौ वेदान्तश्रवणं, ततो मननं तदनु विषयेषु विक्षिप्तस्य चित्तस्य प्रतिसंहरणम्, ततश्च तस्यात्मनि समाधानम्। अत्रेदं समाधानमेव अध्यात्मयोगपदेनाभिधीयते। तथाहि भाष्यकारैः प्रतिपादितं

---

3. क.उ.- 1/1/26
4. तत्रैव- 1/2/6

"विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोग"[5] इति। अर्थात् प्रकृतस्थले अध्यात्मयोगपदेन समाधानं समाधिर्वा विवक्षिता। यद्यपि अन्यत्र स्थलेषु श्रीमद्भगवद्गीतादिषु[6] योगपदेन ज्ञानमुच्यते, तदनुसारञ्चात्र अध्यात्मयोगपदेन आत्मविषयकं ज्ञानमित्यर्थो लभ्यते, तथापि प्रकृते भाष्यानुसारम् अध्यात्मयोगपदं समाधिपरकमिति मत्वा प्रतिपादनं क्रियते।

**प्रयोजनम्**

अथ प्रश्नो ननु किमर्थोऽयमध्यात्मयोग इति। एवं सत्युच्यते जननमरणसन्ततेः संसारात् मुक्तेरुपाय आत्मविज्ञानमेव। परन्तु संसारिणां कृते आत्मविज्ञानं हि खपुष्पायितम्, यतो हि संसारिणामिन्द्रियाणि स्वभावत एव बहिर्मुखानि हिंसितानि च कृतानि। अतस्तानि केवलं बाह्यविषयानेव पश्यन्ति नान्तरात्मानम्। अत उक्तं-

**पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्।**
**कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥**[7] इति।

एवं भेदबुद्धिस्ततश्च आत्मानं पृथक्-पृथक् पश्यन्हि भिन्नात्मतामर्थात् शरीरभेदमेव आप्नुवन्ति। यदा च पृथग्बुद्धिस्तदा नानात्वदर्शनात् जन्ममरणप्राप्तिः। अत उक्तं-

**यदेवेह तदमुत्र यदमुत्र तदन्विह।**
**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥**[8] इति।

अस्मान्मुक्तेर्हेतुः आत्मविज्ञानम्, आत्मविज्ञाने च प्राप्तव्ये अन्यतम उपायोऽध्यात्मयोगः। अतः साधनीयोऽध्यात्मयोगः।

यच्चैतत् आत्मविज्ञानं तद्धि परमुत्कृष्टञ्च। अतो नैतद्येन केनचिद् उपदेष्टुं शक्यम्, नापि येन केनचिद्बोद्धुं शक्यम्।[9] आत्मतत्त्वोपलब्धौ तावत् सर्वान्तिमः पर्यायोऽध्यात्मयोगः। तावत्पर्यन्तं गमनात् प्राग् आदौ पूर्वतनावस्था यथाक्रमं सम्भूयन्ते।

---

5. द्रष्टव्यम्- क.उ, शा.भा.- 1/2/12
6. श्रीमद्भगवद्गीतायां योगशब्दस्य ज्ञानरूपार्थे प्रयोगो यथा-"स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः। ..." (4.3) इत्यादि। अत्र शङ्कराचार्येण योगशब्दस्य ज्ञानमित्यर्थः कृतः। एवमन्यद्यथा- "...। तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।"(2.50)-अत्रापि शङ्कराचार्येण योगशब्दस्य बुद्धिरूपार्थो व्याख्यातः। एवमन्यत्रापि अन्वेष्टव्यम्।
7. क.उ.- 2/1/1
8. तत्रैव- 2/1/10
9. "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः॥" (क.उ.- 2/1/7)

अथोच्यते- "आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्य"[10] इति। एवं निदिध्यासनात् प्राक् श्रवणं मननञ्च। परन्तु एतेभ्यः प्राक् शमादिषट्कसम्पत्तिरपेक्षिता।[11] शमादिभिः सह इहामुत्रार्थफलयोगविरागस्तथा बाह्यमाभ्यन्तरञ्चेति उभयविधमपि शौचमपेक्षितम्।[12] द्वयोः शुद्ध्योर्मध्ये अन्तः शुद्धिरत्र अवश्यं प्रयोजनम्, यतो हि परिष्कृतदर्पणवत् शुद्धे चित्ते आत्मचित्रं प्रतिबिम्बते। एवं बाह्यमप्यपेक्षितं, यतः- "आचारहीनं न पुनन्ति वेदाः"।[13]

अध्यात्मयोगस्य आवश्यकताविषये कठोपनिषदि रथरूपक-कल्पनायामपि प्रतिपादनं दृश्यते। तत्रोच्यते-

**यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।**
**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥**[14] इति।

अत्र विज्ञानवान्-इत्यस्यार्थः कृतो भाष्यकारेण- "विज्ञानवान् प्रगृहीतमनाः समाहितचित्तः"[15] इति। चित्तं समाहितं यस्य स समाहितचित्तः, अर्थाद्यस्य चित्तस्य समाधानं जातं स विज्ञानवान्। तस्यैव च इन्द्रियाणि वश्यानि भवन्ति। अथात्र समाधानमेव अध्यात्मयोगः, एवञ्च अध्यात्मयोगकारणादेव इन्द्रियाणां वशीकरणं सम्भवति। अपि च यस्यायम् अध्यात्मयोगो जातः स एव सदा शुचिः भवन् विष्णोः परमं पदं प्राप्नोति, यस्मात्पुनश्च्युतिर्न सम्भवति। तदनु अप्रच्युतः सन् संसाराद्विमुक्तो भवति।[16]

**अध्यात्मयोगविचारः**

एवमन्ततः संसारान्मुक्तिहेतोः परमात्मावश्यं प्राप्तव्य इति समायातम्। स च दुष्प्राप्यः, तस्य अत्यन्तविशिष्टकर्मसाध्यत्वात् अत्यन्तविशिष्टज्ञानसाध्यत्वाच्च। एवं परमात्मनो दुष्प्राप्यत्वञ्च तत्प्राप्तिसाधनानां कठिनत्वादिति वक्तुं शक्यते। एवम् अध्यात्मयोगस्याधिगमे कियत्काठिन्यमिति अनुमातुं शक्यते। "विषयेभ्यः प्रतिसंहृत्य

---

10. बृ.उ.- 2/4/15
11. "तस्माच्छान्तो दान्त उपरतः तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्...॥" (तत्रैव- 4/4/23)
12. "शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
    मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिरथान्तरम्॥" (ग.पु., 213.37- 213.38)
13. दे.भा.- 11/2/1
14. क.उ.- 1/3/6
15. तत्रैव, शा.भा.- 1/3/6
16. "यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः।
    स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥" (क.उ.- 1/3/8)

चेतस आत्मनि समाधानम् अध्यात्मयोग"[17] इति भाष्यकृता अध्यात्मयोगो व्याख्यातः। समाधिश्च द्विविधो भवति, सविकल्पको निर्विकल्पकश्च। सविकल्पकसमाधौ ज्ञातृज्ञानादिभेदोपगमम् अनपेक्ष्यैव अद्वितीयवस्तुनि चित्तवृत्तेरवस्थितिर्भवति। निर्विकल्पकसमाधौ तावत् ज्ञातृज्ञानादिभेदापगमो भवति तदनु अद्वितीयवस्तुनि चेतसोऽतितराम् एकीभावेन अवस्थितिर्जायते। उच्यते-

**निरन्तराभ्यासवशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा।**
**तदा समाधिः सविकल्पकवर्जितः स्वतोऽद्वयानन्दरसानुभावकः॥**[18] इति।

**ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।**
**निवातदीपवच्चित्तं समाधिरभिधीयते॥**[19] इति च।

अथ "श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतवः॥"[20] इति ध्यानपर्यायत्वेनैव अन्यत्रान्यत्र विद्वद्भिरध्यात्मयोगो वर्णितः। वेदान्तसारे तावद्ध्यानं नाम अद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाह इति प्रतिपादितम्। ध्यानविषयेऽन्यत्रोच्यते-

**ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः।**
**ध्यानशब्देन विख्याता परमानन्ददायिनी॥**[21] इति।

अर्थादत्र ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिरेव ध्यानमुच्यते। अत्र तावदियं निरालम्बतया स्थितिरेव यत्प्रतिपाद्यते तदवस्था अत्युत्कृष्टा। सा नितरां संयमादिना लभ्यते। श्रुतिवाक्येभ्यः श्रवणत आरभ्य सर्वेऽपि पर्याया अत्र सम्भवन्ति। आदौ श्रुतिवाक्यश्रवणम्, ततः सङ्कल्पात्तथा ततो जातान् सर्वान् अपि कामांस्त्यक्त्वा विषयेषु विक्षिप्तानि इन्द्रियाणि विनियम्य शनैः शनैः मनस आत्मसंस्थीकरणम्- एतत्सर्वमपि अध्यात्मयोगे अवश्यम्भावि। गीतायामेतद्विषये बहुत्र उल्लेखो दृश्यते।[22] अथ यस्य मनस आत्मसंस्थीकरणम्, तत्प्रति शमदमादीनामपि प्रयोजकत्वम्। तत्र

---

17. द्रष्टव्यम्, क.उ., शा.भा.- 1/2/12
18. वि.चू.- 362
19. अ.उ.- 35
20. वि.प्र.सं.- 1/1/1
21. ते.बि.उ.- 1/36
22. "सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेन्द्रियग्रामं विनियम्य समन्ततः।
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥"
(गीता-6.24,25,26;2.58)

दमपर्याये बाह्येन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यो निवर्तनं भवति। निवर्तितेषु बाह्येन्द्रियेषु ततः अन्तरिन्द्रियस्यापि मनसः श्रवणादि-व्यतिरिक्तविषयेभ्यो निवर्तनं भवति। अयं पर्यायः शमः। एतदनन्तरं बाह्येन्द्रियाणाम् अन्तरिन्द्रियस्य च श्रवणादि-व्यतिरिक्तविषयेभ्य उपरमणमथवा उपरतिर्भवति, अयं पर्याय उपरतिरित्युच्यते। एवं शमदमोपरतिवत् तितिक्षाश्रद्धयोरपि अध्यात्मयोगे उपादानत्वम्। वेदान्तसारे तितिक्षा शीतोष्णादिद्विन्द्वसहिष्णुता, उक्तञ्च गीतायाम्-

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥**[23] इति।

श्रद्धा हि गुरुवाक्येषु वेदान्तवाक्येषु च विश्वासः। विश्वासस्य कार्यतापत्तिरेव श्रद्धापदाभिधेया। अस्या अपि अध्यात्मयोगेप्रयोजकत्वम्। यतः श्रद्धां विना न किञ्चित्तत्त्वमधिगतं भवति।[24] एभ्यः पूर्वं प्रथमतो मोक्षेच्छा आवश्यकी, यतो मुमुक्षुत्वं विना एतेषामेकमपि न सम्भवति। अतो मुमुक्षुत्वस्यापि आवश्यकता अवधार्या।

अथैतासु शमदमादिषु सम्पत्तिषु एकं समाधानम्, एतत् समाधानमपि वस्तुतो भाष्यकारेण अध्यात्मयोगपदेन प्रतिपाद्यते। तथाहि- समाधानं नाम निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः। तत्र भाष्यकारेण प्रतिपादितं यद्विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोग इति। अर्थात् समाधाने विषयेभ्यः चेतसो निग्रहो भवति, ततश्च ब्रह्मविषयकेषु आगमेषु तस्य निगृहीतस्य मनसः संनियोजनम्। भाष्यकारेण प्रतिपादितोऽध्यात्मयोगो वस्तुतो विषयेभ्यः प्रतिसंहृतस्य चेतस आत्मनि संनियोजनमेव। एवमत्र विषयेभ्यश्चेतसः प्रतिसंहरणमिति प्रथमपर्याय-रूपेण प्रतिपाद्यते। अयमेव पर्यायः शमदमादीनां समष्टिरूपः। एवं विषयेभ्यः प्रतिसंहृते मनसि, आत्मनि समाहिते च सति परमात्मावाप्तिः। अतो मनसैव आत्माधिगन्तव्य इति समायातम्। एतत्सर्वं परित्यज्य यो हि नानात्वबुद्धियुक्तो जीवति स जन्ममृत्युचक्रे पतितो भवति। अत उच्यते-

**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।**
**मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति॥**[25] इति।

भाष्यकारेणात्र अध्यात्मयोगपदेन समाधिरेव उच्यते किन्तु कीदृशः समाधिः, सविकल्पकोऽथवा निर्विकल्पक इति विशेषः कोऽपि न निर्दिष्टः। तत्र सविकल्पकेऽपि

23. तत्रैव- 2/14
24. "श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥" (भ.गी.- 4/39)
25. क.उ.- 2/1/11

मनस आत्मनि सन्निवेशो जायते परन्तु तत्र ज्ञातृज्ञानादिभेदः वर्तमानो भवति। अथ निर्विकल्पकेऽपि मनस आत्मनि समाधानं जायते परन्तु तत् अतितरामेकीभावेन, अपि चात्र ज्ञातृज्ञानादिभेदोऽपि अपगतो भवति। अत्र कः समाधिरिति विषये गोपालयतीन्द्रे उच्यते- "अध्यात्मयोगपदेनात्र निदिध्यासनमुच्यते"[26] इति। अतो निदिध्यासनविषयेऽत्र विशिष्टमालोचनं प्रस्तूयते।

## अध्यात्मयोगो निर्विकल्पकसमाधिश्च

चित्तस्य विज्ञेयात्मना निश्चलावस्थानं समाधिः, स द्विविधः- सविकल्पको निर्विकल्पकश्च। तत्र निर्विकल्पकस्तावत्- ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीय-वस्तुनि अद्वितीयवस्त्वाकाराकारितायाः चित्तवृत्तेः अतितरामेकीभावेनावस्थानम्। अर्थान्निर्विकल्पके ज्ञातृज्ञेयज्ञानानां त्रिपुटेर्लयो भवति। एवं सविकल्पकेऽपि निगृहीतस्य मनसो ज्ञेयात्मना अवस्थाने अद्वितीयतत्त्वस्य साक्षात्कारो भवति, तत्रापि ज्ञातृज्ञेयज्ञानानां त्रिपुटेर्लयो जायते, परन्तु सविकल्पकसमाध्यनुभवादुत्पन्नः संस्कारस्तत्र अवतिष्ठते। यस्मात्कारणात् सत्यपि अद्वितीयतत्त्वदर्शने ज्ञातृज्ञेयज्ञानत्रिपुटेः भानस्य सम्भावना तिष्ठत्येव। अतः सविकल्पकसमाधेः परमपि पुनः ज्ञातृज्ञेयज्ञानभेदबुद्धिर्जायत एव। निर्विकल्पके न तथा, अत्र हि ज्ञातृज्ञेयज्ञानत्रिपुटेः नाशेन सह पूर्वपूर्वसविकल्पक-समाध्यनुभवादुत्पन्नस्य संस्कारस्यापि सर्वतोभावेन लयो भवति। एवं सत्येव निगृहीतस्य चेतसो निवातदीपवदचलस्य च अखण्डचौतन्यमात्रमवलम्ब्य अवस्थानं सम्भवति, तच्चावस्थानं निर्विकल्पकसमाधिरित्युच्यते।[27]

## अध्यात्मयोगप्रक्रिया

अध्यात्मयोगप्रक्रियाविषये काठकोपनिषदि बहुषु स्थलेषु प्रतिपादितं दृश्यते। तत्रैकं स्थलं यथा-

**यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।**
**ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि।।**[28] इति।

यच्छेद् उपसंहरेत्, क उपसंहरेत् इति चेद् विवेकी पुरुषः। विवेकोऽत्र नित्यानित्यवस्तुविवेकः, तादृशविवेकसम्पन्न एव पुरुषो वागादीनि नियच्छेदिति प्रतिपाद्यते। वाग् अर्थात् वाचं मनसि उपसंहरेत्। वाक् इति पदं मन्त्रे उपलक्षणमात्रम्। वस्तुतस्तेन वागादीनि इन्द्रियाणि विवक्षितानि, तानि मनसि नियच्छेत्। एतानि च विषयेभ्यो

26. द्रष्टव्यम्, क.उ.,गो.य.टी.- 1/2/12
27. "ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम्।
निवातदीपवच्चित्तं समाधिरभिधीयते।।" (अ.उ.- 35)
28. क.उ.- 1/3/13

निगृहीतानि स्युरित्यपि बोध्यम्। विषयाश्चात्र रूपादयः। मनो हि बुद्धौ उपसंह्रियते। इयं च बुद्धिः प्रकाशस्वरूपा अपि च अन्तरिन्द्रियस्य मनसस्तथा बाह्येन्द्रियाणां व्याप्यत्वात् आत्मपदवाच्या अपि। ततश्च बुद्धिर्महत्तत्त्वे प्रथमजे उपसंह्रियते। तदनन्तरं च प्रथमजो महत्तत्त्वरूपो हिरण्यगर्भ आत्मा निर्गुणे परमे ब्रह्मणि उपसंह्रियते। अयम्प्रकारः अध्यात्मयोगस्य।

अत्र विषयेभ्यः प्रतिसंहृतानि इन्द्रियाणि यदा मनसा सह आत्मनि अवतिष्ठन्ते, किञ्च बुद्धिरपि व्यापारेषु न चेष्टते तदा सा अवस्था परमा गतिरित्युच्यते। इयमेव च गतिः योग इत्युच्यते। तथाहि काठकोपनिषदि द्वितीयाध्याये तृतीयवल्ल्यां–

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**
**बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्।**
**तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।**
**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।।**[29] इति।

अस्या अवस्थायाः प्रतिपादनं कृतं भाष्यकारेण– "सर्वानर्थसंयोगवियोगलक्षणा हीयमवस्था योगिनः। एतस्यां ह्यवस्थायामविद्याध्यारोपणवर्जितस्वरूपप्रतिष्ठ आत्मा"[30] इति। अर्थादेषा अवस्था हि सर्वेषामपि अनर्थसंयोगानां वियोगरूपा। तथा च अविद्याद्यध्यारोपशून्य आत्मा स्वस्वरूप एव प्रतिष्ठितो भवति। अस्यामवस्थायां विवेकी पुरुषोऽप्रमत्तो भवति, यतो बुद्ध्यादिचेष्टानामभावात् प्रमादसम्भावनाया अपि अभावः।

**उपसंहारः**

"ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।।"[31] इत्येतदात्मविज्ञाने जाते न हि अन्यत् किमपि ज्ञातव्यमवशिष्यते। एतेनास्य आत्मविज्ञानस्य परमोत्कृष्टत्वं ज्ञायते। अध्यात्मयोगश्चास्मिन् आत्मज्ञाने मूलभूतः। एतेनास्यापि अध्यात्मयोगस्य परमोत्कृष्टत्वमवधार्यम्। एवमस्मिन्नेव जीवने एभिरेव प्रतिपादितैरुपायैरन्ततः अध्यात्मयोगेन मर्त्योऽर्थात् मरणधर्मा तं परमात्मानमासाद्य अमर्त्यो भवति। एतदेव वेदान्तानुशासनम्, तदुक्तम्–

**यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।**
**अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम्।।**[32] इति।

---

29. तत्रैव– 2/3/10–11
30. द्रष्टव्यम्, क.उ., शा.भा.– 2/3/11
31. भ.गी.– 7/2
32. क.उ.– 2/3/15

अतः परमात्मावाप्तावभ्युपाय एवाध्यात्मयोगः। एवमस्मिन् प्रबन्धे कठोपनिषदि प्रतिपादितः अध्यात्मयोगो यथासामर्थ्यं विचारितः। तत्र युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

## सङ्केतसूची

1. अ.उ.-अध्यात्मोपनिषत्
2. क.उ.-कठोपनिषत्
3. ग.पु.-गरुडपुराणम्
4. गो.य.टी.-गोपालयतीन्द्रटीका
5. ते.बि.उ.-तेजबिन्दूपनिषत्
6. दे.भा.-देवीभागवतम्
7. बृ.उ.-बृहदारण्यकोपनिषत्
8. भ.गी.-भगवद्गीता
9. वि.चू.-विवेकचूडामणिः
10. वि.प्र.सं.-विवरणप्रमेयसङ्ग्रहः
11. शा.भा.-शाङ्करभाष्यम्
12. स.र.उ.-सरस्वतीरहस्योपनिषत्
13. सा.त.कौ.-साङ्ख्यतत्त्वकौमुदी

## परिशीलितग्रन्थसूची।


1. महर्षिपतञ्जलिः। (2008 ई.)। *पातञ्जलयोगदर्शनम्* (व्यासभाष्य-योगसिद्धिहिन्दी-व्याख्योपेतम्)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. मिश्रः, वाचस्पतिः। (2004 ई.)। *साङ्ख्यतत्त्वकौमुदी* (पं. ज्वालाप्रसादगौडकृत-व्याख्यासहिता)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. श्रीमच्छङ्कराचार्यः। (2004 ई.)। *उपनिषद्भाष्यम्* (आनन्दगिरिप्रभृतिटीकाभिः समलङ्कृतम्, प्रथमखण्डः)। शास्त्री, सुब्रह्मण्यः एस्.- द्राविडः, मणिः (सम्पा.)। वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशनम्।
4. श्रीमच्छङ्कराचार्यः। (1998 ई.)। *विवेकचूडामणिः* (अद्वैतामृतबोधिनीसहितः)। वाराणसीः चौखम्बा विद्याभवन।
5. श्रीमच्छङ्कराचार्यः। (2015 ई.)। *श्रीमद्भगवद्गीताभाष्यम्* (आनन्दगिरिप्रभृतिटीकाभिः समलङ्कृतम्, प्रथमखण्डः)। द्राविडः, मणिः (सम्पा.)। वाराणसी : श्रीदक्षिणामूर्ति-मठप्रकाशनम्।
6. श्रीमच्छङ्कराचार्यः। (2015 ई.)। *श्रीमद्भगवद्गीताभाष्यम्* (आनन्दगिरिप्रभृतिटीकाभिः समलङ्कृतम्, द्वितीयखण्डः)। द्राविडः, मणिः (सम्पा.)। वाराणसी : श्रीदक्षिणामूर्तिमठ-प्रकाशनम्।
7. सदानन्दः। (2019 ई.)। *वेदान्तसारः* (विद्वन्मनोरञ्जनीव्याख्यासहितः)। वाराणसी : मोतीलाल बनारसीदास।

# निरुक्ततः सामाजिक - सांस्कृतिकः प्रतिबिम्बम् अवगमनानि च

-आतिरा. टि.*

**शोधसारः**- निरुक्तनामकस्य वैदिकव्याख्यानग्रन्थस्य सांस्कृतिकम् अवगमननमेव अस्मिन् प्रबन्धे विचार्यते। निरुक्ते वैदिकपदानां व्याख्यानमेव यास्केन निरूप्यते। व्याख्यानावसरे पदसंबद्धान् विषयानपि यास्कः प्रतिपादितवान्। अनेन निबन्धेन यास्कव्याख्यानस्य भाषायां विद्यमानानां पदानाम् अर्थानां च विशकलनं कर्तुं शक्यते। एवं विशकलनं कृत्वा निरुक्ते व्याख्यानस्य पदस्य सांस्कृतिकप्राधान्यं किमिति विचार्यते। निरुक्तकालीनसमाजे वर्णव्यवस्था, आश्रमव्यवस्था, स्त्रीणां सामूहिकस्थितिः, कला, चिकित्साविधिः, प्रशासनिकव्यवस्था इत्यादिविषयाणां चर्चा अस्मिन् प्रबन्धे क्रियते। निरुक्तकालीनसमाजः धर्मशास्त्रकालात् पूर्वमेवेति अवगम्यते।

**प्रमुखशब्दाः**- निरुक्तम्, सामाजिक- सांस्कृतिकं प्रतिबिम्बम्, प्राचीन-पूर्व संस्कृतिः, वैदिकसाहित्यम्।

## आमुखम्

वैदिकभाषायाः क्लिष्टपदानाम् अर्थप्रतिपादनं भवति निघण्टोः लक्ष्यम्। सङ्गृहीतानां पदानां शास्त्रानुसारं निर्वचनसहितम् अर्थविस्तारं कृत्वा निरुक्तं वेदपाठनक्रियां सरलीकरोति। संस्कृतकोशाणां सामान्यप्रकृतिः इयमेव यत्। संस्कृतकोशा इतरविज्ञानकोशा इव एकैकस्य पदस्य अर्थव्याख्यानं कुर्वन्ति। एतेन अर्थव्याख्यानेन अस्य कोशस्य रचनाकालः, जनजीवनं च अवगन्तुं शक्यते। एवं कौशाः समाजस्य विषये कोशकारस्य दृष्टिकोणमपि प्रकटीकुर्वन्ति। निरुक्तं पठित्वा तस्य रचनाकालः एवं तस्मादुपलब्धाः सांस्कृतिकसङ्केः च अवगम्यन्ते अस्मिन् प्रबन्धे।

भारतीयचरित्रस्य मुख्यभागो अधुनाऽपि अज्ञातरूपेण वर्तते। निरुक्ततः सामाजिक-सांस्कृतिकप्रतिबिम्बम् अवलोक्य ग्रन्थस्य कालनिर्णयः तथा भारतीयचरित्रस्य सामाजिकान्तर्भावः अत्र विचार्यन्ते।

---

* गवेषिका, श्री शङ्कराचार्य संस्कृत सर्वकलाशाला, कालटि, केरलम्।

**शोधपद्धतिः**

अस्मिन् प्रबन्धे निरुक्तनामकवैदिकव्याख्याग्रन्थात् उपलब्धसांस्कृतिकविषयाणां विश्लेषणात्मकदृष्ट्या समीक्षणं क्रियते।

**परिणामः चर्चा च**

संस्कृतभाषायाः सौभाग्यमस्ति संस्कृतकोशसाहित्यम्। बहवः कोशग्रन्थाः संस्कृतभाषायां लिखिता उपलभ्यन्ते। तेषु वैदिकनिघण्टुरेव प्राचीनतमः। किन्तु निघण्टुः केवलम् एकं पुस्तकं नास्ति। अद्य उपलभ्यमानः निघण्टुः, निघण्टुपरम्परायाः अन्तिमः क्रमः भवतीति वि. के. राजवाडे एवं के. त्रिपाठी च अभिप्रेतः।[1] निरुक्तं निघण्टोः व्याख्यानम्। तस्य कर्ता यास्काचार्यः। निघण्टुरपि यास्ककृतमित्युच्यते। निरुक्तस्य प्रारम्भे यास्केन तस्य पूर्वाचार्याणां नामानि प्रतिपादितानि सन्ति यत् केचन अङ्गीकुर्वन्ति अन्ये केचन निराकुर्वन्ति च[2]। एतेन ज्ञायते यत् यास्कात् पूर्वमेव निरुक्तरचना आरब्धेति।

निरुक्तकर्ता यास्कः इति विषये विवादो नास्ति। कालान्तरे संस्कृतकोशकाराः आदरेण यास्कं तथा तस्य कृतिं निरुक्तं च प्रतिपादयन्ति।[3] किन्तु यास्क इति नाममात्रं विहाय यास्कसंबन्धि न किमपि तथ्यं ज्ञायते इदानीम्। तस्य जीवनकालः, जन्मस्थानम्, सर्वमपि अज्ञातं वर्तते। 14 ईसवीयशतकीयः दुर्गाचार्यः यास्कनिरुक्तस्य भाष्यं रचितवान्।[4] रुडोल्फ रोथ नाम जर्मन्-पण्डितः निघण्टु समेतस्य निरुक्तस्य संशोधितसंस्करणं 1852 तमे वर्षे अकरोत् (*Yāska's Nirukta together with that Nighaṇṭavas*)। तदनन्तरं निरुक्तस्य बोम्बे संस्करणं 1912 तमे वर्षे तदा, लक्ष्मणसरूपमहोदयेन 1920 तमे वर्षे गंभीरेण आमुखपठनेन सह निघण्टुसमेतस्य निरुक्तस्य संशोधितसंस्करणम्, आंग्लभाषायां निरुक्तस्य अनुवादं च कृतवान् (*The Nighaṇṭu and Nirukta: The Oldest Indian Treatise on Etymology, Philosophy and Semantics*)। सः तस्य ग्रन्थस्य आमुखे यास्कस्य जीवनकालान्वेषणाय प्रयतते। यास्कस्य व्याख्यानरीतिं तथा प्लाटोनामकग्रीक्दार्शनिकस्य

---

1. रिचा अभ्यंकर्, *एवल्यूषन् ओफ सान्स्कृत् लेक्सिकोग्राफि*, डेक्कान् कोलज् पोस्ट ग्राज्वेट् अन्ट रिसेर्च इन्स्टिट्यूट्, पूने, 2014. पृ.सं. 1.
2. तत्रैव.,
3. ज्ञानविमलागणिः तस्य टीकायां सूचितवान् इति एम्.एम्. पात्कर् *हिस्टरि ओफ सान्स्कृत् लेक्सिकोग्रफि* नाम ग्रन्थे उक्तम्। पृ.सं. 74.
4. एम्.एम्. पात्कर् महोदयस्य मते दुर्गाचार्यः सि. इ. 14 शतकीयः भवति। स्कन्धस्वामिना रचितं निरुक्तभाष्यमपि एम्. एम्. पात्कर् प्रतिपादितवान्।

व्याख्यानरीतिं च अवलोक्य प्लाटो यास्कात् आधुनिकोऽस्ति इति निगमनो लक्ष्मणसरूपेण निर्दिष्टम्। प्लाटो ईसापूर्वचतुर्थशतकात् पूर्वकालिको नास्ति। अतः यास्को ईसापूर्व-चतुर्थशतकात् पूर्वकालिको तथा ईसापूर्वसप्तमशतकात् परं च भवेदिति लक्ष्मणसरूपस्य मतम्।[5] कपिल्कपूरः तस्य ग्रन्थे (Conceptualising India - The Given and Borrowed) यास्कं ईसापूर्वसप्तमशतकात् पूर्वकालिक इति परिकल्पितवान्। तस्य मते यास्कस्य जीवनकालः ईसापूर्वनवमशतकं भवति। निरुक्ते बुद्धस्य बौद्धदर्शनस्य च अप्रतिपादनमस्ति इति अयं निगमनस्य आधार इत्यपि तेन उक्तम्।[6] यद्यपि कालिदासादयः कवयः अपि बुद्धं तथा तस्य दर्शनं च नैव सूचितवन्तः, अनेन कारणेन कालिदासोऽपि बुद्धात् पूर्वकालिक भवितुं शक्नोति। वैदिकसंस्कृतेः अन्तिमकाले यास्कनिरुक्तस्य रचना कृता इति बहवः पण्डिता अभिप्रयन्ति। निरुक्तस्य व्याख्यानभाषा लौकिकसंस्कृतभाषा भवति। लौकिकसंस्कृतभाषायाः प्रचारोऽयं निरुक्तस्य रचनाकाले एव समारब्ध इति सूचना अनेन प्राप्यते। वैदिकभाषायाः अपचयावस्थायां वैदिक-साहित्यस्य रक्षणार्थमेव निरुक्तस्य रचना जाता इति विद्वांसः चिन्तयन्ति। अतः वैदिकभाषायाः अन्तिमकाले लौकिकसंस्कृतभाषायाः प्रारम्भे निरुक्तस्य प्रतिष्ठाऽभूत् (बि. सि. इ. 800- 700) इति एम्. एम्. पात्कर् अभिप्रैति।[7] उपीन्दर् सिंहमहोदया तस्याः प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रनामके ग्रन्थे, निरुक्तं ईसापूर्वषष्टशतकस्य कृतिरिति उद्घोषितवती।[8]

एवं यास्कनिरुक्तस्य कालः वैदिकभाषायाः अन्तिमकाले लौकिकसंस्कृतभाषायाः प्रारम्भे च इति निर्धारितः। अस्मिन् काले प्रचलितवर्णव्यवस्था, आश्रमव्यवस्था, कला, स्त्रीणां सामाजिकस्थितिः, चिकित्साविधिश्च क्रमेण विचार्यन्तेऽत्र।

### वर्णव्यवस्था

वृञ्- आच्छादने इति धातोः निष्पन्नं पदं भवति वर्णः। वर्णः, वर्णनं च पदस्यास्य अर्थः। अत्र वर्णः इत्यर्थेन शुक्लनीलादयः वर्णा एव यास्केन सूचिताः।

---

5. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, मोतिलाल् बनार्सिदास्, डेल्हि, रिप्रिन्ट 1984. पृ. सं. 54.
6. तेन उक्तं-
   'Not to mention Buddha is not to know Buddha, and not to know Buddha is to have been born before Buddha.'
7. एम्. एम्. पात्कर्, *हिस्टरि ओफ सान्स्कृत् लेक्सिकोग्रफि*, मुन्षिरां मनोहर्लाल्, 1981. पृ.सं. 5.
8. उपीन्दर् सिङ्, प्राचीन, पूर्व मध्यकाल *इन्द्या चरित्रम्*, डि. सि. बुक्स्, कोट्टयं, 2019. पृ.सं. 52.

अन्यत्र वृत्र-शब्द-व्याख्यानावसरे ब्राह्मण-दास-पणि-बिलादि-प्रयोगाः दृश्यन्ते।[9] किन्तु यास्कः मनुजं वर्णव्यवस्थायां प्रत्यक्षरूपेण कदापि न विभाजितवान्। तेन आर्य-अनार्यभेदेन नरः विभाजितः। ऋ-गतौ इति धातोः ण्यच्-प्रत्यये कृते आर्यशब्दस्य निष्पत्तिः। आर्यः श्रेष्ठः सदाचारयुक्तश्च भवति। आर्यः ईश्वरपुत्रः इति निरुक्तवचनम्। आर्याणां निवासोऽपि यास्केन प्रतिपादितः।

शवतिर्गतिकर्मा काम्बोजेष्वेव भाष्यते, विकारमस्यार्येषु भाषन्ते शव इति।[10]

काम्बोजदेशे अन्त्येष्टिसंस्कारः प्रचलति। अन्त्येष्टिसंस्कारः आर्याणां विधिः भवति। अतः काम्बोजवासिनः आर्याः भवन्तीति यास्कमतम्। काम्बोजदेशः इदानीं कम्बोडिया इति नाम्ना विश्रुतम्। दुर्गाचार्यमते काम्बोजः काबूल् भवति। एवमेव अनार्याणामपि उल्लेखो निरुक्ते दृश्यते।

**कीकटो नाम देशो अनार्यनिवासः।**
**कीकटाः किंकृताः किं क्रियाभिरिति प्रेप्सा वा।।**[11]

कीकटः कश्चन प्रदेशः तत्रत्या निवासिनः अनार्याश्च। कथं ते अनार्या इत्यपि उक्तं यास्केन। कीकटदेशीयो कुत्सितवृत्तियुक्तो भवति। ते सदाचारं न अनुवर्तते। सदाचारेण किं प्रयोजनमिति तेषां विचारः। अतः तत्रत्या निवासिनः अनार्या इति यास्केन परिकल्प्यते। कीकटदेशस्य कुप्रशस्तिः इत साहित्यरचनासु अपि द्रष्टुं शक्यते।[12] निरुक्ते नैघण्टुककाण्डे तृतियाध्याये पञ्चजन इति प्रयोगो दृश्यते।

पञ्चजना मम होत्रं जुषध्वम् (ye holy five tribes, enjoy my sacrifice)[13]

अत्र व्याख्याने यास्कः पूर्वमतद्वयं उद्धृतवान्। तयोरेकः पञ्चजन इत्यनेन गन्धर्व-पितर-देव-असुर-रक्षांसि इति निर्दिशति। द्वितीयो औपमन्यवः, तस्य मते पञ्चजन इत्यनेन चत्वारो वर्णाः निषादः पञ्चमः च भवति। दुर्गव्याख्यायां यास्कः औपमन्यवम् अनुसरतीत्युक्तम्। किन्तु यास्कः वर्णशब्दव्याख्याने अपि ब्राह्मणादि वर्णं न सूचितवान्। अतः ब्राह्मणादिवर्णविभजनं यास्कस्य काले नास्ति इति नैव

---

9. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 53.
मन्दवर्णा ब्राह्मणवादाश्च। दासो दस्यतेः। पणिः पणनात्। बिलं भरं भवति बिभर्तेः।
10. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 45.
11. क्षेमराज- श्रीकृष्णदासश्रेष्ठि, *निरुक्तं निघण्डु समुपेतम्*, श्रिवेङ्कडेश्वर् मुद्रणयन्द्रालयम्, 1969. पृ. सं. 531.
12. रामाशिष् पाण्डेय्, यास्ककालीन भारतवर्ष्, प्रबोध संस्कृत प्रकाशन्, रांची, 2009. पृ. सं. 46.
13. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 42.

उक्तम्। ऋग्वेदस्य दशममण्डले पुरुषसूक्ते प्रतिपादितोऽयं वर्णविभजनं यास्केन अज्ञातमिति चिन्तायाः अवकाशो नास्ति।[14] स्थिते वर्णव्यवस्थायां अस्य अप्रतिपादनत्वेन यास्ककालीन समाजे अयं व्यवस्थितिः धर्मशास्त्रकाले इव उत्कृष्टरूपेण न विद्यते इत्यनुमीयते। औपमन्यवः, यास्कस्य पूर्विको समकालिको वा निरूक्तकारो पञ्चजनेति पदस्य व्याख्यानेन प्रकटितं यत् कश्चन यागस्य फलं भोक्तुं चत्वारो वर्णाः पञ्चमः निषादः च योग्याः इति।[15] अयं स्थितिः धर्मशास्त्रानन्तरकाले नैव दृश्यते। लक्ष्मण् सरपस्य मतमपि एततेव, सः धर्मशास्त्रोक्तमिव वर्णव्यवस्था यास्ककालीन समाजे न दृश्यते इत्युक्तवान्। धर्मशास्त्राणि वर्णक्रमेण नरजीवनं, नियमानि, आचाराणि च श्रुति-स्मृति-सदाचारान्याधारीकृत्य स्पष्टमुल्लिखति। किन्तु वेदसंहिता अयं विषयाणि संग्रहितापि धर्मशास्त्राणामिव प्राधान्येन न परिकल्पयति इति उपीन्दर् सिङ् अभिप्रैति।[16]

## आश्रमव्यवस्था

आश्रमव्यवस्थायाः प्रत्यक्षप्रतिपादनो निरुक्ते न दृश्यते। ब्राह्मणं प्रतिपातिदावसरे विद्या सम्बन्धि चर्चा क्रियते यास्केन। विद्या तस्याः रक्षणाय ब्राह्मणं याचितवती।[17] आचार्य इति पदस्य व्याख्यानेऽपि कश्चन शिक्षासम्प्रदायस्य सूचना लभ्यते। विद्याभ्याससम्प्रदायस्य अस्तित्वम् अनेन सूचनया अनुमितुं शक्यते। एतत् तु ब्रह्मचर्याश्रमसङ्कल्पमिव न मन्यते। तथा विवाहविषया, गृहपर्यायाः च अन्यत्र प्रतिपादिताः। निरुक्ते गृहस्य द्वाविंशतिपर्यायाः सन्ति। तेषु एकः दमो भवति। यास्केन उक्तं-

दमूना दममाना वा। दानमना वा। दान्तमना वा। अपि वा दम इति गृहनाम। तन्मनाः स्यात्। मनो मनोतेः।[18]

अस्मिन् समाजे गृहाः सुलभाः सन्ति इति चिन्तयामः। विद्याभ्यासं, वैवाहिकजीवितं च अस्मिन् काले आसीत् इति सूचना प्राप्यते, किन्तु आयुर्दैर्घ्यानुसारं एते न निश्चितमित्युपलभ्यते। वानप्रस्थसन्यासाश्रमविषया न नाममात्रमपि निरुक्ते दृश्यन्ते। वनगामीत्यर्थे वनगुशब्दप्रयोगो वानप्रस्थाश्रमस्य सूचनां प्रस्तौति। एवं परिव्राजकः, दण्डी इत्यादिपदानि सन्यासिरूपस्य स्मरणं करोति। उपीन्दर् सिङ् स्वग्रन्थे प्राचीन,

---

14. दशममण्डलस्य रचना अनन्तरकाले कृतमिति वादो वर्तते। किन्तु वैदिकसाहित्यस्य अन्तिमकाले विरचितयास्कनिरुक्तात् पूर्वमेवेति नास्ति सन्देहः।
15. निरुक्ते क्षत्रियपदं नास्ति राजपदप्रयोगो दृश्यते, तदा प्रकल्वित् इति पदोऽपि व्यापारीत्यर्थे दृश्यते, शूद्रशब्दं नास्ति दासः दृश्यते।
16. उपीन्दर् सिङ्, *प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रम्*, पृ.सं. 59.
17. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 19.
18. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 76.

पूर्व मध्यकाल इन्द्या चरित्रे प्रस्थावितवती यत्–

समाजजीवनस्य उत्कृष्टव्यवस्थितिम् एव प्रतिनिधीकरोत्याश्रमव्यवस्था। प्राचीनभारते जनजीवने आश्रमव्यवस्थायाः अनुवर्तनं धर्मशास्त्रकालमिव प्रकटं न।[19]

अतः निरुक्ते लब्धसङ्केतः समाजः अपरिष्कृतो भवति इति वक्तुं शक्यते।

## कला

गृहपदस्य विंशतिपराः पर्यायाः प्रयुक्ताः सन्ति। गृहनिर्माणकलायाः प्रयोगो यास्कस्य काले अस्तीति अनुमातुं शक्यते। कारु इति पदस्य प्रयगोऽपि निरुक्ते अस्ति। कारु नाम शिल्प इत्यर्थः।[20] शिल्पविद्यायाः प्रचारो अत्रानुमीयते। नृत्त–संगीत–चित्रादयः अपि आसन् अस्मिन् काले इति रामाशिष–पाण्डेयः स्वग्रन्थे यास्ककालीन भारतवर्षे उक्तवान्।[21] किन्तु तेषां सूचना निरुक्तात् न प्राप्यते।[22]

## स्त्रीणां सामूहिकस्थितिः

निरुक्ते दायाविभागस्य विचारे स्त्रीणां प्रतिपादनं दृश्यते। उक्तं यथा–

इत्यभ्रातृकायाः उपयमन प्रतिषेधः प्रत्यक्षः। पितुश्च पुत्रभावः। पिता यत्र दुहितुरप्रत्ताया रेतः सेकं प्रार्जयति। संदधात्यात्मानं संगमेन मनसेन। ज्येष्ठं पुत्रिकायामित्येके।[23]

अभ्रातृकायां ज्येष्ठपुत्रिकायाः उपयमन प्रतिषेधः अत्र उक्तः। भर्तृकुलस्य सन्तानेन पोषणं भवति अस्मिन् काले स्त्रीणां नियोगः। तस्याः दायाद्यस्य अवकाशो नास्ति। किन्तु अभ्रातृकायाः दायाद्यस्य अवकाशोऽस्ति। अतः सा विवाहितापि पितृगृहे एव वसति। अतः सा विवाहाय युक्ता न, अत्र पुत्रीद्वयमस्ति चेत् ज्येष्ठ–पुत्रिकायाः एव उपयमनप्रतिषेधः इत्यपि उक्तम्। दायाद्ये भ्रातृसहितायाः कोऽपि अवकाशो नास्ति। सा विवाहानन्तरं भर्तृगृहे वसति च।

## चिकित्साविधिः

दैवतकाण्डे द्वितीयाध्याये कश्चन वैदिकश्लोकमुद्धृत्य यास्कः औषधसस्यानि उक्तवान्।[24] परितः विद्यमानानां सस्यानाम् औषधमूल्यनि निरुक्तकाले एव ज्ञातानीति

---

19. उपीन्दर् सिङ्, *प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रम्*, पृ.सं. 59.
20. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ.सं. 112. कारुरहमस्मि।
21. रामाशिष् पाण्डेय्, यास्ककालीन भारतवर्ष्, पृ.सं. 243.
22. चित्र कलायाः विषये नास्तीत्यपि वक्तुं न शक्यते, हारप्पायां चित्रलिपि दृष्टत्वात्।
23. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ. सं. 41.
24. लक्ष्मण् सरूप्, निघण्टु एन्ट निरुक्त, पृ. सं. 168.

अवगम्यते यास्कवचनेन। किन्तु तत्र भिषक्-शब्दस्य तेनार्थेन अन्ये शब्दाः च न दृश्यन्ते। युगत्रयात् पूर्वं मनुजाय ईश्वरेण सृष्टमिदं औषधान्यित्यपि यास्कवचनम्।[25] यास्कस्य अनेन परामर्शेन तस्य काले औषधानि प्रचारे सन्ति चेदपि भिषजः व्यवधानं तथा औषधज्ञानस्य स्रोतः च अज्ञातमेवेति अनुमीयते। औषधज्ञानस्य स्रोतः ईश्वरमित्यारोपणेन यास्कोऽस्मिन् विषये परिमिज्ञानवानेवेति मन्यते।[26] निरुक्तस्य अष्टमे अध्याये ओषधीनां देवः के इति चर्चा अस्ति। शाकपूणेः मते अग्निरेव ओषधीनां देवः।[27]

## प्रशासनिकव्यवस्था

मनुष्याः प्रत्येकं संघेषु विभत्य जीवन्तीति निरुक्ते सङ्केतो लभ्यते। एतत् विना प्रशासनिकव्यवस्थायाः आकारो नैव निरुक्तकाले दृष्टः। राजपदस्य प्रयोगेण[28] साकं राज्यपदमपि यास्केन प्रयुक्तम्। युद्धमिति पदस्य षट्चत्वरिंशत् पर्यायाः निरुक्ते सन्ति। जनसंघानां परस्परस्पर्धा अस्मिन् काले सर्वसाधारणं भवति स्म। एवं परस्परस्पर्धया केषांचन सघानाम् अन्तर्धानं, केषांचन सघानाम् उदयः, केषांचन तु मेलनं च अभवदिति चरित्रकारैर्व्यक्तीक्रियते।[29] इयं स्पर्धा भवति निरुक्तकारेणापि युद्धेन निर्दिष्टा इत्यनुमीयते। अस्त्रोपयोगस्य सूचना अस्त्रवैविधियस्य वर्णनया अवगम्यते किन्तु युद्धे अस्य प्रयोगस्य प्रमाणं न प्राप्तम्।

पूर्वमेव उक्तं मनुष्याः प्रत्येकं संघेषु विभज्य जीवन्तीति। इमे सघा जनपदमिति पदेन यास्कः प्रतिपादिताः।[30] वैदिककाले प्रधानतया वैदिककालस्य अन्तिम भागे (बि.सि.इ. 1000-500) जनाः प्रत्येकं जनपदेषु विभजिताः आसनिति चरित्रकारैरभिप्रेतम्। बहवः जनपदाः सन्ति। ते परस्परं स्पर्धया केचन तु विवाहेन वा मिलित्वा बृहज्जनपदानाम् (महाजनपदमित्यपि) उखभवः इति रोमिला थापर् सूचितवती। तथा षोडश महाजनपदाः ईसापूर्व 600शतके रूपीकृताः सन्ति। तेषां नामानि यथा- काशि, कोसलः, अंगः, मगधः, वज्जि, मल्लः, चेदिः, कुरुः, पाञ्चालः, मत्स्यः, शूरसेनः, अश्मकः, अवन्तिः, गान्धारः, काम्बोजः, महावस्तु च। केषांचन महाजनपदानां नामानि निरुक्ते यास्केन प्रतिपादितानि इति दृश्यते। किन्तु सः देश इति नाममेव

---

25. तत्रैव, या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये...
26. सामान्यतः अज्ञातविषयाणि मनुष्याः ईश्वरे आरोपयति।
27. लक्ष्मण् सरूप्, निघण्डु एन्ट निरुक्त, पृ. सं. 136.
28. तत्रैव. राजा राजतेः।
29. उपीन्दर् सिङ्, *प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रम्*, पृ.सं. 366.
30. लक्ष्मण् सरूप्, निघण्डु एन्ट निरुक्त, पृ. सं. 39. -जानपदिषु विद्यातः पुरुषविशेषो भवति...

अत्र उपयुक्तवान्। काम्बोज–कीकट–मगधादयः देशाः यास्केन प्रतिपादिताः। तेषु काम्बोजमगधादयः महाजनपदेषु भवन्ति। अतः निरुक्तस्य रचना महाजनपदकाले भवति इत्यनुमातुं न शक्यते। महाजनपदानां सामान्यस्वभावः चरित्रकारैरुक्तः। ते सुव्यवस्थितघटनायुक्तसामूहिकस्थितिं प्रतिनिधीकुर्वन्ति।[31] निरुक्ते यास्कपरामर्शेन लब्धसंकेतः समूहः उत्कृष्टव्यवस्थितियुक्तः न। अयं तु लघु- घटनायुक्तसमाजः एव। कीकटादि–अन्यदेशानां नाममपि दृष्टत्वात् महाजनपद्स्य पूर्वकालमेव निरुक्ते सूचितमिति अनुमीयते। काम्बोजमगधादिदेशाः पूर्वं कश्चन जनपदो भवतीति मन्यते। ते महाजनपदकाले अपि प्रबलरूपेण स्थिता आसन्। मगधः महाजनपदेषु प्राचीनतमो भवतीति उपीन्दर सिङ्–महोदयायाः मतं एतत् साधूकरोति।[32] एतेषां संकेतानाम् आधारेण यास्कनिरुक्ते प्रतिनिधीकृतः समाजः ईसापूर्वसप्तमशतकस्य अन्तिमपादस्येति अनुमीयते।

## उपसंहारः

निरुक्तात् लब्धसामूहिकसूचनया अस्य कालः ईसापूर्वसप्तमशतकस्य अन्तिम–पादमिति अनुमीयते। अयं सप्तमशतकीयो ग्रन्थो केवलं वेदस्य पोषको व्याख्यानो नैव। किन्तु प्राचीनभारतीयचरित्रस्य अन्धकारयुगान् पठितुम् अपि पर्याप्तोऽयं ग्रन्थो मन्यते। निरुक्तात् प्राप्तसामूहिक–सांस्कारिकसूचनया ग्रन्थोऽयं जनपदकालस्येति अवगम्यते। लौकिकसंस्कृतस्य प्रारम्भं, वैदिकसंस्कारस्य अन्तञ्च ग्रन्थोऽयं प्रतिनिधी–करोति। अनन्तरकाले समूहे वर्णाश्रमव्यवस्थायाः सुस्थापने धर्मशास्त्रस्य स्वाधीनं वेदसाहित्यादधिकं भवतीत्यपि निरुक्तपठनेन प्रतीयते।

## सन्दर्भाः


- अभ्यंकर्, रिचा, (2014), एवल्यूषन् ओफ सान्स्कृत् लेक्सिकोग्रफि, डेक्कान् कोलज् पोस्ट ग्राज्वेट् अन्ट रिसेर्च इन्स्टिट्यूट्, पूने।
- चक्रवर्ती, उमा, (2003), ए ग्लेन्स् अट् द वेड् वर्ण इन् द वेदिक् लिटरेचर्, आन्नल्स् ओफ् भण्डार्कर् ओरियन्टल् रिसेर्च इन्स्टिट्यूट्, पूने।
- पाण्डेय्, रामाशिष्. (2009), यास्ककालीन भारतवर्ष्, प्रबोध संस्कृत प्रकाशन्, रांची।


---

31. उपीन्दर् सिङ्, *प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रम्*, पृ.सं. 59.
32. तत्रैव, पृ.सं. 366.

- पात्कर्, एम्.एम्. (1981), हिस्टरि ओफ सान्स्कृत् लेक्सिकोग्रफि, मुन्षिरां मनोहर्लाल्।
- श्रीकृष्णदासश्रेष्ठि, क्षेमराज (1989), निरुक्तं निघण्डु समुपेतम्, श्रीवेङ्किडेश्वर् मुद्रणयन्द्रालयम्।
- सरूप्, लक्ष्मण् (1984), निघण्टु एन्ट निरुक्त, मोतिलाल् बनार्सिदास्, डेल्हि, रिप्रिन्ट।
- सिङ्, उपीन्दर् (2019), प्राचीन, पूर्व मध्यकाल इन्द्या चरित्रम्, डि.सि. बुक्स्, कोट्टयं।


✦✦✦

# महाभाष्यसिद्धान्तरत्नप्रकाशदिशा महत् कष्टं श्रितः इत्यत्र वृत्तिनियामकत्वविमर्शः

- उत्तमघोषः*

**शोधसारः** - अत्र सिद्धान्तरत्नप्रकाशदिशा महत् कष्टं श्रित इत्यत्र महत्-कष्टशब्दयोः समासानन्तरं श्रितशब्देन समासः अथवा आदौ कष्ट-श्रितशब्दयोः समासानन्तरं महच्छब्देन समासः, अथवा त्रयाणां युगपत्समासः इति पक्षत्रयं विचारितम्। त्रिष्वपि पक्षेषु कुत्र महत आत्वं प्राप्नोति कुत्र स्वरभेदो भवतीत्यादयो विषया विस्तरेण प्रतिपादिताः। तदनु अत्र सुप् सुपा इत्यनेन समासः सम्भवति वा, तत्र च सुब्गतैकत्वम् आश्रीयते न वेति विचारोऽप्यत्र प्रस्तुतः। तदनन्तरं प्रकृते सापेक्षम-समर्थवदिति न्यायस्य प्रवृत्तिरस्ति न वेति विचार्य तदभावे सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न इति न्यायस्य प्रवृत्तौ दोषाणां समाधानम्, अगुरुपुत्रादीनामिति वक्तव्यमिति वार्तिकस्य निवेशनं च विचारितम्। सर्वान्ते च वृत्तिविग्रहयोः समानार्थकत्वरूपगमकत्वमादाय समासोपपत्तिरुदाहरणान्तरसमीक्षणेन प्रदर्शिता।

**प्रमुखशब्दाः** -

आकाङ्क्षा, आकृतिः, उत्तरपदम्, प्रकृतिः, सामर्थ्यम्।

## आमुखम्

देवदत्तस्य गुरुकुलमित्यादौ कैयटेन नित्यसापेक्षत्वात्समास इत्युक्तं परन्त्वेतत्समाधानं किमोदनः शालीनामित्यादिषु न प्रवर्तते अत एवम्विधेषु स्थलेषु सर्वत्र गमकत्वादेव निर्वाहः कर्तव्य इति भाष्यादिग्रन्थसमीक्षणेन मया विचारः प्रस्तुतः।

## शोधसारः

अत्र महत् कष्टं श्रित इत्यत्र महत्-कष्टशब्दयोः समासानन्तरं श्रितशब्देन समासः अथवा आदौ कष्ट-श्रितशब्दयोः समासनन्तरं महच्छब्देन समासः, अथवा त्रयाणां युगपत्समासः इति पक्षत्रयं विचारितम्। त्रिष्वपि पक्षेषु कुत्र महत् आत्वं

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानम्, वेलुड़्मठः, पश्चिमबङ्गराज्यम्-711202।

प्राप्नोति कुत्र स्वरभेदो भवतीत्यादयो विषयाः विस्तरेण प्रतिपादिताः। तदनु अत्र सुप् सुपा इत्यनेन समासः सम्भवति वा, तत्र च सुब्गतैकत्वम् आश्रीयते न वेति विचारोऽप्यत्र प्रस्तुतः। तदनन्तरं प्रकृते सापेक्षमसमर्थवदिति न्यायस्य प्रवृत्तिरस्ति न वेति विचार्य तदभावे सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न इति न्यायस्य प्रवृत्तौ दोषाणां समाधानम्, अगुरुपुत्रादीनामिति वक्तव्यमिति वार्तिकस्य निवेशनं च विचारितम्। सर्वान्ते च वृत्तिविग्रहयोः समानार्थकत्वरूपगमकत्वमादाय समासोपपत्ति-रुदाहरणान्तरसमीक्षणेन प्रदर्शिता।

**विषयः**

**महत् कष्टं श्रितः इत्यत्र समासोपपत्तिः**

समर्थः पदविधिरित्यत्र समर्थपदग्रहणेन यत्र सामर्थ्यं तत्र समासरूपपदविधिर्भवति। एवञ्च महत् कष्टं श्रितः इत्यत्र कष्टशब्दस्य श्रयणक्रियया सम्बन्धः अस्ति तथा तद्विशेषणतया महच्छब्दस्यापि परम्परया श्रयणक्रियया सम्बन्धो वर्तते इत्यतोऽत्र सामर्थ्यसद्भावात् समासोऽस्तु इति चेन्न कष्टश्रितशब्दयोस्समासानन्तरं तेन महच्छब्दस्य समासे महत्कष्टश्रित इति स्यात् महाकष्टश्रित इति न स्यात्। एवञ्च **“हलन्ताच्च”** ( 1.2.10 ) इति सूत्रे हल्पदस्य यथा हल्समुदाय इत्यर्थः कृतः तद्वत् **“द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः”** ( 2.1.24 ) इत्यादौ आकृतिपक्षे द्वितीयापदस्यापि पूर्ववद् द्वितीयान्तपदसमुदायार्थकरणेन महत् कष्टं श्रितः इत्यत्र त्रयाणां युगपत् समास इति उच्यते चेदपि अत्रापि पूर्ववत् महत्कष्टश्रित इत्येव रूपं स्यात् महाकष्टश्रित इति महत आत्वं न स्यात्।

किमत्र सर्वथैव समासाभाव इति चेन्न यदा आदौ महच्च तत् कष्टमिति विग्रहः तदा समासो भवत्येव। तत्र कष्टशब्दमाश्रित्य आन्महतः समानाधिकरणजातीययोः इत्यनेन महत आत्वे महाकष्टशब्दो निष्पद्यते ततश्च महाकष्टं श्रितः इति विग्रहे **“द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः”** ( 2.1.24 ) इत्यनेन द्वितीया-तत्पुरुषसमासे महाकष्टश्रित इति रूपं सिध्यत्येव।

ननु महत् कष्टं श्रित इत्यत्र आदौ त्रयाणां पदानां युगपत्समासे कृते ततः तद्धितार्थोत्तरपदसमाहारे च इत्यत्र यथा उत्तरपदे परे पुनः समासविधानात्, द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् इत्याद्युक्त्या **“सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः”** ( 2.1.61 ) इत्यनेन **“विशेषणं विशेष्येण बहुलम्”** ( 2.1.57 ) इत्यनेन वा महत्कष्टशब्दयोः पुनः समासे तत्र कष्टशब्दमाश्रित्य महत आत्वे कृते महाकष्टश्रित इत्येव रूपं भवति। अत्र पूर्वापेक्षया स्वरेऽपि भेदो नास्ति तथाहि महाकष्टं श्रित इत्यत्र द्विपदतत्पुरुषपक्षे अहीनवाचकक्तान्ते उत्तरपदे **“अहीने**

**द्वितीया**"[1] ( 6.2.47 ) इत्यनेन महाकष्टेति द्वितीयान्तपदस्य पूर्वपदप्रकृतिस्वरत्वम् अर्थात् "**समासस्य**"[2] ( 6.1.223 ) इत्यौत्सर्गिकान्तोदात्तत्वं व्यवस्थापितं तेन ष्टकारोत्तरस्याकारस्य उदात्तत्वम्। त्रिपदपक्षेऽपि आदौ महत् कष्टं श्रित इति त्रयाणां समासे ततः पुनः महत्कष्टयोरवान्तरसमासे द्वितीयसमासमादाय महाकष्ट इत्यस्य समासस्येति अन्तोदात्तत्वमेव सिध्यति।

एवञ्च अत्र पक्षद्वयेऽपि रूपस्वरयोरभेदत्वेऽपि अन्यत्र महारण्यातीत इत्यादौ स्वरभेदो भवति। महच्च तदरण्यं महारण्यं, महारण्यम् अतीतः महारण्यातीत इत्यत्र अतीतेति हीनवाचकक्तान्तोत्तरपदसत्त्वात् "**अहीने द्वितीया**" ( 6.2.47 ) इति न प्रवर्तते तेन "**थाथघञ्क्तजबित्रकाणाम्**" ( 6.2.144 ) क्तान्तस्य अतीत इत्यत्र अन्तोदात्तत्वम्, तदा "**अनुदात्तं पदमेकवर्जम्**" ( 6.1.158 ) इत्यनेन शेषनिघातेन यकारोत्तस्याकारस्य अनुदात्तत्वम्। यदा च त्रयाणां समासः ततः प्रथमद्वयोः समासः तदा महारण्यातीतः इत्यत्र द्वितीयसमासमादाय समासस्य इत्यनेन यकारोत्तरस्य अकारस्य उदात्तत्वं प्राप्नोति इति भेदः।

कैश्चित् तु समासे कृते प्रधानार्थस्यैवाभिधायित्वात् त्रयाणां समासानन्तरं महत्कष्टशब्दयोः परस्परं सम्बन्धो नास्ति, पूज्यमानत्वं विशेषणविशेष्यत्वं च नास्तीति समासो न स्यादित्युच्यते तन्मतमपि न युज्यते वैयाकरणाभिमतौ जहत्स्वार्थाजहत्स्वार्थपक्षौ भगवता भाष्यकारेणैव निराकृतौ। एवं निराकृतं पक्षम् आश्रित्य समासाक्षेपः नोचित इति रत्नप्रकाशकाराशयः।

### सुब्गतैकत्वसंख्याग्रहणविचारः

ननु द्वयोरपि महत्कष्टशब्दयोः श्रितापेक्षया कर्मत्वात् श्रितशब्देन सामर्थ्यं द्वयोरप्यस्तीति कुतो समुदायस्य न समास इति चेत् सुप् सुपा इत्यत्र संख्याया विवक्षितत्वात् एकस्यैव सुबन्तस्य एकेनैव सुबन्तेन समासः, तेन बहूनां समासो न भविष्यति।

सुप् सुपेति वर्तत इति सुबिति वर्तत इत्यत्रैव तात्पर्यं श्रितादीनां कृदन्तत्वेन सुबुत्पत्तेः पूर्वमेव तैः समासस्य विधेयत्वेन सुपेत्यस्यानुवृत्तौ प्रयोजनाभावात्, द्वितीयान्तसमुदायस्य सुबन्तत्वाभावादेव तस्य श्रितशब्देन समासवारणसंभवाच्च। ननु "कृद्गृहणे गतिकारकपूर्वस्यापि ग्रहणम्" इति कष्टश्रितशब्देन महच्छब्दस्य समासः प्रसज्यत एवेति त्रिपदसमासवारणं सुपेत्यस्याननुवृत्तौ न सिध्यतीति चेन्न, सुबुत्पत्तेः

1. अहीनवाचिनि समासे क्तान्ते उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं भवतीति सूत्रार्थः।
2. समासस्यन्त उदात्तो भवति।

पूर्वं समस्यत इत्युक्त्या संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वेन सुप्प्रकृतित्वार्हस्यैव तत्र कृदन्तस्य ग्रहीतुमुचितत्वेन कष्टश्रितशब्दस्य तदनर्हत्वादेव तेन "समासाप्रसङ्गात्। एतेन संख्याया विवक्षितत्वादेकस्यैव सुबन्तस्यैकेन सुबन्तेन समासः ततो बहूनां न भवतीत्यर्थः" इति निरस्तम्। संख्याया विवक्षामाश्रित्यैव सुबन्तसमुदायस्यैकस्य श्रितादिना समाससंज्ञाया आपादितत्वेन समुदाये आकृत्यपरिसमाप्त्या परिहरिष्यमाणत्वेन च तद्विरोधेन संख्याया विवक्षया समाधानानौचित्यात्। एकेन सुबन्तेनेत्यंशस्य प्रकृतेऽसम्भवाच्च।

ननु आकृतौ शास्त्राणि प्रवर्तन्ते, यथा ङ्याप्प्रातिपदिकात् इत्येकवचननिर्देशेन प्रातिपदिकात् विधीयमाना विभक्तिः अन्यस्मात् अन्यस्मात्प्रातिपदिकाद्भवति, यथा ब्राह्मणो न हन्तव्य इत्येकवचनेन ब्राह्मणशब्दस्य निर्देशेऽपि तत्र सर्वस्य ब्राह्मणस्य हननप्रतिषेधो ज्ञायते तद्वत् अत्रापि सुपः एकवचनेन निर्देशेऽपि बहूनां सुबन्तानां युगपत्समासः, तेन महत् कष्टं श्रित इत्यत्रापि समासो भवेदिति चेन्न- **"आकृतिस्तु प्रत्येकं परिसमाप्यते, न समुदाये"।** प्रातिपदिकत्वाकृतिः प्रत्येकं प्रातिपदिके परिसमाप्यते अतः तज्जात्याश्रितव्यक्तेः विभक्त्युत्पत्तिः, प्रातिपदिकसमुदायो न प्रातिपदिकमतो तस्मान्न न विभक्त्युत्पत्तिः। एवमिहापि सुबन्तसमुदायस्य सुप्त्वाभावात् सुप् सुपेति न समासः।

रत्नप्रकाशकारमते "ब्राह्मणो न हन्तव्यः" इत्यत्र सर्वब्राह्मणहननप्रतिषेधदर्शनात् अत्रापि सुप्त्वं सुबन्तसमुदाये पर्यवसितमिति चिन्तनं न सम्यक् दृष्टान्तदार्ष्टान्तिकयोर्विरोधात्। दृष्टान्ते ब्राह्मणो न हन्तव्य इत्यत्र एकत्वसङ्ख्याया विवक्षायामपि, ब्राह्मणत्वस्य समुदाये अपरिसमाप्तावपि यथा सर्षपमात्रविषभक्षणं मरणसाधनमित्युक्ते अनेकसर्षपतुल्यमत्यन्तं मरणसाधनमिति गम्यते तद्वत् एकब्राह्मणहननं नरकसाधनमिति ज्ञाते कैमुतिकन्यायेन अनेकब्राह्मणहननमत्यन्तनरकसाधनमित्यवगम्यते। अतोऽत्र ब्राह्मणहननदृष्टान्तो न युज्यते।

ननु **"हलन्ताच्च"** (1.2.10) इति सूत्रे हल्पदेन हल्समुदायोऽपि गृह्यते। इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् इति सूत्रार्थः। अत्र हल्पदेन हल्समुदायग्रहणात् दम्भधातोः मभयोः हलोः सत्त्वेऽपि ततः परः झलादिः सन् किद्भवति। एवं प्रकृतेऽपि सुबन्तेन सुबन्तसमुदायग्रहणमस्तु इति चेन्न **"हलन्ताच्च"** (1.2.10) इति सूत्रे हल्पदेन हल्समुदायग्रहणं तु **"निपात एकाजनाङ् (1.1.14)"** इति सूत्रे एकग्रहणसामर्थ्यादङ्गीक्रियते। तथाहि तत्र एकग्रहणेन अन्यत्र वर्णग्रहणे जातिग्रहणमित्युक्तम्, तेनात्र हल्पदेन हल्त्वजातेर्ग्रहणात् हल्समुदायस्यापि हल्पदेन ग्रहणं भवति परन्तु सुप् सुपा इत्यादौ तथा ज्ञापकाभावात् न सुबन्तेन सुबन्तसमुदायग्रहणम्।

## वृत्तिनियामकत्वम्

ननु महत् कष्टं श्रितः इत्यत्र कष्टश्रितशब्दयोः समासो कुतो न इति चेदुच्यते सापेक्षमसमर्थवदित्यनेन। अत्र कष्टशब्दस्य महच्छब्देनाकाङ्क्षायाः सत्त्वात् कष्टशब्दः सापेक्षो वर्तते। कष्टशब्दस्य श्रितापेक्षया गुणत्वं महदपेक्षया प्रधानत्वं च युगपद्विरुद्धमतः "सापेक्षमसमर्थवद्" इति ज्ञापकसिद्धन्यायेन अत्र समासो न।

ननु तर्हि राजपुरुषो दर्शनीय इत्यत्रापि समासो न प्राप्नोति पुरुषपदस्य दर्शनीयपदसापेक्षत्वात्। अत्र समाधानमुच्यते यत् ज्ञापकसिद्धमसमर्थवदिति न सार्वत्रिकम्, सापेक्षस्य प्रधानस्य तु समासो भवत्येव। **"उपमितं व्याघ्रादिभिः समान्याप्रयोगे" ( 2.1.56 )** इति सूत्रे सामान्याप्रयोगे इति पदमेवास्मिन् विषये ज्ञापकमस्ति। तथाहि तत्रत्यं भाष्यमस्ति – एवं तर्हि सिद्धे सति यत् सामान्याप्रयोगे इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति वै प्रधानस्य सापेक्षस्यापि समासः। अर्थात् पुरुषो व्याघ्र इव शूर इत्यत्र शूरसापेक्षतया पुरुषस्यासामर्थ्यादेव समासाभावात् सामान्याप्रयोगे इति पदं व्यर्थमेव। तद्व्यर्थीभूय सापेक्षमसमर्थवद् इति वचनस्य प्रधानव्यतिरिक्तविषयत्वं ज्ञापयति। एवञ्च प्रधानविषये अस्य प्रवृत्त्यभावात् यत्र प्रधानं सापेक्षं तत्रापि समासो भवति। अत्र कैयटेन यदुक्तम् अस्य प्राधान्यादनेकोपकारेणोपकार्यत्वाविरोधात् समासे न दोष इति न सम्यक् यतो हि दोषो नास्तीति प्रतिज्ञामात्रेण न किमपि सिध्यति तदर्थं ज्ञापकादिकं प्रदर्श्यम् अन्यथा प्रतिज्ञामात्रेणाभिमतार्थसिद्धौ जितमस्माभिः इत्युक्त्यैव जयलाभे चतुरङ्गबलसम्पादनं राज्ञामनर्थकं स्यात्।

ननु तर्हि यत्र अप्रधानं सापेक्षं भवति तत्र सापेक्षमसमर्थवद् इत्यनेन समासो न भवति। देवदत्तस्य गुरुकुलम् इत्यत्र अप्रधानस्य गुरुशब्दस्य देवदत्तसापेक्षत्वात् गुरुकुलशब्दयोरत्र समासो न स्यात्। एवं देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्या इत्यादिष्वपि समासो न प्राप्नोति। अत्र समाधानमुच्यते यत्समुदायापेक्षात्र षष्ठीति समासः सिध्यति। देवदत्तस्य इत्यत्र या षष्ठी सा गुरुकुलमिति समुदायमपेक्षते न तु गुरुशब्दमात्रम्। एवञ्च गुरोर्देवदत्तसापेक्षत्वाभावात् समासे न दोषः। अत्र देवदत्तस्य समुदायेन सम्बन्धस्तु अवयवद्वारक एव। देवदत्तशब्द आदौ सामर्थ्याद् अवयवं संस्पृश्य ततः अवयववता समुदायेन सम्बध्यते। उक्तञ्च–

**"समुदायेन सम्बन्धो येषां गुरुकुलादिना।**
**संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥"** इति

रत्नप्रकाशकारस्तु देवदत्तस्य समुदायेन सम्बन्धः अवयवद्वारक इति न स्वीकरोति, अत्र षष्ठ्याश्च समुदायापेक्षत्वं सम्बन्धस्त्ववयवद्वारक इत्यनयोः परस्परं विरोधात्, किञ्च समुदायेन सम्बन्धोऽत्र अवयवद्वारक इति स्वीकारे देवदत्तस्य गुरुकुलम् इति यद्येषां समुदायापेक्षा षष्ठी स्यान्नैतन्नियोगतो गम्यते इत्युत्तरग्रन्थस्य अयुक्तत्वापत्तिरपि

सम्भवति। बाधेऽदृढेऽन्यसाम्यात्किं दृढेऽन्यदपि बाध्यताम् इति न्यायेनात्र प्रकृतदृष्टान्तस्याप्युपेक्षणीयत्वात् अवयवद्वारकसम्बन्धो न युक्त इति रत्नप्रकाशकाराशयः।

ननु यत्र तर्हि षष्ठी समुदायापेक्षा नास्ति तत्र वृत्तिर्न प्राप्नोति, यथा किमोदनः शालीनाम् इति। अनेकेषां शालीनां सत्त्वेन केषां शालीनाम् ओदन इत्यर्थकमिदं वाक्यम्। अत्र शालीनामित्यत्र विधीयमाना षष्ठी ओदनापेक्षा न तु किमोदनः इति समुदायापेक्षा। किं-शब्दस्य शालिरूपविशेष्यसापेक्षत्वात् तस्य शालिद्वारके ओदनेन सम्बन्धे सत्यपि न किमोदनयोः समासः प्राप्नोति। यद्यपि अत्र देवदत्तस्य गुरुकुलम् इत्यत्रेव षष्ठ्याः समुदायापेक्षत्वं वक्तुं शक्यते तथापि सक्तुशब्दस्य सम्बन्धिशब्दत्वाभावात् समुदायषष्ठ्याश्रयसमाधानस्य निराकरिष्यमाणत्वाच्च पार्थक्येनास्य निदर्शनम्। एवम् सक्त्वाढकमापणीयानाम् इत्यत्रापि आपणीयानां सक्तूनाम् आढकमित्यर्थसत्त्वात् आपणीयानामित्यत्र षष्ठी सक्त्वापेक्षा न तु आढकापेक्षा।

एवं कुतो भवान् पटलिपुत्रक इति। पाटलिपुत्रशब्दोऽयं समुदाये वर्तते, तस्य पूर्वपश्चिमादिषु तदवयवेष्वपि च वृत्तिसम्भवात्। तेन अस्य वाक्यस्यार्थो भवति- कस्मात् पाटलिपुत्राद् आगतो भवान् इति। अत्र कुतः इत्यस्य पाटलिपुत्ररूपविशेष्यसापेक्षत्वात् भवच्छब्देन समासो न प्राप्नोति। तथा च कुतश्शब्दसापेक्षत्वात् पाटलिपुत्रशब्दात् रोपधेतोः प्राचाम् इति बुञ् न स्यादिति तद्धितवृत्तिरपि न प्राप्नोति।

ननु अत्र कुतश्शब्दस्य भवच्छब्देन समासविधायकशास्त्राभावादेव समासाभावः सिद्ध इति न वक्तव्यम्, अत्रभवान् तत्रभवान् ततोभवान् इत्यादाविव मयूरव्यंसकादिवत्समासस्य सिद्धत्वात्। स्पष्टप्रतिपत्तये कुतो पाटलिपुत्रको भवान् इति वक्तव्ये कुतोभवान् इति प्रयुञ्जन्त आचार्याः अस्य समासाभ्युपगमत्वमेव स्पष्टीकरोति। एवमेव किंदुग्धं गोः, किंभक्तं शालीनाम्, किंसूपो मुद्गानाम्, कुतोभवान् पाञ्चालेभ्य इत्यादयः समासप्रयोगाः सिध्यन्ति एव।

एवं देवदत्तस्य गुरुकुलम्, देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्या इत्यादिषु अपि यदि समुदायापेक्षा षष्ठी स्यात् तर्हि सर्वदा देवदत्तस्य यो गुरुः तस्य पुत्र इत्येवमर्थो नियोगतो न प्रतीयेत अपि तु अन्यस्यापि गुरुपुत्रः, देवदत्तस्य किञ्चिद् इत्येवमर्थोऽपि प्रतीयेत परन्तु सर्वदा देवदत्तस्य यो गुरुः तस्य पुत्रः इत्येवमर्थस्य प्रतीतेः अत्र न समुदायापेक्षा षष्ठी अपि तु अवयवापेक्षा षष्ठी एव वर्तते। अतो एषु समासो न स्यादित्यापत्तिः।

देवदत्तस्य गुरुकुलम् इत्यत्र शिष्यं विना गुरोरसम्भवात् एवञ्च गुरुं विना शिष्यस्यासम्भवात् देवदत्तस्य गुरुशब्देन सह नित्यसापेक्षत्वमस्ति। नित्यसापेक्षशब्दास्तु समस्यन्ते एव। वाक्ये यथा व्यपेक्षाभावो वर्तते तथा गुरुकुलम् इत्यत्र समासे सत्यपि व्यपेक्षाभावो न हीयते अतोऽत्र देवदत्तस्य गुरुशब्देनान्वयो सम्भवति तेन च समासो

सिध्यति। उक्तञ्च-

**"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।**
**वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते॥"**[3]

एवं किमोदन इत्यादीनाम् असामर्थ्यत्वेऽपि भाष्यकारप्रयोगादेव साधुत्वं ज्ञेयम्।

सापेक्षमसमर्थवत् भवति इति स्वीकारे ब्राह्मणस्य सर्पिष्करोति इत्यत्र सर्पिषो ब्राह्मणसाकाङ्क्षत्वात् सर्पिष्करोति इत्यत्र असामर्थ्यात् **"इसुसोः सामर्थ्ये" ( 8.3. 44 )** इत्यत्र षत्वं न प्राप्नोति।

एवम् अधुना सापेक्षमसमर्थवत् इत्यस्य स्थाने सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न इति स्वीक्रियते तेन अत्र विशेषणयुक्तानां वृत्तिर्नेति कथनेन षत्वादिकं तु भवत्येव। एवञ्च ब्राह्मणस्य सर्पिष्करोति इति सिध्यति।

ननु सविशेषणानां वृत्तिर्नेति स्वीकारे पुनः देवदत्तस्य गुरुकुलम्, देवदत्तस्य गुरुपुत्रो, देवदत्तस्य दासभार्या इत्यादिषु वृत्तिर्न प्राप्नोति देवदत्तरूपविशेषणसत्त्वाद् इति चेद् उच्यते अगुरुपुत्रादीनाम् इति। गुरुपुत्राद्यवयवभिन्नानां सविशेषणानां वृत्तिर्न, वृत्तानां विशेषणयोगो न। अर्थात् गुरुपुत्रम्, गुरुकुलम् इत्यादिस्थलं वर्जयित्वा एव सविशेषणानां वृत्तिर्नेति प्रवर्तते इति भावः। तदानीं देवदत्तस्य गुरुकुलम्, देवदत्तस्य गुरुपुत्रो, देवदत्तस्य दासभार्या इत्यादौ समासे न कोऽपि बाधः।

यद्येवं तर्हि सूत्रे अगुरुपुत्रादीनामिति वक्तव्यमिति चेत्तदपि न गुरुपुत्रादिषु गमकत्वात् समासः सिध्यति, अयं च न्यायसिद्ध एव। तथाहि वाक्येनाभिधाने प्राप्ते समास आरभ्यमाणः तत्समानार्थ एव न्याय्यः। एवं वृत्तिविग्रहयोः समानार्थकत्वन्यायेनैव सिद्धमेतदिति तदर्थम् अगुरुपुत्रादीनामिति न वक्तव्यमित्याशयः। देवदत्तस्य गुरोः कुलम् इति वाक्येन योऽर्थो गम्यते स एवार्थः देवदत्तस्य गुरुकुलमिति समासेनापि ज्ञायते अतः अत्र वृत्तिविग्रहयोः समानार्थत्वात् भवति समासः। किन्तु महत् कष्टं श्रितः इत्यत्र विग्रहे महत्त्वं कष्टे विशेषणं किन्तु समासे कष्टादेर्विशेषत्वानाक्रान्त-विशेष्यतयोपस्थितिरिति तदानीं यः कष्टाश्रितः स महत्कर्म करोतीत्येवमर्थः प्रतीयते इति तयोस्समानार्थत्वभङ्गः। एवम् अत्र वृत्तिविग्रहयोः समानार्थत्वाभावात् न समासः। एवं गमकत्वमत्र सामर्थ्यं तच्च स्वभावात् सापेक्षे विशेषणे क्वचिदस्ति गुरुकुलादौ, क्वचिन्नास्ति कष्टश्रितादाविति न दोषः।

रत्नप्रकाशमते वाक्येन बोधयितुमिष्टस्यैवार्थस्य समासेन बोधनीयतेति स्वीकारेण षष्ठ्यर्थबहुव्रीह्यादीन् व्यतिरिच्य ये वृत्तिविग्रहयोर्भेदार्थकत्वं स्वीकुर्वन्ति तेऽधुना निरस्ता – वृत्तिवाक्ययोर्भिन्नार्थकत्वमषष्ठ्यर्थबहुव्रीह्यादावङ्गीकुर्वन्तो निरस्ताः, तत्रापि

---

3. व्याकरणमहाभाष्यम्, पुटसंख्या-319

यच्छब्दघटितेन विग्रहवाक्येन वृत्त्यर्थस्यैव कथनात्, अन्यथा तस्य विग्रहवाक्यत्वभङ्गाच्च इति। अत एव धात्वर्थविशेष्यकं शाब्दबोधमिच्छन्तोऽपि वैयाकरणम्मन्याः निरस्ताः। कुम्भं करोति, कुम्भकारः इत्यादौ वृत्तिवाक्ययोर्भिन्नार्थकत्वापत्त्या प्रकृतभाष्यविरोधात्।

वृत्तिविग्रहयोः आत्यन्तिकरूपेण तुल्यार्थत्वं गमकत्वम् इति रत्नप्रकाशकारमतं न युक्तं यतो हि सर्वदा वृत्तिविग्रहयोः आत्यन्तिकतुल्यार्थकत्वं न सम्भवति। **“अयःशूलदण्डाजिनाभ्यां ठक्ठञौ”** **(5.2.37)** इति सूत्रस्थभाष्ये भाष्यकारेण शिवभागवतः इति प्रयुक्तम्। शिवस्य भगवतो भक्तः इत्यर्थोऽस्य। अत्र गमकत्वादेव समास आश्रितः। परन्तु अत्र शिवस्य भागवतः इति वाक्यं न प्रयोक्तुं शक्यते। अत्र भगवच्छब्दादण् शिवशब्देन भगवच्छब्दस्य च समासश्च युगपद्भवति। यदि वृत्तिविग्रहयोरात्यन्तिकरूपेण समानार्थत्वं स्वीक्रियते तर्हि अत्र कथञ्चिदपि निर्वाहो न भवति। न केवलमेतत् नित्यसमासे अस्वपदविग्रहो भवति, तत्रापि वृत्तिविग्रहयोः समानार्थकवाक्यस्य प्रदर्शनं न सम्भवमतः स समासोऽपि नोपपद्येत तदानीम्। अतः कैयटोक्तमतमेवात्र युक्ततरम्। सर्वत्र गमकत्वात् समासो नाम नित्यसापेक्षत्वात् समानविषयत्वाच्च समास इति ज्ञेयम्।

एतेन लोके प्रयुज्यमानत्वं साधुत्वम्, कम्बुग्रीवादिमतः पदार्थस्य बोधनार्थं लोके गोशब्दः प्रयुज्यते अतः गोशब्दः साधुः लोके अप्रयुज्यमाना गावीगोण्यादिशब्दा अपशब्दा एवमेव कष्टे महत्त्वं विशेषणमिति पक्षे महत्कष्टं श्रित इत्यस्यासमस्तस्यैव लोके प्रयोगात् समासे सति अपशब्दोऽयं स्याद्, अपशब्दः इति कृत्वा न समासः इति चेन्न अत्र पूर्वोक्तरूपेण गमकत्वाभावादेव न समास इत्येव न्याय्यम्। किमोदनः शालीनाम्, सक्त्वाढकमपाणिनीयानामित्यादिषु गमकत्वादेव समासः सिध्यति। नित्यसापेक्षयोः समासः इति सम्बन्धिशब्दः सापेक्षः नित्यः सर्वं प्रयुज्यते इति कैयटेन यदुक्तं तेन देवदत्तस्य गुरुकुलम् इत्यादौ समाधानेऽपि किमोदनः शालीनामित्यादौ न प्रवर्तते नित्यसापेक्षत्वाभावात् अतः गमकत्वमेव समासप्रवृत्तौ नियामकमिति भाष्यमतमेव न्याय्यम्।

## परिशीलितग्रन्थसूची

1. भट्टोजिदीक्षितः। 2010। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनी-सहिता)। शर्मा, परमेश्वरानन्दः (सम्पा.)। वाराणसी : मोतिलाल बनारसीदास।
2. भट्टोजिदीक्षितः। 2015। वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्)। श्रीगोविन्दाचार्यः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. भर्तृहरिः। 2015। वाक्यपदीयम् (प्रकाश-नारायणटीकाद्वयोपेतम्)। तिवारी, हरिनारायणः (सम्पा०)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।

4. कौण्डभट्टः। 2006। वैयाकरणभूषणसारः (प्रभादर्पणव्याख्याद्वयोपेतः)। पञ्चोली, बालकृष्णः (सम्पा०)। वाराणसी : चौखम्बा संस्कृत संस्थान।

5. कौण्डभट्टः। 1998। वैयाकरणभूषणसारः (सावित्रीहिन्दीव्याख्योपेतः)। मिश्रः, आद्याप्रसादः (सम्पा०)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

6. दीक्षितः, पुष्पा। 2010। अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)। नवदेहली : संस्कृतभारती।

7. नागेशभट्टः। 2013। लघुशब्देन्दुशेखरः (सुबोधिनीहिन्दीव्याख्योपेतः)। मिश्रः, विश्वनाथः (सम्पा०)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।

8. पतञ्जलिः। 2013। व्याकरणमहाभाष्यम् (प्रदीपोद्योतभावबोधिनीहिन्दीव्याख्या-समुल्लसितम्)। त्रिपाठी, जयशङ्करलालः (सम्पा०)। वाराणसी : कृष्णदास अकादेमी।

9. पतञ्जलिः। 2014। व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्)। जोशी, भार्गवशास्त्री (संशोधकः)। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

10. प्रो. कृष्णकुमारः। महाभाष्यार्थदीपिका, Chinmaya International Foundation Shodha Sansthan

11. एम एस नरसिंहाचार्यः। महाभाष्यप्रदीपव्याख्यानानि, Institut Francais D'indologie Pondichery, 1978।

12. पण्डित शिवदत्तशर्मा। व्याकरणमहाभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान।

✦✦✦

# एकविंशशताब्दस्य वङ्गीयकवेः सीतानाथस्य काव्यमूल्यायनम्

-डॉ. शुभ्रजित् सेनः*

**शोधसारः-**

आचार्यकविः सीतानाथः षट् मौलिककाव्यग्रन्थान् व्यरचयत्। 'कविना सीतानाथेन बहुविधकाव्यप्रसूनैः वाग्देवी समर्चिता। सन्त्येतस्य भावविलसितम्, शिशुयुवदुर्दैव-विलसितम्, का त्वं शुभे, काव्यनिर्झरी, गौरीनाथचरितम्, कविते विश्ववन्दिते चेति काव्यसङ्कलनानि। 'का त्वं शुभे' इत्येकं प्रेमोपजीव्यं गीतिकाव्यम्। जगति प्रवहतः प्रेम्णो माधुर्येण विमुग्धं कविचित्तम्। प्रेममन्दाकिन्या विमलधारया अभिस्नाता तदीया कविसत्ता। गीतिकाव्यस्यास्य नायिका शुभा कविकपोलकल्पिता चञ्चलेक्षणा स्वयमेव कविकल्पनामवलम्ब्य तस्यैव प्राप्ता जीर्णकुटिरम्। कवेरनास्वादितः प्रेमरसः समुद्बोधितः शुभाया आविर्भावेन। नायिका स्वयं यावत् स्मितं हसति, किञ्चिद्वा भाषते तावन्नायकस्यापि हृदयाभ्यन्तरस्थनयनं प्रबोधितमभवत्, सा शुभाङ्गी शुभा वनभूमौ वाञ्छति भ्रमितुम्। नायकोऽपि तामनुव्रजतीत्यत्र नास्ति संशयलवः। विविधमुक्त-काव्यप्रणेतुरस्य नूत्नं रहस्यवादवाच्यमनिर्वचनीयप्रेमतत्त्वभावनाधारामादाय लिखितं भावकाव्यं 'का त्वं शुभे' शीर्षकं 2003तमे ईशवीयाब्दे जुनमासि प्रकाशितम्। सम्बोधनमिदमनिर्वाच्यायै प्रेमपात्रत्वमधितस्थुष्यै कस्यैचन प्रियतमायै समर्पितं किन्त्वत्र विप्रलम्भशृङ्गारस्य वेदनामनुभवन् कविः कदाचन कन्यायाः कस्याश्चन स्मृतेराधारेण तस्याः सम्प्रत्यभावं वर्णयति, कदाचिदनुभूतसौन्दर्यसामग्र्या विवरणं प्रस्तौति। 'स्लतपब' इति पदेन यत्प्रगीतमुक्तकं विवक्ष्यते, 'Lyricism' इति पदेन च या भावप्रवणता विवक्ष्यते- तयोरुदाहरणत्वेन मुक्तकसंग्रहोऽयं समुपन्यस्तुं शक्यते। प्रेमोपजीव्ये 'का त्वं शुभे' इति गीतिकाव्ये रवीन्द्रनाथस्य प्रभावः समापततीति मन्ये। विशेषेण शुभाया अन्तर्धानात्परं कविचित्ते या भावसमाधिर्दृश्यते, तेन भावसमाधिना कविः शुभाया अस्तित्वं विश्वस्य विविधेषु पदार्थेषु पश्यतितराम्। 'का त्वं शुभे' इत्यस्मिन् काव्यरत्ने उभयात्मकस्य शृङ्गाररसस्य प्राधान्येनाभिव्यञ्जना महते चमत्काराय संदृश्यते सहृदयधुरीणां कृते। शुद्धप्रेमोपजीव्ये गीतिकाव्येऽस्मिन् उच्चकोटिकस्य प्रेमसम्बन्धस्य

---

* सहायकाध्यापकः, संस्कृतविभागः, गौड़वङ्गविश्वविद्यालयः, मालदा-732103, पश्चिमवङ्गः।

वैविध्यं शब्दचित्रतामवलम्ब्य उपनिबद्धमस्ति सहृदयानां चमत्काराय। शृङ्गाररस-प्रधानेऽस्मिन् काव्ये प्रणयपूर्णाभिव्यक्तिः देहाद् देहान्तरं परिस्फुरति।

**प्रमुखशब्दाः-**

आधुनिकम्, कविता, वङ्गीयकविः, सीतानाथः।

## आमुखम्

आधुनिकसंस्कृतसाहित्यकारेषु सीतानाथाचार्यशास्त्री कश्चन तपस्वी कवयिता एकान्तसाधकश्चासीत्। वयं जानीमो यत् प्रतिभोन्मेषेणैव विश्वं प्रकाशपदवीं याति। अस्याः शक्तेश्च विचित्ररूपैर्जगदिदमास्वाद्यमानतया प्रतिभाति। अस्या अभिनवोन्मेषेण कवेः काव्यं प्रचरद्रूपतां गच्छति। तथाहि प्रतिभामिमां जगत्कल्याणमयीं प्रणमति ध्वन्यालोककृदानन्दवर्धनाचार्यः। अपि च, प्रतिभाप्रसादात् सहृदयः महाकविपदवी-मुपालभते। संस्कारजन्यया प्रतिभया शिशूनां जन्मान्धानामपि कवित्वशक्तिरुन्मीलति। प्रतिभाया या धारा विच्छिन्नस्य खण्डितस्य च जीवनस्याखण्डताया उपलब्धिना काव्यसृष्टौ भवत्युपकारिका। सा कारयित्री। अनया प्रतिभयाचार्यकविः षट् मौलिक-काव्यग्रन्थान् विरचयति स्म। 'कविना सीतानाथेन बहुविधकाव्यप्रसूनैः वाग्देवी समर्चिता। सन्त्येतस्य भावविलसितम्, शिशुयुवदुर्दैवविलसितम्, का त्वं शुभे, काव्यनिर्झरी, गौरीनाथचरितम्, कविते विश्ववन्दिते चेति काव्यसङ्कलनानि। तद्व्यतिरिक्ताश्च बह्वयोऽस्य कविताः पत्रकत्रिकासु प्रकाशिताः। यथाऽयं मृद्वीकामध्य-निर्यन्मसृणरसझरीमाधुरीभाग्यभाजां वाचामाचार्य आसीत् सीतानाथाचार्यः, तथैव शास्त्रेषु निष्ठा विचारप्रवणता तार्किकताऽपि तस्य कृतित्वे समुल्लसति स्म' इति राधावल्लभत्रिपाठी।

**सम्बन्धसाहित्याध्ययनम्-**

प्रबन्धस्यास्य विरचनकाले ये च समालोचनापरकाः ग्रन्थाः, प्रबन्धाश्च मया अधीतास्ते अधः समुल्लिख्यन्ते-


1. चट्टोपाध्यायः, ऋता (2008), सीतानाथ आचार्य : कवि ओ प्राबन्धिक. संस्कृत बुक् डिपो, कलकाता।
2. Chaterjee, Indira (2009). Contemporary SocietyAnd Poet SitanathAcharya.Anviksa (Vol- XXX), Jadavpur University, pp. 167-175.
3. Goswami, Bijoya (2004). Ka Tva? Subhe\.Anviksa (Vol- XXV), Jadavpur University, pp. 245-247.

4. Kanjilal, Dileep Kumar. (1999). Bhavavilasitam (A Collection of Self-composed Verses). The Journal of theAsiatic Society (vol-XLI, No 1, Kolkata, pp. 84-85.

5. Bharatiya, Pramod. (2004). Bhavavilasitam& A Critical Appreciation. Journal of Women's Christian College (Vol:1), Kolkata, pp. 68-731

**शोधपद्धतिः-**

गवेषणारीतिविज्ञानं महद्गुरुत्ववहं वरीवर्ति यस्य कस्यापि गवेषणाकार्यस्य कृते। अस्मिन् शोधपत्रे मुख्यतः वर्णनात्मिका तथा च विश्लेषणात्मिका गवेषणापद्धती आश्रयणीये। प्रबन्धस्य आदिपर्वणि सीतानाथाचार्यस्य कविताग्रन्थानामेकत्र संग्रहकाले संग्रहात्मिका पद्धतिः मयका गृहीता। तदनु काव्यग्रन्थस्थविषयाणां वर्णनावसरे वर्णनात्मिका पद्धतिराश्रिता। अन्ते समीक्षादर्पणेन समीक्षितः बन्धोऽयम्।

**शोधबन्धचर्चा-**

सीतानाथनामकोऽयं कविस्तथा सहृदयः पश्चिमवङ्गस्य मेदिनीपुरमण्डलान्तर्गतं रासनाख्यग्रामं व्यभूषयत् स्वजनुषा डिसेम्बरमासस्य प्रथमदिवसे 1939तमे ईशवीये वर्षे। संस्कृतविद्याया विविधासु धारासु व्युत्पन्नः पण्डितो जयनारायण आचार्यकवेः पिता, माता च स्वर्णकुमारी देवी। संस्कृतशिक्षैतिह्यवाहिनि वंशे लब्धजन्मायं सीतानाथो जन्मसूत्रत एव स्ववंशगतं महार्घ्यमुत्तराधिकारमर्जितवान्।

अधुना संक्षेपेण कवेः सीतानाथस्य काव्यानां विषयगतदिशा मूल्याङ्कनं कर्तुमुत्सहे-

**॥1- भावविलसितम्॥**

प्राथम्येन 1998 ईशवीयाब्दे प्रकाशितेऽस्मिन् भावविलसितनामके कविताग्रन्थे विविधे प्रसङ्गे लिखितासु कवितासु कासाञ्चित् सङ्कलनमत्र परिप्राप्यते। तत्र संस्कृतभाषामय्यः सप्तविंशतिसंख्यकास्तथा वङ्गभाषामय्यः षट्संख्यकाः कविता विलसन्ति। संस्कृतकवितासु 'स्काइलार्कं प्रति', 'आत्मविलापश्चेति' द्वे कविते तावदनुवादात्मिके। तदितराः सर्वाः कविताः मौलिकरचनारूपाः। साकल्येन संस्कृतकवितानां श्लोकसंख्या प्रायिकदिशा शतत्रयी। कासाञ्चन कवितानां खलु विषयाः पूर्वसूरिभिः समुपस्थिताः प्राचीनभूताः, कासाञ्चन पुनः साम्प्रतिके काले उद्भूता सामाजिकी स्थितिः। काव्येषु एषु शब्दचारुत्वार्थचारुत्वयोः सामञ्जस्यपूर्णा स्थितिर्नितरां चित्ताकर्षका। मौलिककाव्येषु कानिचिच्च स्तुतिपराणि कानिचिन्निसर्ग-निरूपणपराणि च मनोभावाभिव्यञ्जकानि सन्ति। सर्वत्र वैदर्भीरीतिरिह लसति।

किञ्च, एतेषु क्वचिद् ध्वनेर्विलसनं क्वचिद्रसस्याभिव्यञ्जनं, क्वचिद्वक्रोक्तेः प्रयोगः, कुत्रापि कौतुकमयता, कुत्रापि कल्पनायाः समुदारता च जनमानसमानन्दयन्ति।

विशेषतः समुल्लेखनीयं यत् साहित्यसमालोचकस्य डॉ. रमारञ्जनमुखोपाध्याय-महाभागस्य भूमिका तथा च वङ्गभाषायाः प्रख्यातकविवरेण्यस्य नीललोहितस्य सम्प्रति स्वर्गं गतस्य सुनीलगङ्गोपाध्यायस्य मुखबन्धः स्वरचितकवितासंग्रहस्यास्य गुरुत्वं समधिकं वर्णयतः इत्यत्र नास्ति विप्रतिपत्तिः। ग्रन्थस्यास्यादावेव कविना श्लोकैः जनकजननीगुरुप्रियासहोदरान् विनम्रचेतसा संस्मृत्य प्रणम्य च-

> **"सहस्रशः प्रणम्याद्य पादयोर्विनिवेद्यते।**
> **भावविलसिताख्येयं कवितापुष्पमालिका॥"** इति।

## ॥2- शिशुयुवदुर्दैवविलसितम्॥

कवेरपरं समाजाश्रयं काव्यं तावत् शिशुयुवदुर्दैवविलसितमिति। पश्चिमवङ्गप्रान्ते एकस्मिन् स्वास्थ्यकेन्द्रे प्रतिषेधकस्य औषधविशेषस्य (Polio-vaccine) प्रायोगिक-प्रमादद्वारा शिशूनां यूनाञ्चाकालमरणं कारुण्येन चित्रितं कविना सीतानाथेन। बहूनां शिशूनां मृतकथामुपजीव्य निहतशिशुनालम्बनविभावेन जनन्यादेः क्रन्दनाद्यनुभावेन च सीतानाथस्य कारुण्यस्य हेतुभूतो जनन्यादेः शोकः कवेर्लेखन्या विनिर्गत्य काव्यरूपेणानेन परिणतिं परिप्राप्य अनुपमानुभूतेः परमप्रकर्षो जञ्जन्यतेतराम्। एतद्व्यतिरिच्य शिशूनां काश्चित् समस्या अपि कविना निबद्धाः। पुनः भ्रूणहत्या, शिशूनामपुष्टिः, आधुनिक-तरुणानामपराधप्रवणतादयः समस्याः आचार्येण मर्मस्पर्शिन्या भङ्ग्या समुपस्थापिताः।

काव्येऽस्मिन् क्वचित् क्वचित् सोलुण्ठनभङ्ग्या पौराणिकचरित्रचित्रणपुरःसरं कविः समाजस्याधःपतनं प्रति तीव्रकषाघातं विधत्ते। वास्तवोचितचित्रचित्रणे कवेर्दाक्ष्यमतुलरमणीयमिति। काव्यग्रन्थस्यास्य पुरोवाचि दिलीपकुमारकाञ्जिलालमहाभागैः सुष्ठूक्तम्- "The traces of the influence of the classical poets like Kalidasa, Bharavi, and of Sriharsa are visible all through the poem and his comparison of Asvamedha and the Rajasuya sacrifices of yore with the genocide of children and the young generation, albeit indirectly resuscitate the following lines of the VenisamharaAct 1-25-"चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः..."[1] इति।

कवेः प्रशंसापरकोक्तेरयमेव निष्कर्षार्थो यत् कालिदासभारविश्रीहर्षादिलौकिक-कोविदां प्रभावः सुतरामेव समापतति कृष्णात्रेयकवेरस्य कवितासंग्रहेऽस्मिन्। अश्वमेध-

1. *शिशुयुवदुर्दैवविलसितम्* (पुरोवाक्)

राजसूययज्ञाभ्यां समं शिशुयुवकादेर्विलोपसाधनस्य तुलनां कुर्वन्नयं कविः परोक्षतया 'चत्वारो वयमृत्विजः...' इति वेणीसंहारोक्तिं स्मारयतीति।

प्रसङ्गतः उल्लेख्यं यत् 1995तमे ईशवीयाब्दे कवेर्भ्रातुष्पुत्रोऽरुणाभः पथदुर्घटनायां दिवं गतः। अरुणाभस्याकालमृत्युजनितशोकाग्निः यदा कविमानसं दन्दह्यते, तदा देवग्रामस्य शिशुमृत्युवृत्तेन कवेः 'वियोगोत्थः शोकः श्लोकत्वमागतः' वाल्मीकेरिवत्। तथाहि काव्यस्यान्तिमे कविनोदितम्-

**ज्वलतस्तस्य शोकाग्नेः किञ्चित् प्रतिचिकीर्षया।**
**उत्सृज्यते मया साश्रु कृतिरेषा स्मृतौ तव।।**[2] इति।

**।।3- का त्वं शुभे।।**

'का त्वं शुभे' इत्येकं प्रेमोपजीव्यं गीतिकाव्यम्। जगति प्रवहतः प्रेम्णो माधुर्येण विमुग्धं कविचित्तम्। प्रेममन्दाकिन्या विमलधारया अभिस्नाता तदीया कविसत्ता। अतः स तदीये काव्ये कल्याणमयीमेकां प्रेमप्रतिमां निर्मातुमिच्छति-

**इच्छामि किञ्चित्प्रतिमां विधातुं प्रेम्णः शुभां मे**
**किल काव्यबन्धो।।**[3] इति।

गीतिकाव्यस्यास्य नायिका शुभा कविकपोलकल्पिता चञ्चलेक्षणा स्वयमेव कविकल्पनामवलम्ब्य तस्यैव प्राप्ता जीर्णकुटिरम्। कवेरनास्वादितः प्रेमरसः समुद्बोधितः शुभाया आविर्भावेन। नायिका स्वयं यावत् स्मितं हसति, किञ्चिद्वा भाषते तावन्नायकस्यापि हृदयाभ्यन्तरस्थनयनं प्रबोधितमभवत्, सा शुभाङ्गी शुभा वनभूमौ वाञ्छति भ्रमितुम्। नायकोऽपि तामनुव्रजतीत्यत्र नास्ति संशयलवः। तयोर्मिथो मेलनं शारदपौर्णमास्याः पूर्णचन्द्रालोके गाढतां सम्प्राप्य पूर्णतां प्रति धावति- "*हृदयद्वय-भिन्नभावना सहसाभिन्नदशाप्तबन्धना*।।"[4] इति।

कवेर्हृदयाधिष्ठात्री शुभापगतायां निशायां स्वयमपि प्रगता। सा यावदन्तर्हिता तावत्करुणातिकरुणं परिदेवनमिव ललितपदं केवलं लक्षयसि विप्रलम्भम्। तदा स्वकजीवनमप्रयोजनीयमिति विभाव्य कविनोक्तं-

**अतिजीर्णमरण्यमेव मे वनभूमिः प्रतिभाति मानसे।**
**हतजीवप्रयोजनं ममावसितं साम्प्रतमित्यहो मतिः।।**[5] इति

---

2. तत्रैव
3. *का त्वं शुभे* (3)
4. तत्रैव (22)
5. तत्रैव (34)

ततो नायकस्य चेतसि सान्तर्हिता वनचारिणी लोकातिक्रान्तमनुभवं स्फुटमस्फुटं जनयन्ती चित्तस्थैव विस्मयं विदधाति। अलौकिकनाकलोकामृतेन कवेर्हृदयं विषिच्य या प्रगता सा का वेति सम्प्रश्नः परीपृच्छ्यते कविवरेण। प्रेम्णो रहस्यं वेत्ति कविवरो विज्ञापयति। सा लब्धरहस्यविद्यका शुभा। श्वेतवस्त्रशोभिता सूर्यमुखीव प्रतिभाति प्रभाते मध्याह्ने च, स्थलपद्महासा सायञ्च यूथीव भ्राजमाना शुभा कविं विवशीकरोति।

'का त्वं शुभे' इति पृच्छता कविना वारं वारं शुभाया विशेषणानि रमणीयानि प्रदत्तान्यपि कवेर्विश्रान्तिर्न जाता। सा प्रेमराजत्वपदमभिषिच्य तमद्वैतभावं प्रेम्णः सारभूतं तत्त्वं दिव्यपीयूषं पाययति। श्यामायमाना स्वर्णाभा कस्तुरिका गन्धवती मृगीव भ्रमन्ती च नायकं कालिदासकाव्यलक्ष्मीरिव सावभासते कविचित्तमन्दिरे। कविकल्पनायां सा हरप्रियायाश्चित्तैषणास्वरूपा अथवा भारतसंस्कृतेर्दिव्यमूर्तिरूपा, उत लोकातिक्रान्ता रसमयी काप्यलौकिकी। तथाह्यनुभूतम्-

**का त्वं शुभे धूततनुः किमु कल्पनासि**
**लोकातिगा रसमयी कविचित्तभृङ्गी।**
**अज्ञातवस्तु प्रकृतेरपि वर्णनेषु**
**या प्रेरयत्यतितरां कविसार्वभौमान्।।**[6] इति।

देवसंसदि ऊर्वशीसदृशा हृदयविश्रान्तिकारिण्यष्टादशवर्षीया प्रत्यक्षश्लेषमय-प्रबन्धेषु वर्णिता वासवदत्ता वेति कविस्तर्कयति। कविः क्वचित् कन्दर्पकेतुप्रियाया वासवदत्तायाः, कदाचिद्वा भट्टबाणभणितियुक्तायाश्चित्रलेखायाः, क्वचिच्च ऊषायाः सादृश्यमन्विष्यन् ललितललितं पदजातं स्रगिव गुम्फति। तृप्तोऽप्यतृप्तमानसा कविरयमुपसंहरति-

**हे भाविनीच्छा मनसः सुसंवृता**
**विभोः प्रसादात् सफलैव भाविनी।।**[7] इत्यादिना।

विविधमुक्तकाव्यप्रणेतुरस्य नूत्नं रहस्यवादवाच्यमनिर्वचनीयप्रेमतत्त्वभावना-धारामादाय लिखितं भावकाव्यं 'का त्वं शुभे' शीर्षकं 2003तमे ईशवीयाब्दे जूनमासि प्रकाशितम्। सम्बोधनमिदमनिर्वाच्यायै प्रेमपात्रत्वमधितस्थुष्यै कस्यैचन प्रियतमायै समर्पितं किन्त्वत्र विप्रलम्भशृङ्गारस्य वेदनामनुभवन् कविः कदाचन कन्यायाः कस्याश्चन स्मृतेराधारेण तस्याः सम्प्रत्यभावं वर्णयति, कदाचिदनुभूत-सौन्दर्यसामग्र्या विवरणं प्रस्तौति। 'Lyric' इति पदेन यत्प्रगीतमुक्तकं विवक्ष्यते, 'स्लतपबपेउ' इति पदेन च या भावप्रवणता विवक्ष्यते- तयोरुदाहरणत्वेन मुक्तकसंग्रहोऽयं समुपन्यस्तुं शक्यते।

---

6. *का त्वं शुभे* (92)
7. तत्रैव (118)

135 मितेषु पद्येषु प्रणीतमिदं काव्यं प्रो. रमारञ्जनमुखोपाध्याय-राधावल्लभ-त्रिपाठि-प्रतापवन्द्योपाध्यायप्रभृतीनां प्रस्तावनाभिः, कुलपतीनां चाशिषकुमार-व्यानार्जीमहाभागानां शुभकामनया समलङ्कृतम्। काव्यस्यान्तिमानि पद्यानि कविपरिचयप्रदायकानि काव्यकारक्षुण्णरीत्या। अन्वीक्षापत्रिकायां संस्कृताध्यापिकया विजयागोस्वामिमहोदयया 'का त्वं शुभे' इति ग्रन्थसमीक्षावसरे गदितम्- "The poet here endeavors to capture the passing wonder of love, the momentary loveliness of lighting. His Subha is thus not a single person or entity but embodies those fleeting moments that come to almost everyone, when all is perfect." इति।

कवेः लेखनी सावलीला प्रसादगुणोपेता माधुर्यगुणान्विता च। आचार्यकवेर्भावानु-भूतेर्वाङ्मयप्रकाशे विविधानामर्थालङ्काराणां छन्दसाञ्च प्रयोगाः स्वतः स्फूर्ताः अपृथग्यत्ननिर्वर्त्याश्च।

**।।4- काव्यनिर्झरी।।**

सीतानाथः क्वचिद् भावगीताञ्जलिनाराधयति साहित्यदेवतां, क्वचिच्च शिशुयुवदुर्दैवविलसितादिकाव्यविरचनेन समसामयिकीं स्थितिं विशदीकरोति। एवं सततं प्रवहनशीलस्यास्य कवितानिर्झरिणी 'काव्यनिर्झरी'ति सङ्कलने प्रकटीकरोति स्फीतां हृद्यामनवद्याममन्दां वाग्धाराम्। कविः यादवपुरविश्वविद्यालयस्य प्राध्यापिकाम् ऋतादेवीमुद्दिश्य आशीर्वादं प्रीतिञ्च विनिवेद्य तस्यै ग्रन्थमिममर्पितवान्-

**सारस्वतानुजातायै तस्यै सहृदयात्मने।**
**उत्सृज्यत ऋतादेव्यै काव्यमेतत् सहाशिषा।।**[8] इति।

विविधासु सर्वभारतीयपत्रिकासु प्रकाशितानां कवितानां काश्चनात्र सङ्कलिता वर्तन्ते। ताश्च पञ्चचत्वारिंशत्कविता विषयवैचित्र्ययुताः। तथाहि, तासु काश्चित् देवताः स्तुवन्ति, कतिचन सिद्धसाधकानाञ्चरणपद्मयोर्विनिवेदयन्ति श्रद्धाञ्जलिम्। अपराः काश्चन कवेः शिक्षागुरुभ्यस्तत्सदृशेभ्यो वा माननीयेभ्यः प्रयच्छति प्रणामं, इतराः काश्चित् समकालिकान् विदुषोऽभिनन्दयन्ति तेषां साफल्यद्योतिनि क्षणे, अन्याः देशमातृकाया वन्दनं विदधति। अपरासु कवितासु प्रगुणीभवति कवेरन्तर्लीना वैयक्तिकी वेदनानुभूतिः। किञ्च, नजरुलविरचितायाः 'काण्डारी हुँशियार' इति कविताया अनुवादः 'कर्णधार अवधीयताम्- इति शीर्षकेण, सुकान्तरचित-लेलिना-ख्यकविताया अनुवादः, मधुसूदनदत्तविरचिताया 'रसाल ओ स्वर्णलतिका' इति कविताया अनुवादो 'रसालस्वर्णलतिके' इति शीर्षकेण ग्रन्थेऽस्मिन् स्थानं लभन्ते।

---

8. काव्यनिर्झरी, ग्रन्थसमर्पणम्, पृ.-3

अर्वाचीनसंस्कृतसाहित्यसमालोचकानां राधावल्लभत्रिपाठिपादानाम् ऋताचट्टोपाध्यायानाञ्च मुखबन्धैः प्रशंसाभिश्च काव्यग्रन्थोऽयं विभूषितः। अस्मिन् काव्यसंग्रहे यथा विलसन्ति वन्दनात्मिकाः कविताः, शोकगाथाः, अभिनन्दनात्मिकास्तथा वरीवर्तन्ते 'नागमो धरणीप्रान्ते', 'विश्वानवद्ये वद शिल्पसंस्कृते', 'सदा बिभेमि नारीभ्यः', 'चित्त रे बन्धनं छिद्यताम्', 'अन्योपदेशपञ्चकम्' चेत्यादिमौलिकगीतिकविताः।

इह ग्रन्थे सङ्कलिताः पञ्चचत्वारिंशत्कविता विषयवैचित्र्ययुताः। सनातनानां भावानां व्यक्तीकरणं मिथः प्रत्यास्था चेति ग्रन्थस्यास्य एकः पक्षः। समकालिकी चेतना कवेरस्य सीतानाथस्य काव्ययात्रायाः प्रस्थानमपरम्। कविरयं क्वचित् क्वचिदन्तर्मुख आत्मानमवलोकयति इति तृतीयपक्षः। सीतानाथस्य कर्तृत्वे वैदिको विश्वबोधः पुनरुन्मीलतीति महान् कवेर्विशेषः। स च 'वद शिल्पसंस्कृते' इत्येतादृशेषु काव्येषु प्रतिफलितः। कवेः काव्येषु क्वचित् कालिदासः प्राणिति, रवीन्द्रनाथो वा जागर्ति। अस्य कविताजातं वेदान्ततत्त्वानुभूतिं नवीनेषु सन्दर्भेषु हृदयङ्गमां विधत्ते। तथाहि प्राच्यतत्त्वविदुषा राधावल्लभत्रिपाठिनोक्तम्- "*वस्तुतोऽनुभूतिप्रवणोऽयं कविः। अयं सर्वङ्कषो विशेषो वर्तते कवेरस्य यत् संवेदनशीलता नाम। अत एवोच्यते-*

**सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः।**
**सीतानाथसदृक्षा विरलाः संवेदनप्रवणाः॥**[9] इति।

**॥5- गौरीनाथचरितम्॥**

आचार्यकवेर्गुरोर्विश्ववरेण्यस्य प्राच्यतत्त्वविदुषो गौरीनाथशास्त्रिणश्चरितमधिकृत्य रचितमिदं काव्यम्। अत्र 248 संख्यकाः श्लोका वर्तन्ते। गुरोः शास्त्रिमहोदयस्य जन्मशतवर्षे (2009तमे ईशवीये वर्षे) रचितमिदं काव्यं कविना गुरवे श्रद्धां विनिवेदयितुम्।

नवद्वीपनिवासिनो वासुदेवसार्वभौमस्य वंशे जातोऽयं गौरीनाथः। प्रथमे श्लोकषट्के वासुदेवसार्वभौमस्य किञ्चिद्विवरणं प्रदत्तम्। नवमादिसप्तविंशत्यन्तेषु श्लोकेषु गौरीनाथशास्त्रिणः पितामहस्य श्यामनाथस्य वृत्तमस्ति काव्यायितम्। श्यामनाथस्य समन्वयधर्मिचिन्ताचित्रं चित्रयता आचार्यकविनोक्तम्-

**शाक्तञ्च वैष्णवञ्चैव भिन्नप्रकृतिकं मतम्।**
**तस्मिन्नभिन्नतां यातं साधकप्रवरे ध्रुवम्॥**[10] इति।

अष्टाविंशतिश्लोकतः पञ्चचत्वारिंशच्छ्लोकं यावद् विस्तृते काव्यांशे सामान्येन श्यामनाथस्य पुत्रयोः अमरनाथपशुपतिनाथयोः तथा कन्यकाया यज्ञेश्वरीदेव्या विशेषतः

9. *तत्रैव*, पुरोवाक्, पृ.-10
10. *गौरीनाथचरितम्* -21

गौरीनाथपितुः पशुपतिनाथस्य वृत्तान्तः समुपस्थापितः कविनानेन। परं 1909तमे ईशवीयाब्दे पशुपतिनाथप्रभावत्योः औरसेन गौरीनाथो जनिं लेभे पुण्यशालिनि वंशे। ततः त्रिषष्टिश्लोकपर्यन्तं शिष्येण सीतानाथेन गुरोः बाल्यजीवनस्य जीवच्चित्रं चित्रितं निर्दुष्टतत्त्वपुरस्कारेण। ततः गौरीनाथस्य पितुरकालवियोगकारणाद् हतोद्यमो न भूत्वा कथञ्च सारस्वतनभोमार्गं दीपयिष्यतीति अनवद्यसारल्येन मर्मन्तुदमनोभङ्ग्या वास्तवोचितपटभूमौ च काव्यायितं स्वभावककविना सीतानाथेन। प्राचीनधाराश्रयिपण्डितानां पादारविन्दे स्वनिष्ठं वसता कविना गम्भीराणि तत्त्वानि ज्ञातानि नैके ग्रन्थाश्च स्वधीताः। तदनु शिक्षागुरोः गौरीनाथस्याध्यापनजीवनस्य बहुविचित्रितं चित्रं सूक्ष्मातिसूक्ष्मैस्तथ्यसम्भारैः परिष्कृत्य प्रायः पञ्चविंशतिश्लोकैः कविः प्रमाणयति यन्न केवलं गुरुगम्भीरविषयान् वर्णयितुं दक्षश्चापि कस्या अपि स्मृत्या लेखनेऽपि सुतरां सः। दिङ्मात्रमुदाहरणं यथा–

**विद्यासागरपादेन पूर्वमध्यासिते पदे।**
**गौरीनाथे समासीने युगान्तरमदृश्यत॥**

**महाविद्यालयो ह्येष लब्धाध्यक्षमिमं वरम्।**
**शीर्षं समुन्नतेर्यातो यन्नैव भविता क्वचित्॥**

**आधुनिकीं तथा काषीदुच्छलां कुलप्लाविनीम्**
**संस्कृतस्य प्रशिक्षार्थं धाराद्वयमपेक्षितम्।**[11] इति।

विश्वविद्यालये प्राचीनभारतीयशास्त्रचर्चायै नैके प्राकृत–पालि–भाषातत्त्व–शैव–वैष्णवदर्शन–महाचार्यादिविभागाः सयत्नं सम्प्रवर्तितास्तेन। तथा च, शिक्षाप्रशासकस्य गौरीनाथस्य महार्घ्याणि कार्याणि शिक्षाप्रसारार्थं चत्वारिंशत्प्रायैः श्लोकैः सीतानाथः समुपस्थापितवान्। गौरीनाथस्य सकाशे स्वमहाविद्यालयं न हि केवलं शिक्षामन्दिरञ्चापि स्वकभवनसंकाशमिति वर्णयति कविः सरलया हृद्यया च भाषया। तथाहि स गृहे यथा साधारणवस्त्रादिकं परिदधाति तथैव विद्यागेहेऽपि। तथाहि–

**चट्टीति पादुके धृत्वा पादयोर्गौरीकान्तिकः।**
**दीर्घावयवसम्पन्नो धूतिगेञ्जिपरिच्छदः॥**

**ललाटेन प्रशस्तेन भ्राजमानः स्मिताननः।**
**प्रभावेन स्वकीयेन निखिलानभिभावयन्॥**

**प्रविश्य नियतं स्वीये महाविद्यालयान्तरे।**
**सर्वत्र पदसञ्चारं कृत्वा नियमतः सुधीः॥**[12] इति।

---

11. *गौरीनाथचरितम्*, 114–116
12. तत्रैव, 173–174

प्राच्यविद्यासु तस्य वैदुष्यस्य स्वीकृतिरूपेण भारतवर्षस्य प्रतिनिधिपदञ्चालङ्कृत्य 'सातीत्य देशसीमानं विश्वेऽभ्रमन्निरन्तरम्' सः।

समाजसंस्कारकत्वेन प्रतिवादिचरित्ररूपेण तस्य जीवनालेख्यं चित्रितं 220 मितश्लोकतः 227 संख्यकश्लोकं यावत् कविना असाधारणवाङ्मयेन। परिशेषे गुरुमुद्दिश्य श्रद्धावनतचेतसा कायिकेन वाचा च प्रणामाञ्जलिर्विनिवेदितः कविना-

**वङ्गमातुर्वरं पुत्रं पूतसंस्कृतिविग्रहम्।**
**गौरीनाथं गुरुं वन्दे भक्तिनम्रात्मकन्धरः॥**

............................................

**गौरीनाथ गुरो क्वास्ते चरितं ते महत्तमम्।**
**ज्ञानस्य कर्मणो भक्तेर्योगस्य च प्रकर्षवत्॥**

**सहस्रमार्गसञ्चारि विश्वविस्मयकारकम्।**
**क्व वास्य तव शिष्यस्य मतेर्मन्दतमा गतिः॥**[13] इति।

विशेषेण समुल्लेखार्हं यत् 2012तमे ख्रिष्टाब्दे संस्कृतसाहित्यपरिषत्पत्रिकायां काव्यमिदं प्रचरद्रूपतां गतम्।

### ॥6- कविते विश्ववन्दिते॥

कविवरोऽयं वङ्गप्रदेशस्य कश्चन विशिष्टः काव्यतात्त्विकश्चालङ्कारिक इति कृत्वा तस्य प्रत्येकं धमण्यां सततं प्रवहति लोहितशोणितात्मककाव्यतत्त्वम्। तथाहि काव्यवैशिष्ट्यानि स्वत एव तद्धमनितो निःसृत्य सरलमनोभङ्ग्या 'कविते विश्ववन्दिते' इति मौलिककाव्यग्रन्थे रोचिष्णुतया पदं कुर्वन्ति। अत्र कवितेति पदं काव्यपरम्। कवितायाः प्रशंसापरकेयम्। कवितेयं वर्धमानविश्वविद्यालयस्य 'ऋताम्भरी' इति पत्रिकायाः वर्षेऽस्मिन् एव भवेत् प्रकाशिता।

कविता कविमानसोत्थतीव्रानुभूतेर्विशेषे क्षणे स्वसत्तां लभते। विश्वजनीनमानसे तस्याश्चिरन्तनी सगौरवा स्थिती राजते। वयसातिप्रवीणापि नवीना सा सदैव पाठकानां मनो रञ्जयन्ती विराजते। तस्यामलंकार-रीति-रस-भाव-वक्रोक्त्यौचित्यानां स्थितिर्विद्यते-

**प्रत्यङ्गमालिङ्ग्य विराजते ते**
**जन्मक्षणाद् विस्मयिता सखीव।**

**जगुप्सितञ्चेप्सिततां प्रयाति**
**त्वदङ्गसङ्गं लभते यदीह॥**[14] इति।

---

13. तत्रैव, 239-244
14. *कविते विश्ववन्दिते* -10

देशस्य स्वाधीनतान्दोलने देशप्रेमिकान् प्रोत्साहयति कवितेयं– 'स्वतन्त्रतां देशगतां त आप्तुं / यच्छन्ति प्राणान् भवतीं स्मरन्तः।' इति। ब्रह्मस्वरूपं यथा देवैरप्यज्ञातं तथैव मीमांसकानामनेकेषां प्राचीनकालादधुनापि प्रचेष्टा व्यर्थतां गता काव्यस्वरूपविषयिणी। प्रतिक्षणं सचेतोभिः काङ्‌क्ष्यमानापि सा सङ्गतौ प्राप्तिसीमान-मतिक्रम्य सरहस्यावतिष्ठते। कविता मानवेन मानवान्तरस्य, जात्या जात्यन्तरस्य, अतीतेन भविष्यतः, देशेन देशान्तरस्य, कविना सहृदयस्य, अरण्यप्रकृत्या मानवप्रकृते-र्मिलनं साधयति कविता। सा चाद्वैतवादिनोऽपि द्वैतमार्गे प्रेरयति–

**द्वैताद्वैतमते भिन्नस्वरूपेऽभिन्नरूपता।**
**कदाचिदेवमायाति कविते तव शक्तितः॥**[15] इति।

कवितायाः नाट्यरूपस्य रामकृष्णादौ, भजनगीतिरूपायाः, शाक्तपदावलीरूपायाः, वैष्णवस्तोत्रात्मिकाया, अरविन्दकविताया, रोगविमुक्तये च प्रभावो विद्योततेतमाम्। कवितेयं पुरुषार्थसाधिका, कलाप्रावीण्यदात्री, कान्तासम्मितोपदेशदात्री, नियतिकृत-नियमरहित्री, प्रतिक्षणं नवायमाना च। किञ्च, सा नरचित्तमूर्द्धं नयति मानवानामानन्द-तृष्णामपि। पाठकानानन्दमयसत्तायां स्थापयति, पङ्कजवत्तुच्छाल्लब्धजन्मापि सौन्दर्यं वितनोति, सर्वेषु लोकेषु तथा सर्वभाषासु च विचरति सा। तदुक्तं कविना–

**पृथ्वीदिवो भेदमतीत्य कामं**
**सर्वत्र निर्वाधतया भ्रमन्ती।**
**भाषासु सर्वासु कृतप्रकाशा**
**भावैर्विचित्रैः कविते विभासि॥**[16] इति।

वैज्ञानिकसत्यादि्भन्नं तावत् काव्यसत्यम्–

**वैज्ञानिकाद् वास्तविकात् प्रभिन्ने**
**सत्यात्तथा दर्शनदृष्टिसम्भवात्॥**[17] इति।

कवितायाः छन्दोवैचित्र्येण कविचित्तं मोमुद्यते, सौन्दर्य्येण पृथ्वी सुन्दरी, संगीतेन मानवचित्तमेकतानीभवति, समुद्रे तरङ्गा जायन्ते। कवितेयं निष्प्राणादौ प्राणसञ्चारादिकं करोति। जगति कवितायाः स्वरूपविषये वास्तवता–कल्पनाप्रभव-कल्पना–कलाकैवल्यादिविविधानि मतानि प्रादुरभवन्–

**एवमन्यान्यनेकानि मतानि विषये तव।**
**कविते परिदृश्यन्ते दुर्विज्ञेया तथाप्यसि॥**[18] इति।

---

15. तत्रैव –32
16. तत्रैव–67
17. तत्रैव, 72
18. तत्रैव–84

परिशेषे संस्कृतकाव्यधारायाः क्रमविकाशः कविना दशभिः श्लोकैर्विन्यस्तः।

**अर्वाचीनसाहित्यसमीक्षादर्पणे सीतानाथस्य काव्यमूल्यायनम्-**

अप्रतिमवाङ्मयसर्जकस्य सीतानाथस्य मूल्याङ्कनं विदधानः राधावल्लभो युक्त्या कथयन्नाह- यत् सीतानाथस्य काव्येषु- "क्वचिद् ध्वनेर्विलसनं क्वचिद्रसस्याभिव्यञ्जनं, क्वचिद्वक्रोक्तेः प्रयोगः, कुत्रापि कौतुकमयता, कुत्रापि कल्पनायाः समुदारता च जनमानसमानन्दयन्ति" इति। वस्तुतः सीतानाथस्य काव्यसंसारस्तथा समृद्धिमान् वर्तते यत् क्वचित् कालिदासः क्वचिन्माघः क्वचिद् भवभूतिः, क्वचित् श्रीहर्षस्तत्र विचरन्निव भातीति।

सीतानाथस्य कृतित्वं विपुलं वरीवर्ति। नाना पक्षास्तस्मिन् समुल्लसन्ति। तांश्च परिचाययन् वर्तमानो बन्धकृत् युक्तमुक्तवान्- "केचन पक्षास्तदीय विविधमुक्त-काव्यप्रणेतुरस्य नूत्नं रहस्यवादवाच्यमनिर्वचनीयप्रेमतत्त्वभावनाधारामादाय सनातनानां भावानां व्यक्तीकरणं मिथः प्रत्यास्था चेति ग्रन्थस्यास्य एकः पक्षः। समकालिकी चेतना कवेरस्य सीतानाथस्य काव्ययात्रायाः प्रस्थानमपरम्। कविरयं क्वचित् क्वचिदन्तर्मुख आत्मानमवलोकयति इति तृतीयपक्षः। सीतानाथस्य कर्तृत्वे वैदिको विश्वबोधः पुनरुन्मीलतीति महान् कवेर्विशेषः। स च 'वद शिल्पसंस्कृते' इत्येतादृशेषु काव्येषु प्रतिफलितः। कवेः काव्येषु क्वचित् कालिदासः प्राणिति, रवीन्द्रनाथो वा जागर्ति। अस्य कविताजातं वेदान्ततत्त्वानुभूतिं नवीनेषु सन्दर्भेषु हृदयङ्गमां विधत्ते। "सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः। सीतानाथसदृक्षा विरलाः संवेदनप्रवणाः।।" इति।

अयं चापरो महान् विशेषः सीतानाथस्य कवेः काव्ये यत् तत्र वैदिकः विश्वबोधः नवीनभङ्ग्या पुनराविष्क्रियते। इति। यद्यपि सीतानाथ आचार्यः क्वचित् क्वचित् परुषं स्वरमपि समेधयति, परन्तु वक्रोक्तिकारस्य कुन्तकस्य लक्षणानुसारेणायं सुकुमारमार्गस्य कविः।

प्रख्यातसाहित्यकृत् तथा कालिदाससंस्कृतविश्वविद्यालयस्य उपाचार्यः प्रो. मधुसूदनपेन्ना मन्यते यत् लालित्येन साकमत्र गम्भीरं चिन्तनमपि सहृदयानां हृदयानि समाकर्षति। अनुवादे च आचार्यस्य भाषा सरला सुखबोध्या च। नास्ति तत्र वचनवक्रता। बोधसौविध्यार्थं नास्ति कुत्रापि काठिन्यम्। 'का त्वं शुभे' इति गीतिकाव्ये क्वचित् सम्भोगशृङ्गारस्य क्वचिच्च विप्रलम्भशृङ्गारस्य प्रयोगाद् रम्यता काचिदाविष्कृता। उदाहरणार्थमिदं पश्यन्तु का त्वं शुभे इत्येतत्काव्यगतं पद्यम्-

**स्मयितं हसितं निरीक्षितं क्रमहीनं बहुजल्पितं मुहुः।**<br>**द्वितयं द्वितयं चतुष्टयं समभूज्जागरितं दृशाञ्च नौ।।**

सर्वथाऽपि कवेरस्य प्रतिभा विलक्षणा मानवजीवनस्य विभिन्नान् अनुभव-क्षणानाविष्कर्तुमत्यन्तसमर्था। तदीयकृतिवैविध्यावलोकनेन सर्वोऽपि कविहृदयान्तर्भावान् आस्वादयितुं समर्थो भवति। मुख्यतः, कवेः सीतानाथस्यापि काव्येषु साधारणतया पारम्परिककाव्यशैल्या आधिक्यं विद्यमानमपि समाजस्य समकालिकीं स्थितिमुपेक्ष्य सोऽपि स्थातुं नार्हेत। तथाहि तस्यापि काव्यवीथिकायां ऐतिह्याधुनिकतयोः समन्वयो नयनपथे प्रतिपदमेव पान्थायते।

कवेः सीतानाथस्य अन्तेवासिनः प्रो. अयनभट्टाचार्यस्योक्तौ सीतानाथीयकाव्यानां कियन्मूल्यमिति शक्यवचम्-

**खड्गाघातः किमु समुचितो मृत्युपीडाविषण्णे**
**शोकार्तानां श्रवणविवरे तप्तशङ्कोर्निवेशः।**

**किन्त्वाश्चर्यं तदनु पठतां कुर्वतामश्रुपातं**
**शोकश्चक्रे रसपरिणतः सौख्यपीयूषवर्षम्॥**

**सोऽयं विद्वत्प्रसिद्धः कविकुलतिलको भारतीमर्त्यमूर्तिः।**
**सीतानाथाभिधानः सहृदयरमणः काव्यकाराग्रगण्यः।**

**प्राप्य प्राप्यं समस्तं बुधगणसमितौ मानितो मानपत्रैः।**
**श्रीनाथे न्यस्तचित्तश्चिरमभिलषितं रामधाम प्रविष्टः॥**[19]

परिशेषे वक्तुमलं यदेकविंशशताब्द्यां सीतानाथाचार्यशास्त्री वङ्गप्रदेशस्य कविषु मुर्ध्नि राजते स्म। स हि तस्य असामान्यकारयितृप्रतिभया संस्कृतकाव्यविश्वं विभूषयति। आधुनिकसंस्कृतवाङ्मये कलाकैवल्यवादापेक्षया वास्तवतावादस्य प्राधान्यमधिकमिति मतं तेन प्रमाणीकृतम्। आबाल्यात् आचार्यः सीतानाथः संस्कृतानुरागी आसीत्। बाल्ये काव्य-व्याकरणन्यायादिशास्त्रेषु पारिवारिकमैतिह्यमनुसृत्य व्युत्पत्तिं प्राप्तवान् अयम्। न केवलमासीत् स संस्कृतकविः, अपि च प्राज्ञः काव्यतत्त्ववेत्ता सहृदयः। अयं च प्रकाण्डो विद्वान् आपञ्चाशद्भ्यो वर्षेभ्यः निरन्तरं साहित्यसेवासंलग्न आसीत्।

विश्वभारतीविश्वविद्यालयस्य वरिष्ठाध्यापकानाम् अरुणकुमारमण्डलानां श्लोकमुखेन कवेः सीतानाथस्य काव्यमूल्याङ्कनोल्लेखेनैव प्रबन्धस्यास्य समाप्तिर्विधीयते-

**“भावविलसितं, काव्यसञ्चयनं, का त्वं शुभे।**
**शिशुयुवदुर्दैवविलसितं, काव्यनिर्झरी॥19॥**

---

19. ‘कश्चिद्विचित्रः कविः’, कविः - प्रफेसर्-अयन-भट्टाचार्यः। गुरोः सीतानाथस्य प्रयाणमुपजीव्य ग्रथितेयं कविता।

**नागमो धरणीप्रान्ते, अन्यापदेशपञ्चकम्।**
**सदा विभेमि नारीभ्यः, किम्बा वर्षसमापनम्॥20॥**

**आत्मकथा सिगारेटस्य, बुद्धः स्मयमान, आः।**
**कवीन्द्र वद हे, चेत्थं निगमानन्दवन्दनम्॥21॥**

**जयदेवः, महारुद्रः सञ्जीभवति ताण्डवे।**

**इत्यादयो यति ग्रन्थाः प्रज्ञासिन्धु-समुद्भवाः॥22॥**

**कृते विद्याचिकीर्षूणां सीतानाथेन निर्मिताः।**
**हृदि सहृदयानां ते परं श्रिया चकासति॥23॥**

**एकविंशे द्विसाहस्त्रे मासे चाक्टोवरे प्रधीः।**
**लोकान्तरं जगामासावष्टाविंशति वासरे॥24॥**[20] इति शिवम्॥

**ग्रन्थसूची**


- आचार्यः, सीतानाथशास्त्री (2010), काव्यनिर्झरी, विजययन, कलिकाता।
- ............................(1998), भावविलसितम्, (प्रका.) दीप्तिमिश्रा, रयालइण्डियनपब्लिकेशन्।
- ..............................(1999), शिशुयुवदुर्दैवविलसितम्, प्रकाशिका-दीप्तिमिश्रा, रयाल इण्डियन पब्लिकेशन्, कोलकाता।
- चट्टोपाध्यायः, ऋता (2008), सीतानाथ आचार्य : कवि ओ प्राबन्धिक, संस्कृत वुक् डिपो, कोलकाता।
- भट्टाचार्यः, अयनः (2008), पद्यवल्लरी, संस्कृत बुक् डिपो, कोलकाता, प्रथमसंस्करणम्।


✦✦✦

---

20. शुभ्रजित्सेनेन लिखितस्य *आचार्यसीतानाथशास्त्री* : कविः सहृदयश्च इति ग्रन्थस्यादौ प्रो. अरुणकुमारमण्डलैः लिखितायाः 'संस्कृतं मे समेधताम्' इति शीर्षककवितायाः अंशविषयोऽयम्।

 ISSN : 0975-1769

# उपमानप्रमाणम् : अवधारणा समीक्षा च

**-रमेशचन्द्रः नैलवालः**

**शोधसारः**

भारतीयदर्शनेषु प्रमाणस्य सर्वाधिकं महत्त्वमर्हति। ज्ञानेनैव मुक्तिः इति प्रायः सर्वे स्वीकुर्वन्त्येव, तदा अनुभूतं ज्ञानं सत्यमस्ति न वा इत्यस्य परिज्ञानाय आवश्यकता भवति कस्यापि प्रमाणस्य। अत एव दार्शनिकैः प्रमाणविषये विस्तृती चर्चा विहिता। प्रमायाः करणं प्रमाणं भवति। करणं नाम 'व्यापारवदसाधारणं कारणं करणम्। नैय्यायिकैः "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति चत्वारि प्रमाणानि स्वीकृतानि, तथा वैशेषिकाचार्यैः प्रत्यक्षानुमाने द्वे एव प्रमाणे स्वीकृते। लोकायतिक-चार्वाकैस्तु उपमानप्रमाणस्य आवश्यकता न स्वीकृता। वेदान्तिनां कुमारिलमतानुयायिभिः मीमांसकैस्तु षट् प्रमाणानि स्वीकृतानि, तेषु उपमानमपि वर्तते। तथैव प्रभाकर-मतानुयायिभिः मीमांसकैरपि पञ्चप्रमाणेषु उपमानस्यावश्यकता स्वीकृता। न्यायदर्शने चत्वारि एव प्रमाणानि स्वीकृतानि - प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च। यथा चाह सूत्रकारः- "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"। यद्यपि अन्यैरपि अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यादीनि च प्रमाणानि स्वीकृतानि तथापि तेषां पृथक्त्वरूपेण प्रमाणान्तरता न स्वीकृता। एवं प्रमाणानां सङ्ख्याविषये मतभेदाः लभ्यन्ते; तदा एषु विविधप्रमाणेषूपमानप्रमाणस्यावश्यकता प्रामाणिकता चेत्यस्मिन् विषये चिन्तनं करिष्यते।

**शोधपद्धतिः** - शोधपत्रेऽस्मिन् मुख्यतया विवेचनात्मकशैल्या आलोचनात्मक-शैल्याश्च प्रयोगः वर्तते; यतोहि न्यायभूषणे उपमानप्रमाणविषये के नवीनविषयाः उपस्थितापिताः सन्ति। अतः न्यायभूषणकारस्य मतविवेचनक्रमे समीक्षात्मकशैल्याश्रयणं क्रियते।

**परिणामः चर्चा च**- न्यायभूषणकारस्योपमानप्रमाणविषयकाणां विशिष्ट-मतानामुपस्थापनं प्रस्तुतशोधप्रबन्धस्य मुख्यलक्ष्यं वर्तते। भारतीयन्यायशास्त्रपरम्परायां भासर्वज्ञस्य योगदानं विशिष्टमस्ति; अतः प्रस्तुतशोधप्रबन्धमाध्यमेन तस्य न्यायभूषण-ग्रन्थस्य विशिष्टसिद्धान्तानामवबोधने साहाय्यं भविष्यति।

---

* सहायकाचार्यः, संस्कृतवैदिकाध्ययनविभागः, बाबासाहेब-भीमरावअम्बेडकरविश्वविद्यालयः, लखनऊ, उत्तरप्रदेशः।

**प्रमुख शब्दाः** - प्रमाणम्, उपमानम्, अनुमानम्, शब्दप्रमाणम्, प्रमा, प्रमाता।

## आमुखम् -

'प्र'उपसर्गपूर्वकात् 'मा' माने धातोः करणे भावे च 'ल्युट्' प्रत्यये कृते सति निष्पन्नोऽयं प्रमाणशब्दः, यस्य द्वौ अर्थौ स्तः- 1.भावेऽर्थे- प्रमा[1], करणेऽर्थे- प्रमायाः करणम्[2]। यद्वस्तु यथा स्यात् तस्य तथैव ग्रहणं 'प्रमा' इत्युच्यते- "यदर्थविज्ञानं सा प्रमा"[3]। तस्याः प्रमायाः करणं प्रमाणं भवति। करणं नाम 'व्यापारवदसाधारणं कारणं करणम्। नैयायिकैः "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति चत्वारि प्रमाणानि स्वीकृतानि, तथा वैशेषिकाचार्यैः प्रत्यक्षानुमाने द्वे एव प्रमाणे स्वीकृते। लोकायतिक-चार्वाकैस्तु उपमानप्रमाणस्य आवश्यकता न स्वीकृता। वेदान्तिनां कुमारिलमतानुयायिभिः मीमांसकैस्तु षट् प्रमाणानि स्वीकृतानि, तेषु उपमानमपि वर्तते। तथैव प्रभाकरमतानु-यायिभिः मीमांसकैरपि पञ्चप्रमाणेषु उपमानस्यावश्यकता स्वीकृता। न्यायदर्शने चत्वारि एव प्रमाणानि स्वीकृतानिप्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च। यथा चाह सूत्रकारः- "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[4]। यद्यपि अन्यैरपि अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यादीनि च प्रमाणानि स्वीकृतानि तथापि तेषां पृथकत्वरूपेण प्रमाणान्तरता न स्वीकृता।

**उपमानप्रमाणम्**- उपमानप्रमाणस्य विषये प्रायः विभिन्नदार्शनिकानां मतवैभिन्न्यं वर्तते; यतोहिकेचन दार्शनिकास्तु अस्य पृथग्रूपेण प्रमाणान्तरत्वं स्वीकुर्वन्ति, पुनः केचन अनुमानप्रमाणान्तर्भावं कृत्वा पृथक्प्रमाणतां न स्वीकुर्वन्ति, पुनः केचन तु अस्य प्रामाण्यमेव न स्वीकुर्वन्ति। न्यायदर्शने चतुर्थप्रमाणरूपेणोपमानस्य गणना वर्तते। न्यायसूत्रे गौतमेन उपमानप्रमाणस्य लक्षणं कृतं यत्- **"प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्"**। तर्कसंग्रहे उपमितिज्ञानस्य करणम् उपमानम्। यथा- **"उपमितिकरणमुपमानम्"**[5], तत्करणं सादृश्यज्ञानम्। यथोक्तम्-"प्रसिद्धसाधर्म्यात्साध्य-साधनमुपमानम्"[6] तर्कभाषाकारेण केशवमिश्रेण उपमानप्रमाणविषये उक्तम्- "अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमुपमानम्"। अतः अतिदेश-वाक्यं श्रुत्वा कश्चन पुरुषः अरण्यं गच्छति, तदा गोसादृश्यविशिष्टपिण्डं पश्यति,

1. 'तद्वति तत्प्रकारकोऽनुभवो यथार्थः'। तर्कसङ्ग्रहः, पृ. 3
2. प्रमाकरणं प्रमाणम्। अत्र प्रमाणं लक्ष्यं, प्रमाकरणं लक्षणम्। तर्कभाषा, पृ.- 13
3. न्यायभाष्यम्, पृ. 14
4. न्यायसूत्रम् 1.1.3
5. तर्कसंग्रहः पृ. 30
6. न्यायदर्शनम् 1/1/6

तथा अतिदेशवाक्यस्मरणं करोति, तदा तदैव सः स्मरणसहैव गोविशिष्टपिण्डज्ञान-मुपमानस्य उपमितिं करोति। गोसादृश्यपिण्डदर्शनान्तरं सः अयं पिण्डः गवयपदवाच्यं इति संज्ञासंज्ञिप्रतिपत्तिं करोति। तदेव उपमानस्य फलम्। अतः अपरोक्षगोसादृश्यस्मरणं प्रत्यक्षगवयपिण्डदर्शनेन भवति। नैय्यायिकानां मते संज्ञासंज्ञिप्रतीतिः भवति।

**नैयायिकमीमांसकयोः उपमानप्रमाणे भेदः** –नैयायिकानुसारेण यः गवयपदार्थं न जानाति, स अरण्ये कश्चन पुरुषवाक्यात् ज्ञानं करोति यत्– गवयः गोपदार्थ-वदाकृतियुक्तः वर्तते। तदा यदा एतादृशः जीवः प्राप्यते चेत्, तस्य तत्र मेलनं करिष्यामीति। यदा तेन पुनः तज्जीवः दृष्टः तदा सः कथयति तत्सदृशोऽयं इति। परं मीमांसकैः उपमानस्य निरूपणं पृथक्प्रकारेण कृतम्। तेषां मते उपमानजन्यं ज्ञानं तदा भवति यदा पूर्वदृष्टवस्तुमाध्यमेन अन्यतत्सदृशवस्तु दृष्ट्वा जानन्ति यत् तत् स्मृतवस्तु प्रत्यक्षदृष्टवत् साम्यं भजते। अत्र वाक्यस्यावश्यकता न भवति। मीमांसकानां उपमानप्रमाणव्याख्या पाश्चात्त्यतर्कशास्त्रिणां सादृश्यानुमानेन मिलति।

**उपमानप्रमाणस्य उपमालङ्कारस्य च अन्योन्यं भेदः**– प्रायः काव्यशास्त्रिभिः स्वीकृतस्य उपमालङ्कारस्य दार्शनिकैः स्वीकृतस्य उपमानप्रमाणस्य च मध्ये साम्यं परिदृश्यते, यतो हि उपमालङ्कारे उपमानस्य सामान्यधर्माणां माध्यमेन उपमेयस्य धर्माणां ज्ञानं भवति। न केवलं धर्माणामेव ज्ञानं भवति, अपितु उपमेयभूतप्रमेयस्यापि सम्यक्प्रतिपत्तिः भवति, तथैव उपमानप्रमाणेऽपि उपमानभूतगवादिपदार्थानां साधारणधर्मैः गवयाद्युपमेयभूतपदार्थानां ज्ञानं भवति, अतः दृश्यते प्रायः अत्र साम्यं, वर्तत इति नास्ति कश्चन संदेहः अत्र। परं सूक्ष्मदृष्ट्या दर्शनेन ज्ञायते यत्– उपमालङ्कारे यदा उपमानभूतपदार्थमाध्यमेन उपमेयस्य ज्ञानं भवति, तदा द्वयोः उपमानोपमेययोः ज्ञानं तु उपमालङ्कारस्य ज्ञानात्पूर्वमपि भवति, यतो हि द्वयोः उपमानोपमेययोः सम्यग्ज्ञानं न भवति चेत् तदा उपमालङ्कारमाध्यमेन साधारणधर्माणामपि ज्ञानमपि न भविष्यति। पुनः उपमानप्रमाणे तु उपमानमाध्यमेन उपमेयस्य ज्ञानं भवति, तथा ज्ञानात् पूर्वं न द्वयोःह ज्ञानं भवति, अपितु ज्ञातोपमानमाध्यमेनाज्ञातोपमेयस्य ज्ञानं भवति। अतः उपमालङ्कारोपमान-प्रमाणयोः वर्तते भेदः इति।

वेदान्तिनां मते उपमानप्रमाणम्– वेदान्तिनां मते "अनेन सदृशी मदीया गौः" एतद्ज्ञानमेवोपमानप्रमाणस्य फलं वर्तते। तदानुभवोऽपि एतदेव भवति यत्– अस्य पशोः सदृशी एव मदीया गौः इति। अतः "गोसदृशी गवयः" इत्यतिदेशवाक्यस्य स्मृतिरूपव्यापारस्य कल्पनां कृत्वा पश्चात् तेन "गवय" शब्दो वाच्योऽस्ति, एतादृशस्य ज्ञानस्य कल्पना अनुभवविरुद्धा वर्तते। पुनः शङ्का भवति यत्– "अनेन सदृशी मदीया गौः" इत्यादिज्ञानानि अन्यप्रमाणेनापि भवेयुः? तदा का आवश्यकता उपमानप्रमाणस्येति। तदा उक्तम्– एतद्गवयनिष्ठसादृश्यज्ञानं प्रत्यक्षेणापि भवेत्, तत्र

सत्यम्, यतोहि तदा गवा सहेन्द्रियार्थसन्निकर्षो न भवति। अनुमानप्रमाणेन तस्य ज्ञानं भवेत्, इत्यपि न सत्यम्। यतो हि गवये स्थितस्य गोः सादृश्यज्ञानस्य लिङ्गमेव न वर्तते। यथा- मम गौः गवयसदृशी, यतोहि तस्यां एतद्गवयनिष्ठसादृश्यस्य प्रतियोगित्वं वर्तते, यः यस्मिन् स्थितस्य सादृश्यस्य प्रतियोगीः वर्तते, स तत्सदृशो वर्तते।

**उदाहरणं यथा**- चौत्रः मैत्रे स्थितस्य सादृश्यस्य प्रतियोगी वर्तते, अतः सः मैत्रसदृशः। अनेन अनुमानेन गवयनिष्ठसादृश्यज्ञानं भविष्यति, एतादृशी आशङ्कापि न सम्यक् वर्तते, यतोहि अनुमानेन विनापि "अस्य गवयसदृशो मदीया गौः" एतादृशं ज्ञानं भवति, एतदनुभवसिद्धं वर्तते तथा अस्य ज्ञानानन्तरमहं एनं ज्ञानमुपमानप्रमाणेन जानामि एतादृशः अनुव्यवसायः वर्तते। अतः उपमानप्रमाणं स्वतन्त्रप्रमाणं वर्तते। यथोक्तम्- "यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृशः" अनुमानात्तत्सम्भव इति वाच्यमेव गवय सदृशी मदीयगौरिति प्रतीतेरनुभवसिद्धत्वात्। उपमिनोमीत्यनुव्यवसायाच्च। तस्मादुपमानं पृथक् प्रमाणम्। वेदान्तपरिभाषाकारेण स्वग्रन्थे साङ्ख्यदार्शनिकानां प्रत्यक्षप्रमाणे एव उपमानस्य अन्तर्भावस्य खण्डनं विहितम्। साङ्ख्याचार्याणां मते "गवयेन" सह इन्द्रियसन्निकर्षे सति तस्मिन् सादृश्यज्ञानमपि भवति तथा सः प्रत्यक्षात्मक एव भवति। तथैव गोः स्मरणे सति गवि यत्सादृश्यज्ञानं भवति, तज्ज्ञानमपि प्रत्यक्षेणैव भवति, यतोहि सादृश्यज्ञानेन गवये स्थितं सादृश्यं गवि स्थितेन सादृश्येन भिन्नं न वर्तते। यत्सादृश्यं गवयनिष्ठं वर्तते, तत्सादृश्यं कस्यापि जातेः अन्यस्यां जातौ स्थितं यत् भूयोऽवयवसामान्य-योगरूपसम्बन्धमस्ति। तथा एतादृशस्य सादृश्यस्य गवये येन प्रकारेण प्रत्यक्षात्मकं ज्ञानं भवति, तथैव गवि अपि तस्य प्रत्यक्षात्मकं ज्ञानमुचितमेव, इति साङ्ख्याचार्याणां मतम्।

अत एव सादृश्यं न प्रमाणान्तरम्, तस्य प्रत्यक्षे एव अन्तर्भावः भवति परं वेदान्तिनां मते सांख्यस्य एतत्कथनं न समीचीनम्, यतोहि सादृश्यन्तु सर्वत्र समानमेव। तथापि तेषां धर्मिणः, प्रतियोगिनश्च तु पृथगेव भवन्ति। अत एव तत्तद्विशिष्टव्यक्तौ स्थितं सादृश्यमपि पृथक्-पृथक् भवति। सादृश्यं यस्मिन् प्रतीयते सः सादृश्यस्य धर्मी भवति; तमेव सादृश्यस्य अनुयोगिनमपि कथयन्ति। यस्य सादृश्यस्य भासितं भवति, सः प्रतियोगी- भवति। "गो सदृशी गवयः" इत्यत्र गवये गोसादृश्यं भासते, अतः सादृश्यस्य गवयः धर्मी उत अनुयोगीः वर्तते, तथा गौः प्रतियोगीः वर्तते। एवं गोगतगवयं (सादृश्यं) पश्यामि इत्यत्र गोनिष्ठगवयसादृश्यं पृथक् एव वर्तते। अत एव गवयप्रत्यक्षे सति तस्य इन्द्रियैः सह सन्निकर्षः भवति। अत एव तद्गत्सादृश्यं प्रत्यक्षभासितम् पुनः गौस्तु तत्र प्रत्यक्षं भवति एव न, अतः इन्द्रियार्थसन्निकर्षोऽपि न भवति, अतः गोनिष्ठसादृश्यं प्रत्यक्षविषयं भवति एव न।

वैशेषिकानां मतं वर्तते यत्- प्रत्यक्षे उपमानस्य अन्तर्भावः न भवति, अनुमाने सति तु भवितुं शक्यते। वैशेषिकानुसारेणानुमानप्रमाणमनेन प्रकारेण भवति- मदीया गौः गवयनिरूपितसादृश्ययुक्ता वर्तते; यतोहि सः गोनिरूपितः अर्थात् गौः यस्य प्रतियोगीः वर्तते, तथा गवय यस्यानुयोगीः वर्तते, तादृशः सादृश्ययुक्तो वर्तते अतः गवयसादृश्यम् इति।

यदि एतादृशे स्थले अनुमानं स्वीक्रियते अनुमाने स्वरूपासिद्धिः दोषः आगच्छति। हेतोः पक्षे न स्थितिः एव स्वरुपासिद्धिः दोषः वर्तते। अत्र हेतुः "गोप्रातियोगिकसादृश्यं" भजते, सः हेतुः गोरूपपक्षे न वर्तते। गवि गवयनिरूपितसादृश्य तु भवति, परं गवि गोनिरूपितसादृश्यं कथं भविष्यति। सादृश्यभेदस्थिते सति, द्वयोः पदार्थयोः भेदेन विना तस्मिन् सादृश्यं वर्तते, एतत्कथनं न समीचीनम्। यः हेतुः स्वपक्षे एव न भवति, सः कथं साध्यसिद्धिं प्रति योग्यः भविष्यति। अतः अनुमानेन उपमानस्य गतार्थता न भवति[7]। यथा- यत्र साध्यः (वह्न्यादयः) प्रत्यक्षो वर्तते, तत्रापि "पर्वतो वह्निमान् धूमात्" इति अनुमानमेव भवति। परं तेनैव प्रत्यक्षप्रमाणस्य व्यर्थता न सिध्यति (अनुमानेन प्रत्यक्षः अगतार्थः)। तथैव अनुमानेन यद्यपि उक्तसादृश्यज्ञानस्य सिद्धे सत्यपि उपमितिप्रमायाः पृथगनुभववशाद् उपमानप्रमाणं अनुमानेन चरितार्थो न भवति। तथा सादृश्यज्ञानानन्तरं "अयम् अनुमिनोमि" इत्यत्र अस्य गवयसादृश्यस्य अनुमानं करोमि- एत दनुव्यवसायं न भवति। अत्रापि गोनिष्ठसादृश्यज्ञानम् अनुमित्यात्मकं न भूत्वोपमित्यात्मकं भवति एतद् सिद्धं भवति। अतः उपमानं एकं स्वतन्त्रप्रमाणं वर्तते।

यथा- यत्र साध्यं(वह्निः) प्रत्यक्षं वर्तते, तत्रापि "पर्वतो वह्निमान्, धूमात्"- अनुमानं करोति। परं तेनैव प्रत्यक्षप्रमाणस्य व्यर्थता न सिध्यति। तथैव अनुमानेन यद्यपि उक्तं सादृश्यज्ञानसिद्ध्यै उपमितिप्रमायाः पृथगनुभावेन उपमानप्रमाणमनुमानेन चरितार्थं न भवति। धर्मराजाध्वरीन्द्रः उपमानस्य निरूपणं कुर्वन् कथयति यत् सादृश्यप्रमायाः कारणमुपमानं भवति। यथा- यः जनः नगरे गौपिण्डस्य दर्शनं कृतवान्, पुनः अरण्ये गत्वा यदा गवयम् पश्यति, तदा चक्षु-रिन्द्रियेण गवयेन सह सन्निकर्षो भवति। तस्मिन्नवसरेसः गवयपिण्डः गौरिव प्रतीयते। तथा एतादृशं ज्ञानमपि

7. उपमानस्य न प्रत्यक्षे नाप्यनुमाने अन्तर्भावो भवति। गवि जायमानमुपमिति पदवाक्यं गवय सादृश्यज्ञानं प्रत्यक्षेण भवति इति वदन् वादी प्रष्टव्यः। किं गवयज्ञानं प्रत्यक्षेण भवतीति तात्पर्यम् उत सादृश्यज्ञानम् आहोस्विद् गो ज्ञानम् आहोस्वित् गो सादृश्य वैशिष्ट्यज्ञानम्? तत्र आद्ये इष्टापत्तिः अतएव न द्वितीयः तृतीये उपमानप्रमाणं बिना स्मृतायां गवि सादृश्यवैशिष्ट्यग्रहाः असंभवः, अतएव न तृतीयः गतांशे इन्द्रियसन्निकर्षाभावेन प्रत्यक्षत्वं न सम्भवति इति स्मृतिरे ववक्तव्या। तदुक्तं वार्तिकेम्- नगरस्यागन्तुकज्ञानं स्मरणान्नातिवर्तते इति। तथा च न प्रत्यक्षे उपमानस्यान्तर्भावः। वेदान्त परिभाषा, पृ. 49

भवति। तदनन्तरं तं पुरुषं "अनेन सदृशा मदीया गौः" इति निश्चयात्मकं ज्ञानं भवति। एतयोः द्वयोः ज्ञानयोः अन्वयव्यतिरेकबलात् स्वस्मिन् यत् सादृश्यज्ञानं भवति, तदेव करणमुपमानं वर्तते, तथा गोनिष्ठगवयस्य सादृश्यज्ञानम् उपमितिः वर्तते[8]।

**मीमांसकानां मते उपमानप्रमाणस्य स्थितिः**- शाबरभाष्ये उपमानविषये उक्तम्- "उपमानमपि असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति। यथा- गवयदर्शनं गोस्मरणस्य[9]। श्लोकवार्तिककारेण नैयायिकानां यः उपमानप्रमाणविषयः वर्तते, सः खण्डितः यथा- नैयायिकोक्तादपि **"आप्तोपदेशः शब्दः"**[10] इति लक्षणादागमत्वमेवास्येत्याह- "पुरुषप्रत्ययेनैव तत्रार्थः सम्प्रतीयते। तदीयवचनत्वेन तस्मादागम एव सः"।[11] मीमांसकैः पृथग्रूपेणैव उपमानस्य स्थितिः स्वीकृता। तैः उक्तं यत्- "यथा गौस्तथा गवय" अस्य वाक्यस्य श्रवणानन्तरं मनुष्यः अरण्ये गत्वा गोसदृशजीवं पश्यति, तदाद पूर्वं सः ज्ञानं करोति यत्- "अनेन सदृशो मदीया गौः" इति। अत्र अप्रत्यक्षगवि यत् सादृश्यज्ञानं भवति, तत्सादृश्यज्ञानमुपमानप्रमाणेन भवति। अतः सादृश्यज्ञानं कारणं न तत्र संज्ञासंज्ञिनोः कश्चन सम्बन्धो भवति।

उपमानप्रमाणविषये सांख्याचार्याणां मतम्- सांख्यतत्त्वकौमुदौ वाचस्पतिमिश्रेण उपमानप्रमाणस्य पृथक्- पृथग्लक्षणानुसारेण उपमानप्रमाणस्य क्रमशः प्रत्यक्षानुमान-शब्दप्रमाणेऽन्तर्भावः कृतः। उपमानं तावत्, यथा गौस्तथा गवय इति वाक्यम्; तज्जनिता धीरागम एव। अर्थात् यदि न्यायदर्शने न्यायसूत्रे उक्तोपमानलक्षणस्य- **"प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्"**[12], विश्लेषणं क्रियते तदा तस्मादुपन्न-ज्ञानमर्थात् वाक्यार्थज्ञानमेव तस्य फलं वर्तते, तथा वाक्येन वाक्यार्थज्ञानं शब्दप्रमाणस्य विषयो वर्तते, अतः अस्यामवस्थायामुपमानप्रमाणस्य शब्दप्रमाणेऽन्तर्भावः भविष्यतीति। पुनः यदि वात्स्यायनभाष्ये उक्तलक्षणस्य- **"संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरुपमानार्थः"**[13] इत्यस्य विश्लेषणं क्रियते तदा संज्ञासंज्ञिनोः सम्बन्धप्रतीतिरेवोपमानस्य फलं वर्तते। अस्मिन्पक्षे वाचस्पतिमिश्रेण अस्यानुमाने एवान्तर्भावः कृतः। वृद्धाः यस्य शब्दस्य

---

8. अथोपमानं निरुप्यते। तत्र सादृश्यप्रमाकरणमुपमानम्। तथा हि, नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः, अयं पिण्डी गो सदृश इति। तदनन्तरं भवति निश्चयः अनेन सदृशी मदीया गौरिति। तदन्वयव्यतिरेकाभ्यांग वयनिष्ठगोसादृश्यज्ञानं करणम्। गोनिष्ठसादृश्यज्ञानं फलम्।। वेदान्तपरिभाषा, पृ. 178।
9. शाबरभाष्यम्, पृ. 112
10. न्यायसूत्रम् 1/1/7
11. श्लोकवार्तिकम्, उपमानपरिच्छेदः, पृ. 3
12. न्यायसूत्रम् 1/1/6
13. वात्स्यायनभाष्यम्, पृ. 255

यस्मिन् अर्थे प्रयोगं कुर्वन्ति, तदा लक्षणादिशक्तिरहितः सः शब्दः तस्यैव वाचकः भवति। यथा वृद्धजनाः गवयशब्दस्य गोसादृश्यार्थे प्रयोगं कुर्वन्ति, अतः सः गोसदृशस्य वाचकः भवति। एवम् अनुमानेन संज्ञासंज्ञिनोः सम्बन्धप्रतीतिः भविष्यति।

मीमांसकैः उपमानप्रमाणस्य पृथग्रूपेणोपादानं कृतम्। तेषां मते "यथा गौस्तथा गवय" इत्यस्य वाक्यस्य श्रवणानन्तरं मनुष्यः अरण्ये गत्वा गोसदृशजीवं पश्यति, तदा पूर्वं सः ज्ञानं करोति यत्- "अनेन सदृशी मदीया गौः" इति। अत्र अप्रत्यक्षगवि यत् सादृश्यज्ञानं भवति, तत्सादृश्यज्ञानमुपमानप्रमाणेन भवति इति मीमांसकानां मतम्। परं वाचस्पतिमिश्रेण अस्य सादृश्यज्ञानस्य प्रत्यक्षत्वं साधितम्। यद्यपि गौः न प्रत्यक्षा, तथापि गवयः प्रत्यक्षो वर्तते। परं गोः गवयस्यच सादृश्यन्तु समानम् एव वर्तते। तत्सादृश्यं गवयप्रत्यक्षे सति गवये प्रत्यक्षं वर्तते, अत एव अभिन्नगोनिष्ठसादृश्यमपि सादृश्यं वर्तते। एवं पृथग्रूपेणोपमानप्रमाणस्यावश्यकता न वर्तते। इति सांख्याचार्याणां मतम्।

**उपमानप्रमाणस्य अनुमानान्तर्भावप्रतिषेधः**- सांख्याचार्यैः अन्यैश्च यत्- उपमानज्ञानस्य अनुमानेऽन्तर्भावः स्वीकृतः, तैः उक्तं यथा अनुमाने प्रत्यक्षेण अपरोक्षसिद्धिः क्रियते, तथैव उपमानेऽपि प्रत्यक्षेणाप्रत्यक्षसिद्धिः भवति- यथोक्तं न्यायसूत्रे- "प्रत्यक्षेणाप्रत्यक्षसिद्धेः" इति। परं न तस्य अनुमानेऽन्तर्भावः प्रसङ्गः, यतो हि द्वयोः साम्ये सत्यपि उपमानस्य महत्त्वलक्षण्यं वर्तते। अतः निम्नप्रकारेणोपमानविरोधिनां निरसनं कर्तुं शक्यते।

1. उपमानप्रमाणे तु अप्रत्यक्षगवादीनां प्रत्यक्षमावश्यकं, परं नानुमानज्ञाने धूमवह्न्यादीनां प्रत्यक्षज्ञानमावश्यकम्।
2. उपमाने तु आप्तवाक्यस्य प्रामाण्यबलेन अप्रत्यक्षात्मकगवादीनां सिद्धिः भवति। परम् अनुमाने तु अविनाभावसम्बन्धः स्वीक्रियते, यावद् अविनाभावयुक्ता व्याप्तिः न सिद्ध्यति, तावत् अनुमानज्ञानमपि न सिद्ध्यति।
3. उपमानवाक्ये अनुमानवाक्यवत् पक्षधर्मताकथनं न भवति। तथैव उपमानवाक्ये अनुमानवाक्यवत् "यत्र यत्र धूमस्तत्र तत्र अग्निः" इति वाक्यं न भवति, अपितु "यथा गौस्तथा गवयः" अथवा "अनेन सदृशी मदीया गौः" इति वाक्यं भवति।

**न्यायभूषणमते उपमानस्यागमान्तर्भावः**- भासर्वज्ञानुसारेण षट्प्रकारकाणां प्रमाणानां प्रामाण्यता तु वर्तते, परं प्रमाणान्तरता न वर्तते। उपमानस्य त्रिप्रमाणेषु एवान्तर्भावः भवति। यथा- "यथा गौस्तथा गवयः" इत्यादि-उपमानवाक्यस्य शब्दरूपतावशाद् शब्दप्रमाणे एव तस्यान्तर्भावः सम्भवति। अस्य सिद्धिः कृता यत्- उपमानम् आगमान्तर्गतमेव यतो हि वाक्यरूपत्वात्, शब्दं कुरु इत्यादिवाक्यवत्।

उपमानस्य पृथक् प्रमाणता भवति चेत् तदा विध्यर्थवादादिमाध्यमेन प्रमाणानामानन्त्यं भविष्यति[14]।

**पृथगनिर्देशादपि तस्य प्रमाणान्तरासिद्धिः**- भूषणकारमते लोकप्रमाणेनापि उपमानस्य पृथक् निर्देशो न प्राप्यते। यथा- जनाः कथयन्ति- प्रत्यक्षेण घटं पश्यामि, अतः अनेन प्रत्यक्षप्रमाणस्य सिद्धिः भवति। पुनः धूमादग्निं जानामि इति अनुमानप्रमाणस्य सिद्धिः भवति, पुनः स्वर्गमवगच्छामीत्यागमप्रमाणस्य सिद्धिः व्यवहारतः भवति, पुनः अनेन प्रकारेण प्रमाणत्रयाणां तु सिद्धिः भवति, परं उपमानस्य लोके कदापि प्रयोगः एवप्राप्यते[15]।

**चित्रलेखादिवन्नोपमानं प्रमाणान्तरम्**- यथा कोऽपि चित्रग्रीवादिमाध्यमेन कञ्चिदाकृतिविशेषं प्रदर्श्य कश्चित् व्युत्पादयति- एतादृशः उष्ट्रः, एतादृशः गजः इति। यद्वा ग्रीवादिपरिणामविशेषाभिधानेनोष्ट्रम्, दन्तादिपरिमाणविशेषाभिधानेन गजं च व्युत्पादयति। अतः व्युत्पाद्यमानस्तु तदा वाक्यादेव उष्ट्रत्वं, गजत्वञ्च प्रतिपद्यते। अतः न प्रमाणान्तरं सिद्ध्यति। वाक्यादेव तस्यसिद्धिः भवति[16]।

**गवयदर्शनात्पूर्वं न संज्ञापतिपत्तिः इत्यनुपपन्नम्**- यथा कोऽपि कथयति गवयदर्शनात्पूर्वं कथं संज्ञासंज्ञिनोः सम्बन्धज्ञानं भवति, तदोक्तं भवत्येव। यथा- शक्रशब्दश्रवणानन्तरमेव अप्रत्यक्षभूतस्य ज्ञानं भवति, तथा पुत्रजन्मनः पूर्वमेव यथा तस्य स्वरूपविषये संज्ञाविषये यथा जनानां लोकव्यवहारो यथा दृश्यते। तथैव गवयज्ञानेऽपि सादृश्यज्ञानं कारणं वर्तते। तदा एतदपि न वर्तते यत् गवयत्वज्ञानात्पूर्वं गवयज्ञानमपि न भवतीति, यतो हि आप्तवाक्यात् न केवलं गवयज्ञानं भवति अपितु तद्धर्मज्ञानमपि भवति[17]।

यथा गौस्तथा गवय इति वाक्यानुरोधादपि नोपमानं प्रमाणान्तरम्- ननु यत्र गोसादृश्यमस्ति स गवयः, तस्य गवयसंज्ञा वेत्येवं संकेते कृते मा भूदुपमानं प्रमाणान्तरम्। अतः यथा गौस्तथा गवय इति वाक्यानन्तरं सादृश्यमात्रेण ज्ञानं भवति, तदा न संज्ञासञ्ज्ञिज्ञानं भवति, इति उपमानमिष्यते। अतः तदा यदि उपमितिज्ञानं यदि वाक्यान्न सम्बद्धं वर्तते। तदा तु अनर्थकमेव वाक्यम्। उपमानप्रमाणे तु गोस्मृतिसहितेन सादृश्यश्रवणेनैव अश्रुतवाक्योऽपि तदा चक्षुषा जानाति, न तु तस्मिन्नवसरे कश्चित्सम्बन्धो प्रतीयते। अतः वाक्याश्रवणानन्तरमेव अप्रत्यक्षभूतस्य गवयस्य साक्षात्ज्ञानं भवति।

---

14. न्यायभूषणम् पृ. 411
15. न्यायभूषणम्, पृ. 415
16. न्यायभूषणम् पृ. 428
17. न्यायभूषणम्, पृ. 420

अस्य गवयशब्दः संज्ञेति विशेषप्रतिपत्त्यर्थं नोपमानं प्रमाणान्तरम्- यदि एतत्वर्तते यत् गवयशब्दस्य विशेषपतिपत्तिः पूर्ववाक्यात् न भवति तदान्यप्रमाणस्या-वश्यकता वर्तते, एतदपि न वर्तते। पिण्डान्तरस्य ज्ञानार्थं पूर्व वाक्यस्यावश्यकता यदि न वर्तते, तथा संज्ञा संज्ञिसम्बन्धप्रतिपत्तिज्ञानार्थं प्रमाणान्तरं वाच्यं वर्तते। तदा तु एका समस्या भवति, यत्- यदि पूर्ववाक्यात् "अस्य गोशब्दः इति संज्ञा" एतत्ज्ञानं न भविष्यति। तदा प्रत्येकं गोपिण्डादीनां ज्ञानाय पृथक्- पृथक् प्रमाणानामावश्यकता भविष्यति। एवं प्रकारेणानन्त्यदोषप्रसंगः भविष्यति[18]।

**सूत्रविरोधपरिहारः**- यद्यपि उपमानस्य पृथगावश्यकता न वर्तते, तथा कथं सूत्रकारेण उपमानस्य उपादानं कृतम्। यथा- **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"।**[19] **इति।** भूषणकारमते अत्र कोऽपि दोषः न वर्तते, यतो हि यथा दृष्टान्तः प्रमाणान्तर्भूतोऽपि पृथक् कथितः? कस्मात्? तदाभासेभ्यो विविच्य निदर्शयितुम्। यथा च हेत्वाभासा निग्रहस्थानान्तर्गता अपि पृथगभिहिताः स्वरूपविशेषव्युत्पादनाय, तथोपमानं प्रमाणत्रयान्तर्भूतमपि पृथगभिहितमिति भावः।

**पुनः उपमानस्य पृथगभिधाने सूत्रकारस्य प्रयोजनम्**- भूषणकारमते उपमानस्य पृथगुपादानस्य प्रयोजनम्- "शब्दप्रमाणस्य समर्थनमेव। यथोक्तम्- "शब्दप्रामाण्यसमर्थनं प्रयोजनम्"।[20] पुनः अत्राशङ्का भवति यत्- "मन्त्रायुर्वेदप्रामाण्याच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्,[21] तथा "न कर्मकर्तृसाधनवैगुण्यात्[22]। इत्यादिसूत्रेषु शब्दप्रामाण्यसमर्थनं तु वर्तते, परम् उपमानोल्लखः न वर्तते। तदा उक्तं यत् इत्यादिषुउ तु अनृत्वादिपरिहाराय शब्दप्रामाणस्य उल्लेखः वर्तते, परं उपमानस्य पृथगुपादानस्य प्रयोजनं अन्यप्रकाराणां निराकरणाय वर्तते।

एवं प्रकारेण सिद्ध्यति यत् उपमानस्य प्रमाणस्य यद्यपि पृथग्रूपेणोपादानम् आवश्यकम्, एकध अनेकैः विद्वद्भिः अस्य पृथग्रूपेण आवश्यकता नाङ्गीकृता, तथापि तेषां मते अस्य प्रामाणत्वं तु वर्तते एव।

## सन्दर्भग्रन्थसूची (अ.प.अ) शैलीमनुसृत्य)

1. मिश्रः, केशव. तर्कभाषा (व्या०-आचार्यविश्वेश्वरः) (2001). वाराणसीः चौखम्भासंस्कृतभवनम्।

---

18. न्यायभूषणम्, पृ. 427
19. न्यायसूत्रम् 1/1/3
20. न्यायभूषणम्, पृ. 423
21. न्यायसूत्रम् 2/1/68
22. न्यायसूत्रम् 2/1/58

2. भासर्वज्ञः न्यायभूषणम् (व्या०- स्वामी योगीन्द्रानन्दः) (1968.) वाराणसीः षट्दर्शनप्रकाशनप्रतिष्ठानम्।

3. सत्यमूर्तिः. भासर्वज्ञ की तार्किक भूमिका (2010) दिल्लीः चौखम्बासुरभारती-प्रकाशनम्।

4. धर्मराजाध्वरीन्द्रः वेदान्तपरिभाषा (1986) कलकत्ता : अद्वैत आश्रम।

5. भट्टः, कुमारिलः श्लोकवार्तिकम् (व्या०- गंगनाथ झॉ) (2005)वाराणसी : चौखम्भासंस्कृतप्रतिष्ठानम्।

6. भट्टः, अन्नमः। तर्कसंग्रहः (व्या०-दयानन्दभार्गवः) (1992) दिल्ली : मोतीलाल बनारसीदास।

7. बिजल्वानः, डॉ. चक्रधरः भारतीय-न्यायशास्त्र (1988) लखनऊ : उत्तरप्रदेश हिन्दी संस्थानम्।

8. सिन्हा, हरेन्द्रप्रसादः। भारतीय दर्शन की रूपरेखा (1956) दिल्ली : मोतीलाल बनारसीदास।

9. शर्मा, राममूर्तिः भारतीय दर्शन की चिन्तनधारा. (2008) दिल्ली : चौखम्बा ओरियन्टालिया।

✦✦✦

# एकविंशतितमशताब्दस्य-अधिगमकौशलानि

-डॉ. जी. सूर्यप्रसादः*

- अमित रुइदासः**

**शोधसारः** "योगः कर्मसु कौशलम्"(2.50) इति गीता वचनानुसारं कर्मसु 'कौशलं' योगः इति। एकं राष्ट्रस्य विकासाय अत्यन्त्यम् आवश्यकं साधनं भवति कौशलम्। परिवर्तनशीले समयेऽस्मिन् वैश्विकरणस्य, उदारीकरणस्य, निजीकरणस्य च युगे सर्वबृहत् आवश्यकता भवति "कौशलभारतं-कुशलभारतम्" इत्यस्य सिद्धिः। भारतस्य विकासाय कौशलानां नवदिशा प्रदानम् अस्माकं संकल्पः मेक इन इण्डिया, डिजिटल इण्डिया, आत्मनिर्भरभारतं, गरीब-कल्यान-रोजकार-अभियानं, स्मार्ट सिटीज, नमामि गङ्गे इत्यादयः अनेकाः राष्ट्रीययोजनाः महत्त्वपूर्णैः उद्देश्यैः सह सम्बद्धिताः सन्ति। अनेनैव प्रधानमन्त्रिणा श्री नरेन्द्र मोदी महोदयेन 2015 तमे वर्षे कौशलम् अस्माकं जीवनस्य अभिन्नम् अङ्गं भवेत् इति धिया "स्किल-इण्डिया" योजनायाः आविष्कारं कृतम्। एकविंशतितमशताब्दीये शतकेऽस्मिन् युवकानां मध्ये यदि एकविंशतितमशताब्दीयकौशलानां प्रति सद्भावनाः जागृताः भवन्ति तथा च ते अल्पवयसि एव कुशलाः भवितुं प्रेरिताः भवन्ति तर्हि ते भविष्यस्य निर्माणं सशक्तिकरणं च कर्तुं शक्नुवन्ति। एतत् सशक्तिकरणम् आत्मनिर्भरभारतस्य निर्माणार्थम् अतीव उपयोगी एव भवति। सम्प्रतिः CBSE तेषां पाठ्यक्रमे स्पर्धाबाहुल्यात्मके एकविंशतितमे शताब्दौ सफलताप्राप्त्यै, सरलसुखजीवनयापनाय च एकविंशतितमशताब्दीयकौशलानां समावेशम् अकरोत्। तत्र एकविंशतितमशताब्दीयकौशलानि त्रिधा वर्गीकृतानि सन्ति, यथा- अधिगमकौशलानि, साक्षरताकौशलानि, जीवनकौशलानि इति। एतेषु शिक्षणाधिगमप्रक्रियायाम् एकविंशतितमशताब्दीय-अधिगमकौशलानि अतीव महत्वपूर्णविषयः वर्तते। एतत् कौशलं पुनः चतुर्धा विभज्यन्ते-यानि अधिगमकौशलानि 4Cs नाम्ना प्रदर्शितानि सन्ति, तान्येव भवन्ति समालोचनात्मकचिन्तन-सर्जनात्मकता-सहयोग-सम्प्रेषणकौशलानि (Critical Thinking, Creativity, Collaboration and Communication Skills) इति। यानि अद्यतनीये विश्वे छात्राणां सफलतानिमित्तं

* सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, मख्यालयः, नवदेहली, इण्डिया।

** पीएच.डी.शोधच्छात्रः, एडुकेशन-विभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्री सदाशिव परिसरः, पुरी, ओडिशा, इण्डिया।

सहायतां कुर्वन्ति। विशेषरूपेण यदा छात्राः उच्चशिक्षानिमित्तं महाविद्यालये, विश्वविद्यालये च गच्छन्ति, तदानीम् एतेषां कौशलानां प्रासङ्गिकता वरीवर्ति।

**प्रमुखशब्दाः**:- एकविंशतितमशताब्दीयकौशलानि, अधिगमकौशलानि, समालोचनात्मकचिन्तनम् सर्जनात्मकता, सहयोगम्, सम्प्रेषणम्।

## आमुखम्

एकविंशतितमशताब्दीयकौशलस्यावधारणा कोऽपि नूतन-विषयः नास्ति। समालोचनात्मकचिन्तनम्, सहयोगिता, समस्यासमाधानम् इत्यादि कौशलानि बहुभ्यः दशकेभ्यः कक्षायाम् अध्याप्यमानानि सन्ति। तथापि अस्माकं परिवर्तितार्थव्यवस्थायाः विकासस्य आवश्यकतानुरूपं बहुषु जिलास्तरीयउच्चविद्यालयेषु, महाविद्यालयेषु च पाठ्यक्रमे एकविंशतितमशताब्दीयकौशलानि सन्निविष्टानि अभवन्। सम्पूर्णस्य अपि पाठ्यक्रमस्य रूपरेखानिर्माणं तथा पाठ्यपुस्तकानां रचना, पाठ्यसहगामिक्रियाणां च व्यवस्थापनं वस्तुतः अद्यतनीयच्छात्रेषु एकविंशतितमशताब्दीयकौशलानां विकासं मनसि कृत्वा एव सर्वकारैः क्रियमाणं वर्तते। एतेषां कौशलानां कारणेन अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयीयच्छात्राणाम् आजीविकायाः प्राप्तिः तथा उत्तमजीवनशैल्याः निर्माणं च भवितुमर्हति।

**शोधपद्धतिः**:- अस्मिन् शोधे वर्णनात्मकपद्धत्याः प्रयोगः अभवत्।

## भूमिका

एकविंशतितमशताब्दीयकौशलानि एकविंशतितमशताब्दस्य समाजेषु कार्यस्थलेषु च सफलतायै अति आवश्यकत्वेन मान्यताप्राप्ताः कौशलानि, क्षमता, पद्धतयः च सन्ति। द्रुतगत्या परिवर्तमाने डिजिटल-समाजे सफलतायै छात्रान् सज्जीकर्तुम् आवश्यककौशलानाम् ज्ञानं भवेत्। एतेषु अनेकानि कौशलानि गहनशिक्षणेन सह सम्बद्धानि सन्ति, यानि विश्लेषणात्मककौशलम्, जटिलसमस्यानिराकरणं, सामूहिककार्यं च इत्यादीनां मृदुकौशलानाम् आधारेण भवन्ति। एतानि कौशलानि पारम्परिकशैक्षणिक-कौशलेभ्यः भिन्नानि सन्ति यतः तानि मुख्यतया ज्ञानाधारितानि न भवन्ति। विंशतिशताब्द्याः उत्तरदशकेषु एकविंशतिशताब्द्यां च समाजे अर्थव्यवस्थायां प्रौद्योगिक्यां च परिवर्तनं तीव्रगत्या अभवत्। तेन च भाविनागरिकेषु नूतनकौशलानां निर्माणं विकासश्च अत्यन्तम् अपेक्षितमभवत्। ततः नूतनानि यानि कौशलानि अपेक्षितान्यासन् तेषां कौशलानां एव समाहारः भवति एकविंशतितमशताब्दीयकौशलानि।

## एकविंशतितमशताब्दीयकौशलस्य परिभाषा

"स्पर्धाबाहुल्यात्मके एकविंशतितमे शताब्दौ सफलताप्राप्त्यै, सरलसुखजीवन-

यापनाय च येषां कौशलानाम् अपरिहार्यता भवति तानि एकविंशतितमशताब्दीय-कौशलानि इति उच्यन्ते।" एतेषां कौशलानां प्राप्तेः या प्रक्रिया अस्ति, सा एका सुनियोजिता सुनिर्दिष्टा च प्रक्रिया भवति। एषा प्रक्रिया एकविंशतितमशताब्दीयकौशलानां प्रतिनिधित्वं कुर्वन्ती सती, स्पष्टरूपेण छात्राणां कृते वैश्विकस्तरे प्रतिस्पर्धाकरणाय सक्षमतां प्रददाति। शिक्षणाधिगमप्रक्रियायाम् एकविंशतितमशताब्दीयकौशलानि अतीव महत्वपूर्णविषयः वर्तते। सन्दर्भेऽस्मिन् CBSE परिषदा एवमुच्यते- "This is an oft spoken and discussed about area now, particularly in the context of making our students ready for what the future holds for them. The following figure taken from https://pin.it/ugarthsartssf represents these skills in a comprehensible manner and clearly states that these skills are crucial for our students to be able to compete globally. These skills have to become the cross-cutting themes in our teaching and learning prosses."[1]




एकविंशतितमशताब्दीयकौशलानि इत्युक्ते ज्ञानं, जीवनमूल्यानि, आजीविका-गतमूल्यानि, आजीविकासम्बद्धः अभ्यासः तथा आजीविकागतलक्ष्यानि भवन्ति, यानि अद्यतनीये विश्वे छात्राणां सफलतानिमित्तं सहायतां कुर्वन्ति। विशेषरूपेण यदा छात्राः उच्चशिक्षानिमित्तं महाविद्यालये, विश्वविद्यालये गच्छन्ति, तदानीम् एतेषां कौशलानां प्रासङ्गिकता वरीवर्ति।

एकविंशतितमशताब्दीयकौशलस्यावधारणा कोऽपि नूतन-विषयः नास्ति। समालोचनात्मकचिन्तनम्, सहयोगिता, समस्यासमाधानम् इत्यादि कौशलानि बहुभ्यः दशकेभ्यः कक्षायाम् अध्याप्यमानानि सन्ति। तथापि अस्माकं परिवर्तितार्थव्यवस्थायाः विकासस्य आवश्यकतानुरूपं बहुषु जिलास्तरीयउच्चविद्यालयेषु, महाविद्यालयेषु च

पाठ्यक्रमे एकविंशतितमशताब्दीयकौशलानि सन्निविष्टानि अभवन्। सम्पूर्णस्य अपि पाठ्यक्रमस्य रूपरेखानिर्माणं तथा पाठ्यपुस्तकानां रचना, पाठ्यसहगामिक्रियाणां च व्यवस्थापनं वस्तुतः अद्यतनीयच्छात्रेषु एकविंशतितमशताब्दीयकौशलानां विकासं मनसि कृत्वा एव सर्वकारैः क्रियमाणं वर्तते। एतेषां कौशलानां कारणेन महाविद्यालयीयच्छात्राणाम् आजीविकायाः प्राप्तिः तथा उत्तमजीवनशैल्याः निर्माणं च भवितुमर्हति।

**एकविंशतितमशताब्दीयकौशलानां प्रकाराः ( Kinds of 21st Century Skills )**

केन्द्रीयमाध्यमिकशिक्षापरिषदा (CBSE) अधोनिर्दिष्टानि महत्वपूर्णानि कौशलानि एकविंशतितमशताब्दीयकौशलत्वेन स्वीकृतानि। तथैव एतानि एकविंशति-तमशताब्दीयकौशलानि त्रिधा वर्गीकृतानि[2], यथा–अधिगमकौशलानि, साक्षरताकौशलानि, जीवनकौशलानि इति।

केन्द्रीयमाध्यमिकशिक्षापरिषदा(CBSE)अधोनिर्दिष्टानिमहत्वपूर्णानि कौशलानि एकविंशतितमशताब्दीयकौशलत्वेन स्वीकृतानि । तथैव एतानि एकविंशतितमशताब्दीयकौशलानित्रिधा वर्गीकृतानि[1], यथा- अधिगमकौशलानि, साक्षरताकौशलानि, जीवनकौशलानि इति।




- 4Cs: Critical Thinking, Creativity & Innovation, Collaboration, Communication
- IMT: Information Literacy, Media Literacy, Technology Literacy
- FLIPS: Flexibility and Adaptability, Leadership and Responsibility, Initiative and Self-Direction, Social and Cross-Cultural Interaction

18 21st Century Skills : A Handbook

एतानि एकविंशतितमशताब्दीयकौशलानि छात्रैः भाविनागरिकैः अवश्यमेव प्राप्तव्यानि भवन्ति। स्पर्धामयेस्मिन् जगति एतेषां कौशलानाम् अपरिहार्यता वरीवर्ति। एतेषु कौशलेषु, यानि **4Cs** नाम्ना अधिगमकौशलानि प्रदर्शितानि, तान्येव भवन्ति

समालोचनात्मकचिन्तन-सर्जनात्मकता-सहयोग-सम्प्रेषणकौशलानि (Critical Thinking, Creativity, Collaboration and Communication Skills) इति।[3] सम्प्रति एतेषां चतुर्णाम् अधिगमकौशलानां परिचयः विस्तृतरूपेण विधास्यते-

## 1. समालोचनात्मकचिन्तनम् ( Critical Thinking )

John Butterworth & Geoff Thwaites महोदययोः अनुसारं समालोचनात्मक-चिन्तने विचाराणाम् एवं तर्काणां च विषये मूल्याङ्कनात्मकनिर्णयग्रहणं भवति। समालोचनात्मकचिन्तनस्य प्रमुखविषयः भवति विश्लेषणं, मूल्याङ्कनं, तर्कश्च। समालोचनात्मकचिन्तनशीलाः छात्राः निष्पक्षाः तथा उन्मुक्तविचारशीलाः भवन्ति। सक्रियः तथा सूचितः (ज्ञाता) च भवति। छात्राः संशयनिवारकप्रकृतिमान् तथा स्वतन्त्रः च भवति। सन्देहानां निराकरणाय प्रश्नकरणेच्छाप्रकाशनं कुर्वन्ति। एतस्यापरं नाम समीक्षात्मकचिन्तनम्। समीक्षात्मकचिन्तनम् इति सूचनायाः अनुभवस्य च वस्तुनिष्ठा विश्लेषणात्मिका च काचन क्षमता। तार्किकविश्लेषणस्य तर्कसंगतचिन्तनस्य च माध्यमेन सूचनायाः सावधानपूर्वकं परीक्षणं, विश्लेषणं, प्रश्नं च कृत्वा अनुभवानां, घटनानां, तर्कानाम् अथवा प्रस्तावानां मूल्याङ्कनं कर्तुं च क्षमता भवति समीक्षात्मकचिन्तनकौशलम्।

साम्प्रतिके युगे समालोचनात्मकचिन्तनं सर्वाधिकं प्रचलितेषु कौशलेषु अन्यतमम् अस्ति। समालोचनात्मकचिन्तनकौशलं उपलब्धानां सर्वेषां तथ्यानां सूचनानां च आधारेण वस्तुस्थितिम् अवगन्तुं मूल्याङ्कनं च कर्तुं साहाय्यं करोति। समालोचनात्मक-चिन्तनकौशलस्य साहाय्येन समस्यां परिभाषितुं समाधातुं च सूचनां, दत्तांशं, तथ्यं च क्रमबद्धं तथा व्यवस्थितं कर्तुं शक्नोति।

समालोचनात्मकचिन्तनकौशलं कथं सहजतया अवगन्तुं शक्यते?

समालोचनात्मकचिन्तनकौशले सप्त सोपानानि भवन्ति। उदाहरणस्य साहाय्येन समालोचनात्मकचिन्तनकौशलं सहजतया अवगच्छामः-

1. **समस्यां चिनुत**- कल्पयतु यत् भवान् कार्ये अस्ति। कश्चन, सम्भवतः भवतः प्रबन्धकः (Manager), भवतः कृते एकाम् अशुद्धदत्तांशस्य समस्यां प्रस्तौति। समस्या किम् अस्ति? इति ज्ञात्वा ततः प्रथमं समस्यायाः परिचयं करिष्यन्ति।

2. **तस्य पृष्ठतः कारणं अवगच्छत**- ततः समस्यां चिन्तयित्वा समस्यायाः पृष्ठतः कारणं अवगन्तुं प्रयतन्ते। अस्य पृष्ठतः किंकारणम् अस्ति? भवन्तः पश्यन्ति यत् तत्पृष्ठतः तन्त्रांशस्य समस्या अस्ति इति।

3. **शोधं कृत्वा दत्तांशसङ्ग्रहणं कुरुत**- समस्या तन्त्रांशमध्ये अस्ति इति यदा ज्ञातम्, तदा तस्मिन् विषये अधिकः शोधः क्रियते। तस्मिन् विषये शोधं कृत्वा दत्तांशानां संग्रहणेन ज्ञातं यत् सॉफ्टवेयरं पूर्ववर्षस्य वर्तमानवर्षस्य च दत्तांशं एकत्र मिश्रयति।
4. **दत्तांशं व्यवस्थितं कुरुत**- तदनन्तरं तन्त्रांशं संशोध्य तस्य वर्षानुसारं दत्तांशं सम्यक् व्यवस्थितं कर्तुं प्रयत्नः क्रियते।
5. **समाधानं कार्यान्वितं कुरुत**- तदनन्तरं समस्यायाः समाधानार्थं सॉफ्टवेयर-अभियन्तॄन् आहूय विभागे सर्वेभ्यः सूचयितव्यं यत् प्रसारितदत्तांशस्य आधारेण प्रतिवेदनं कुर्वन्तु इति।
6. **समाधानस्य विश्लेषणं कुरुत**- तदनन्तरं द्रष्टव्यं यत् विभागे इतोपि कश्चनः अस्ति यः अद्यापि समस्यायाः सम्मुखीभवति अथवा अद्यापि पूर्वदत्तांशस्य आधारेण प्रतिवेदनं ददाति इति।
7. **समाधानं परिष्कर्तुम् उपायान् चिनुत**- प्राप्ते समाधाने इतोऽपि परिष्कारः अपेक्षितश्चेत् तदर्थं नूतनाः उपायाः चिन्तनीयाः, अनुप्रयोज्याश्च।

## 2. सर्जनात्मकताकौशलम् ( Creativity Skill )

सर्जनात्मकता बालकेषु नवीनदृष्टिकोणं निर्माति। एवञ्च वास्तविकजीवनस्य समस्याः सम्मुखीकर्तुं स्वीयज्ञानस्य अनुप्रयोगाय बालकेभ्यः अवसरं कल्पयति। बालकेषु ललितकलानां (Fine Arts) प्रदर्शनकलानां (Performance Arts) तथा व्यवसायिककलानां माध्यमेन शिक्षाप्रदानं कृत्वा एतत्कौशलविकाससम्पादनाय प्रयत्नः विधीयते। एतस्य अपरं नाम रचनात्मकचिन्तनकौशलम्। एषा काचित् संज्ञानात्मकप्रक्रिया अस्ति, या अद्वितीयान् नवीनविचारान् जनयति। सर्जनात्मकता रचनात्मकचिन्तनकौशलं वा भिन्नरूपेण चिन्तयितुं, वस्तूनां अस्तित्वात् परं द्रष्टुं च क्षमता अस्ति। नवीनरीत्या कार्याणि द्रष्टुं कर्तुं च मौलिकविचारं जनयितुं च क्षमता भवति सर्जनात्मकता। सर्जनात्मकव्यक्तेः एतादृशी योग्यता वर्तते येन सः वस्तुनि नवीनविचारान् उत्पादयितुं शक्नोति, यत् सः पूर्वमेव न जानाति। यः व्यक्तिः एतादृशं नवीनकार्यं करोति सः सर्जनात्मकः अथवा सर्जनात्मकव्यक्तिः इति उच्यते। तथा च येन कौशलेन नूतनं कार्यं, नूतनसृष्टिं, नूतनम् आविष्कारं वा निर्माति तत्कौशलं सर्जनात्मकता इति कथ्यते।

### सर्जनात्मकतायाः प्रकृतिः

सर्जनात्मकताविषये बहूनि अध्ययनानि जातानि। अध्ययनेन प्राप्तनिष्कर्षाणाम् अनुसारं अस्याः प्रकृतिः एवं रूपेण विश्लेषयितुं शक्यते-

1. सर्जनात्मकता एकम् उत्पादनं नास्ति, एतत् एकः कारकः अथवा एका क्षमता अस्ति।
2. सर्जनात्मकता अपसारी (Divergent) चिन्तनस्य परिणामः।
3. सर्जनात्मकता चिन्तनस्य एकः मार्गः अस्ति, न तु बुद्धेः विकल्पः।
4. सर्जनात्मकता लक्ष्यनिर्देशिता भवति, यत् तु मानवानां तथा मानवसमूहानां कृते समाजस्य कृते चापि उपयोगी भवति।
5. सर्जनात्मकता एकप्रकारकसंयमितकल्पना भवति या कांचित् सिद्धिं प्राप्नोति।
6. सर्जनात्मकता मौखिकं, लिखितं, अमर्तं, सर्वथा अद्वितीयं च भवति।

### सर्जनात्मकतायाः विशेषता

सर्जनात्मकता मानवानाम् उभयमुखी अवस्थातः उद्धारं करोति। सर्जनात्मक-बालकः नूतनमार्गान्वेषणेन सह अवधारणात्मकम् एवं संवेदनशीलं भवति, नूतनं भविष्यवाणीं करोति, नूतनं निष्कर्षम् अन्वेषयति। एतेषां बालकानां मुख्याः विशेषताः भवन्ति जिज्ञासु, सरलम्, मूलचिन्तनम्, स्वतन्त्रः निर्णयग्रहणम्, एकाग्रचिन्तनम्, जटिलचिन्तनम्, उच्चः ऊर्जा स्तरम्, असम्भवात् सम्भवम्, साहसी, दृढ कल्पनाशक्तिः, श्रेष्ठतायाः इच्छा, दूरदृष्टिः इत्यादयः।

### 3. सहयोगकौशलम् ( Collaborative Skill )

अन्यैः सह स्वस्थं, सफलं, सकारात्मकं च सामाजिकसम्बन्धं निर्वाहयितुम् उपयुक्ता क्षमता भवति सहयोगकौशलम्। सहयोगकौशलं शिक्षकाणां परस्परसम्मानेन समुचितपरिवेशे एकत्र मिलित्वा कार्यकरणक्षमतां निर्दिशति। येन छात्राणां विद्यालयस्य च स्वस्थविचारविनिमयः भवितुमर्हति। तथा च शिक्षकाणां छात्राणां विद्यालयस्य च यत्समूहलक्ष्यमस्ति तल्लक्ष्यस्य प्राप्तिर्भवति। अन्यैः सह स्वस्थं, सफलं, सकारात्मकं च सामाजिकसम्बन्धं निर्वाहयितुं एषा क्षमता प्रेरयति, यत् मानसिकसामाजिककल्याणस्य कृते बहुमहत्त्वपूर्णं अस्ति। अन्यैः सह सुसम्बन्धं स्थाप्यते चेत् सामाजिकसमर्थनम् अपि प्राप्यते।

### सहयोगकौशलस्य लाभाः

परिवर्तनशीलवातावरणे सफलतां प्राप्तुम् इच्छन्तीनां संस्थानां कृते प्रभाविसहयोगं बहुलाभदायकं भवति। आरम्भे यदा प्रतियोगितायाः विषयः आगच्छति, तदा एका उत्तमा सहयोगिनी कार्यसंस्कृतिः संस्थां शीर्षस्थाने स्थापयति। एका संस्था, यत्र कर्मचारिणः प्रभावीरूपेण सहयोगं कुर्वन्ति तत् पूर्वमेव प्रतियोगितातः बहु अग्रे

भवति। अतः प्रभाविसहयोगं संस्थायाः कृते अविराम-नवीनतां, सामूहिकप्रज्ञा, वर्धितं सामूहिककार्यम्, न्यूनतमं निरीक्षणम्, अधिकतमं प्रदर्शनम्, प्रभाविविश्लेषणम्, कुशलप्रक्रियां, सम्पूर्णं सुखम् इत्यादीन् आनयति।

सहयोगकौशलस्य बहवः लाभाः सन्ति, यथा-

1. **समस्यानां समाधानं करोति**- जटिलकार्यस्थले समस्यानां समाधानं अति सरलं कार्यं न भवति। अन्येषां सहयोगेन तेषां मतं श्रुत्वा समस्यानां समाधानं भवितुं शक्यते।
2. **आत्मविश्लेषणं प्रोत्साहयति**- यदा जनाः सहकारिरूपेण कार्यं कुर्वन्ति तदा ते स्वस्य सशक्ततां दुर्बलतां च चिन्तयन्ति। एतेन तेषां तान् क्षेत्रान् चिन्तयितुं साहाय्यं कुर्वन्ति येषु विशेषज्ञानां साहाय्यस्य आवश्यकता भवति।
3. **दक्षतां वर्धयति**- यदा जनाः एकत्र कार्यं कुर्वन्ति तदा परियोजनानां पूरणे समयसीमायाः पालनं सुकरं भवति। एकं पूर्णपरियोजनायां कार्यं कर्तुं सहयोगकार्यं सर्वेषां सामर्थ्यानानि वर्धयति।

### 4. सम्प्रेषणम् ( Communication )

मानवाः सामाजिकजीवरूपेण समाजे निवसन्ति। समाजे स्थित्वा ते विचाराणाम् आदान-प्रदानं कुर्वन्ति। प्रत्येकम् अपि मानवानां पृथक्पृथक् विचाराः (Ideas), सम्प्रत्ययाः (Concepts), भावनाः (Feelings), तथा सिद्धान्ताः सन्ति, एषां ते अपरैः सह आदान-प्रदानं (Exchange) कुर्वन्ति। परस्परविचाराणां विनिमयस्य इयं प्रक्रिया सञ्चारः अथवा संप्रेषणम् इत्युच्यते। प्रभाविसम्प्रेषणम् एवं सहयोगकौशलं शिक्षणाधिगमप्रक्रियायां रुच्युत्पादने तथा आनन्दप्रदाने सहायतां करोति।

प्रभावि सम्प्रेषणकौशलं अभिप्रेतविचारान्, सूचनाः, विचारान्, दृष्टिकोणान्, मतानि, भावनाः, अपेक्षाः, योजनाः इत्यादयः प्रसारयितुं क्षमता भवति। एतेन व्यक्तिः सहजतया, स्पष्टतया, प्रभावीरूपेण च मौखिकरूपेण अशाब्दिकरूपेण च, समुचितरूपेण अभिव्यक्तिं कर्तुं समर्थः भवति। विचारान् अवधारणां च प्रभावीरूपेण व्यक्तीकर्तुं क्षमता भवति सम्प्रेषणकौशलं, यच्च प्रौद्योगिक्याः उपयोगेन मौखिकरूपेण, अशाब्दिकरूपेण, लिखितरूपेण, प्रतीकात्मकरूपेण वा द्वयोः वा अधिकयोः व्यक्तयोः मध्ये सार्थक-अन्तःक्रियां वार्तालापं च कर्तुम् अवसरं कल्पयति। एकस्य प्रश्नस्य विश्लेषणेन इतोऽपि स्पष्टता समायाति? यत्-सम्प्रेषणं नाम किम्? इति प्रश्ने ICT इत्यत्र C पदेन अभिप्रायः भवति Communication इति। तर्हि केन माध्यमेन सम्प्रेषणम्? कस्य सम्प्रेषणम्? इत्यादयः प्रश्नाः उपतिष्ठन्ति। अत्रेदं समाधानं यत्

तन्त्रादि-अङ्कीयमाध्यमेन सूचनायाः सम्प्रेषणम्। सम्प्रेषणप्रक्रियायां प्रेरकस्य ग्राहकस्य च मध्ये नैकानि उपकरणानि प्रयुज्यन्ते। सम्प्रेषणस्य प्रमुखकार्यचतुष्टयं भवति, यथा-

1. सूचनाप्रदानम्।
2. निर्देशः, आदेशः अथवा सन्देशप्रेषणम्।
3. परस्परं विश्वासजागरणम्।
4. समन्वयस्थापनं च।

**सम्प्रेषणस्य प्रक्रिया ( Process of Communication )**

सम्प्रेषणम् एका सामाजिकी प्रक्रिया भवति, यया मानवीयसम्बन्धः स्थापितो भवति, दृढीभवति तथा विकसितश्च भवति, केनचित् माध्यमद्वारा (Radio-TV-Speech) मानवः सन्देशानां सम्प्रेषणं भवितुमर्हति। आवश्यकतानुसारं व्यक्तिः सन्देशप्राप्तेः सूचनां यच्छति। सम्प्रेषणस्य प्रक्रिया अधः प्रदर्श्यते-

**Sender> Encoding> Message> Medium> Decoding> Receiver> Feedback> Sender**

**सम्प्रेषणस्य प्रकाराः ( Types of Communication)**

सम्प्रेषणस्य प्रकारान् निम्नलिखितरीत्या विभाजयितुं शक्नुमः-

***सम्प्रेषणे सम्पृक्तव्यक्तीनां संख्याधारेण ( On the basis of Number of Persons involved)-**

1. द्वि-वैयक्तिकसम्प्रेषणम् (One to One Communication)
2. लघुसमूहे सम्प्रेषणम् (Small Group Communication)
3. दीर्घसमूहे सम्प्रेषणम् (Large Group Communication)
4. व्यवस्थितं संस्थागतं वा सम्प्रेषणम् (Organizational and Professional Communication)
5. जनसम्प्रेषणम् (Mass Communication)

***सम्बन्धाधारेण वर्गीकरणम्- ( On the Basis of Relationship)**

**1. आभ्यन्तरम् ( Internal )**

आभ्यन्तरसम्प्रेषणं संघटने तथा तत्र स्थितानां कर्मचारिणां मध्ये भवति। एतत् सम्प्रेषणं संघटनस्य आभ्यन्तरे भवति।

**2. बाह्यम् ( External )**

सम्प्रेषणस्य सम्बन्धः संस्थानां जनताभिः सह भवति।

**3. अन्तर्वैयक्तिकः संवादः ( Interpersonal Communication )**

अस्यार्थः संस्थायाः एकस्य विभागस्य कर्मचारिभिः सह अन्यकर्मचारिणां सम्बन्धः भवति। यथा- केन्द्रीय- राज्यसर्वकारयोर्मध्ये सम्प्रेषणम्।

***सोपानक्रमाधारेण वर्गीकरणम् ( On the basis of Hierarchy**)

1. उच्चतरसम्प्रेषणम् (Upward Communication)
2. निम्नतरसम्प्रेषणम् (Downward Communication)
3. स्वाभाविकं तथा यान्त्रिकसम्प्रेषणम्

***एतान् विहाय सम्प्रेषणस्य इतोपि केचन प्रकाराः सन्ति, यथा-**

1. शाब्दिक-सम्प्रेषणम्
2. अशाब्दिक-सम्प्रेषणम्
3. लिखित-सम्प्रेषणम् च।

**निष्कर्षः**

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् 4C's (समालोचनात्मकचिन्तन-सर्जनात्मकता-सहयोग-सम्प्रेषणकौशलानि) इति यानि कौशलानि तानि एकविंशतितम-शताब्दीय-अधिगमकौशलानि भवन्ति। शताब्दावस्मिन् स्वस्वक्षेत्रेषु सफलतायै एतेषाम् अधिगमकौशलानां अपरिहार्यता विद्यते। तान्येतानि कौशलानि भाविनागरिकेषु अवश्यं यदि भवेयुस्तदा ते सफला भवेयुः। यतोहि वर्तमानशिक्षाव्यवस्थायां अद्यतनछात्राणां कृते एकविंशतितमशताब्दीय-अधिगमकौशलानि प्राप्तिः अतीव महत्त्वपूर्णास्ति। अधुना प्रत्येकं मानवस्य विभिन्नेषु प्रविधिविषयेषु सक्षमता आवश्यकी अस्ति। अन्यथा अस्मिन् जगति सामञ्जस्य स्थापनम् अतीव कठिनं भविष्यति। एतदर्थं, प्रविधिज्ञानेन सह कौशलज्ञानम् अनिवार्यम् अभवत्। यतोहि अनेन सर्वप्रकारकानि असम्भवानि कार्याणि सुलभतया सम्भवन्ति। एकविंशतिशतकं तीव्रगत्या परिवर्तमानं वर्तते। अस्मिन् नित्यं परिवर्तमाने जगति प्रत्येकदिने नूतनः आविष्कारः परिदृश्यते। अतः एतानि सर्वाणि ज्ञातुं कौशलस्य ज्ञानम् अतीव आवश्यकम् भवति। यदि कस्यचित् जनस्य पार्श्वे एतेषां प्रमुखकौशलानाम् ज्ञानं नास्ति तर्हि सः स्पर्धाजगति अवश्यमेव पृष्टवर्ती भविष्यति। अस्मिन् वैज्ञानिकजगति जनानां चिन्तनम् अपि वैज्ञानिकत्वपूर्णं भवेत्। यथा अस्माकं देशस्य भारतसर्वकारः वैश्विकविकासलक्ष्याणां पूर्तये विविधाः

योजनाः आयोजनं करोति, तथैव अस्माकं केन्द्रीयराज्यस्तरीयाः विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाः च 21 शताब्द्याः कौशलवर्धनार्थं विविधान् निर्णयान् अपि गृह्णन्ति। अस्य मुख्यकारणं भविष्याय छात्राणां सज्जीकरणम् अस्ति। येन छात्राणां सर्वतोमुखीविकासेन सह देशस्य अपि सम्पूर्णः विकासः भवति।

**सन्दर्भाः**


- Ravenscroft, Andrew., Lindstaedt, Stefanie., Kloos, Delgado, Carlos., & Hernández-Leo, Davinia. (2012). 21st Century Learning for 21st Century Skills 7th European Conference on Technology Enhanced Learning, EC-TEL 2012 Saarbrücken, Germany, September 18-21, 2012 Proceedings, 551.
- Butterworth, John., and Thwaites, Geoff. (2013). Thinking Skills : Critical Thinking and Problem Solving. Cambridge University Press The Edinburgh Building, Cambridge CB2 8RU, UK, 345.
- Gosper, Maree., & Ifenthaler, Dirk. (2014). Curriculum Models for the 21st Century Using Learning Technologies in Higher Education. 443. DOI 10.1007/978-1-4614-7366-4 Springer New York Heidelberg Dordrecht London.
- CBSE. (2019). Handbook for Teachers. The Secretary, CBSE Shiksha Kendra, 2, Delhi-110092, 92.
- Ministry of Human Resource Development. (2020). NEP. GOI, 103.
- https://leverageedu.com/blog/
- https://skillinfo.in/critical-thinking-skills-in-hindi/
- https://skillfind.in/critical-thinking-skills-kya-hai/
- https://www.linkedin.com/pulse/what-importance-benefits-critical-thinking-skills-islam
- https://www.gkexams.com/ask/46036-Rachnatmakta-Ki-Paribhasha
- https://www.google.com/url?sa=t&source=web&rct=j&url=https://www.adda247.com/jobs/wp-content/uploads/sites/13/2021/01/20160525/Formatted-Creativity.pdf&ved=2ahUKEwjrgPTJlv_-AhXhSmwGHTqlALMQFnoECA4QAQ&usg=AOvVaw2RqMOTzxYemczZ8fR2fu3S

- https://kissflow.com/digital-workplace/collaboration/what-is-collaboration/
- https://hindisahayta.in/communication-skills-kya-hai-communication-skills-kaise-improve-kare /#How_To_Improve_Communication_Skills_in_Hindi
- https://aapkisafalta.com/2018/12/improve-communication-skills-hindi.html
- https://en.wikipedia.org/wiki/21st_century_skills

सन्दर्भः-

1. Handbook for teachers, CBSE, 2019, 113pp.
2. Handbook for teachers, CBSE, 2019, 18pp.
3. Handbook for teachers, CBSE, 2019, 115pp.

✦✦✦

 ISSN : 0975-1769

# वक्रोक्ति और ध्वनि- आपसी संबंध

**-डॉ. रेणुका बोकारे**

आनन्दवर्धन ने 'ध्वन्यालोक' ग्रन्थ में और कुन्तक ने 'वक्रोक्तिजीवित' ग्रन्थ में क्रमशः ध्वनिसिद्धान्त व वक्रोक्तिसिद्धान्त सभेद विशद किया है। ध्वनि और वक्रोक्ति के आपसी संबन्ध का विचार "प्रस्तुत शोधनिबन्ध" का विषय है।

## ध्वनि लक्षण तथा वक्रोक्ति लक्षण

आनन्दवर्धन ने ध्वनि व्याख्या इस प्रकार की है-

**यत्रार्थो शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**

(ध्व.1/13)

अर्थात् जहाँ वाच्य अर्थ स्वतः और वाचक शब्द स्ववाच्यार्थ को उपसर्जनीभूत करके व्यङ्ग्य अर्थ को (प्राधान्यतया) सूचित करता है उस काव्यविशेष को विद्वद्जन 'ध्वनि' कहते हैं।

मुख्यार्थ तथा लक्ष्यार्थ से भिन्न अर्थ सहृदयों को प्रतीत होता है- वही व्यङ्ग्यार्थ है। ये व्यङ्ग्यार्थ प्रतीतिगम्य होने के कारण उसे 'प्रतीयमान' कहा जाता है। व्यङ्ग्यार्थप्राधान्य काव्य की 'ध्वनि' संज्ञा है, ये प्रतीयमानार्थ अलौकिक प्रतिभाजन्य है।

कुन्तकने वक्रोक्ति का लक्षण इस प्रकार किया है-

**प्रसिद्धाभिधानव्यतिरेकिणि विचित्रा एव अभिधा वक्रोक्तिः।**
**वक्रोक्तिरेव वैदग्ध्यभङ्तीभणितिः।**[1]

प्रसिद्ध कथन से भिन्न, विचित्र अभिधा ही वक्रोक्ति है। विदग्धतापूर्ण अर्थात् कवि के काव्यरचनाकौशल से युक्त उक्ति 'वक्रोक्ति' है।

कुन्तक को 'प्रसिद्धाभिधानव्यतिरेकिणि' इस पद के दो अर्थ अपेक्षित है[2]-

---

* जनसंपर्क अधिकारी, कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक।

1. वक्रोक्तिजीवित, संपा. डॉ. नगेंद्र, दिल्ली विश्ववविद्यालय, दिल्ली, 1995, प्रथमावृत्ती, पृ. 51 (1/10 कारिकेवरील वृत्ती)
2. तत्रैव, पृ. 31 (भूमिका)

1. शास्त्रादि प्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकि- शास्त्रादि निबद्ध शब्दार्थ से भिन्न।
2. अतिक्रान्तप्रसिद्धव्यवहारसरणि- प्रसिद्ध अर्थात् प्रचलित व्यवहार में प्रयुक्त शब्द से भिन्न।

अर्थात् कुन्तक को वक्रोक्ति काव्य प्रचलित शब्दार्थ से भिन्न और कवि के काव्यरचनाकौशल से युक्त अपेक्षित है।

इन दोनों लक्षणों का अध्ययन करने के बाद सारांशतः यह कहा जा सकता है कि-

1. ध्वनि और वक्रोक्ति इन दोनों के लक्षणों में वाच्यार्थ और वाचक शब्द इनका क्रमशः उपसर्जन और अतिक्रमण अपेक्षित है। आनन्दवर्धन के मतानुसार शब्द और अर्थ स्वतः को उपसर्जनीभूत करके व्यङ्ग्य अर्थ को प्राधान्य देते है। और कुन्तक शास्त्रादि में प्रयुक्त प्रसिद्ध शब्दार्थ से भिन्न शब्दार्थ का प्रयोग काव्य में आवश्यक मानते है। अर्थात् ध्वनि और वक्रोक्ति यह दोनों सिद्धांत में वाच्य अर्थात् प्रसिद्ध अर्थ का उपसर्जन/ अतिक्रमण और अप्रसिद्ध अर्थ की विवक्षा अभिप्रेत है।
2. ध्वनि और वक्रोक्ति में विचित्र वस्तु अर्थात् सुंदर अर्थ की विवक्षा है। आनन्दवर्धन ने काव्य में सुन्दर अर्थ का विनिवेश 'अन्यदेव वस्तु .....'[3] इस शब्द द्वारा और कुंतक ने विचित्रा अभिधा, अतिशया अभिधा इनके द्वारा स्पष्ट किया है।
3. आनन्दवर्धन और कुन्तक दोनों साहित्यशास्त्रियों ने प्रतीयमान रूप वैचित्र्यसिद्धि अलौकिक प्रतिभाजन्य बतायी है।

## व्यंजना और वक्रोक्ति-

ध्वनिसिद्धान्त का आधार व्यंजना शक्ति है। काव्य में तीन प्रकार के अर्थ विद्यमान है- वाच्यार्थ, लक्ष्यार्थ और व्यङ्ग्यार्थ। सहृदयों को व्यङ्ग्यार्थ वाच्यार्थ के आधार पर ही प्रतीत होता है। व्यङ्ग्यार्थ की ही 'प्रतीयमानार्थ' संज्ञा है। इसको ही आनन्दवर्धन ध्वनि कहते है। यह ध्वनितत्त्व व्यंजनचारुता पर आधारित रहता है।

कुन्तक को ध्वनितत्त्व की दृष्टि से व्यंजना वृत्ति मान्य नही। कुन्तक केवल अभिधा मानते है। परंतु उनके मत से अभिधा केवल वाच्यार्थ ही प्रतीत

---

3. ध्वन्यालोक, आ. जगन्नाथ पाठक चौखंबा विद्याभवन, वाराणसी, 1997, सहावी आवृत्ती (1/4)

करने वाली नही अपि तु 'विचित्रा अभिधा' है। यह 'विचित्रा अभिधा' ही उनकी 'वक्रोक्ति' है।

**प्रसिद्धाभिधानव्यतिरेकिणि विचित्रैवाभिधा।**
**विचित्रैवाभिधा वक्रोक्ति उच्यते।**

कुन्तक को केवल शब्दों का वाचकत्व और वाच्यत्व अपेक्षित है। द्योतक और व्यंजक शब्द उनकी दृष्टि से वाचक ही है।

**यो वाचकः स शब्दः, यो वाच्यस्याभिधेयः सोऽर्थः इति। ननु च द्योतकव्यंजकैः अपि शब्दौ सम्भवतः। यस्मादर्थप्रतीतिकारित्व सामान्यदुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोर्प्रत्येयत्वसामान्यदुपचाराद्वाच्यवाचकलक्षणम्।**[4]

अर्थात कवि को अभिप्रेत अर्थ व्यक्त करने की क्षमता ही वाचकता है। जो वाचक होता है, वह शब्द होता है। जो वाच्य होता है वह अर्थ होता है। द्योतक और व्यंजक भी शब्द हो सकते है। उनका संग्रह न होने से अव्याप्ति होगी। (यह नही कहना चाहिए क्योंकि) अर्थ प्रतीतिकारित्व की समानता होने के उपचार से वह (द्योतक तथा व्यंजक) दोनों भी वाचक ही कहे जाते है। इसी प्रकार द्योत्य और व्यङ्ग्य दोनों अर्थ में भी बोध्यत्व (प्रत्येयत्व) की समानता होने से वाच्यत्व ही रहता है।

सारांश, कुन्तक ने अभिधा में द्योतना और व्यंजना वृत्ति का विनिवेश करके उनको व्यंजना व्यापार मान्य है ऐसा ही सूचित किया है।

### प्रतीयमानार्थ विचार

मुख्यार्थ और लक्ष्यार्थ से भिन्न अर्थ प्रतिभावान सहृदय को काव्य में प्रतीत होता है- यही व्यङ्ग्यार्थ है। यह प्रतीतिगम्य होने के कारण उसको 'प्रतीयमान' कहते है। उपमादि अलंकार वाच्यार्थ के विलास हैं परंतु महाकवि के काव्य में इस अलंकृत वाच्यार्थ से भिन्न रमणीयार्थ रसिकों को प्रतीत होता है। यही रमणीय प्रतीयमान अर्थ काव्य की आत्मा है।

आनन्दवर्धन ने ध्वन्यालोक के प्रथम उद्योत में प्रतीयमान अर्थ का स्वरुप, भेद सोदाहरण विशद किया है। जिस प्रकार सुंदर स्त्री का 'लावण्य' उसके नाक, कान, तथा चक्षु इन अवयवों से अलग होता है। उस प्रकार महाकवि के काव्य में वाच्यार्थ से भिन्न प्रतीयमान अर्थ सहृदयों को प्रतीत होता है। आनन्दवर्धन ने

4. व.जी., पृ. 37 (1/8 कारिकेवरील वृत्ती)

महर्षि वाल्मीकि के आर्ष रामायण का उदाहरण इस संदर्भ में दिया है। यह प्रतीयमानार्थ स्वसंवित्सिद्ध अर्थात् अनुभवसिद्ध है। प्रतीयमानार्थ युक्त काव्य की रचना और उसका आस्वाद लेने के लिए क्रमशः कवि और सहृदय दोनों ही प्रतिभावान होने चाहिए।

कुन्तक ने सुकुमार मार्ग के 'अभिजात्य' गुणविवेचन के संदर्भ में आनन्दवर्धन के 'प्रतीयमानं पुनरन्यदेव....।'[5] इस कारिका का उल्लेख कर प्रतीयमान अर्थ का वर्णन किया है-

**तद्वदेव च काव्ये कविशक्तिकौशलोलिखितकान्तिकमनीयं बन्धसौन्दर्यं चेतनचमत्कारकारित्व सामान्योपचाराल्लावण्यशब्दव्यतिरेकेकृण शब्दान्तराभिधेयतां नोत्सहते। तथैव च काव्ये स्वभावमसृणच्छायत्वमाभिजात्यशब्देनाभिधीयते।**[6]

अर्थात् माधुर्य, प्रसादादि गुणों के प्रयोग के समान कवि के प्रतिभाकौशल से समुल्लसित कांतियुक्त, कमनीय रचनासौंदर्य सहृदयों में चमत्कार (आनन्द) निर्मिती के साधर्म्य से, उपचार से 'लावण्य' इस शब्द के बिना किसी भी शब्द से वाच्य न होकर केवल वो स्वाभाविक सुकुमार सौंदर्य 'अभिजात्य' शब्द से कथन किया जाता है।

विचित्र मार्ग के वर्णन प्रसंग मे कुन्तक ने प्रतीयमान अर्थ का और भी स्पष्ट विवेचन किया है-

**प्रतीयमानता यत्र वाक्यार्थस्य निबध्यते।**
**वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित्॥** (व.जी. 1/40)

प्रतीयमानता काव्यार्थ से संबद्ध है परंतु वाच्यवाचक वृत्ति के द्वारा ही व्यङ्ग्यार्थाभिव्यक्ति होती है।

जिस मार्ग में काव्यार्थ अर्थात् कवि को अभिप्रेत अर्थ- प्रतीयमानार्थ- व्यङ्ग्यार्थ प्रतीत होता है। अर्थात् वाच्यवाचक वृत्ति से भिन्न व्यंजनाशक्ति से उत्पन्न व्यङ्ग्यार्थ की अभिव्यक्ति होती है। वृत्ति अर्थात् शब्द और अर्थ का 'विशेष' अर्थ प्रतिपादन करने का सामर्थ्य!

आनन्दवर्धन के समान ही कुन्तक ने भी प्रतीयमानार्थ प्रकाशित करने का सामर्थ्य प्रतिभावान महाकवि में है यह स्पष्ट किया है-

---

5. तत्रैव, पृ. 122
6. तत्रैव, पृ. 122 (1/33 कारिकेवरील वृत्ती)

**यत्रान्यथाभवत् सर्वमन्यथैव यथा।**
**भाव्यते प्रतिभोल्लेखमहत्त्वेन महाकवेः॥** (व.जी. 1/39)

प्रतिभोल्लेखमहत्त्वेन महाकवेः प्रतिभासोन्मेषातिशयत्वेन सत्कवेः। यत्किलं वर्ण्यमानस्य वस्तुनः प्रस्तावसमुचितं किमपि सहृदयहृदयहारि रूपान्तरं निर्मिमीते कविः।[7]

महाकवि के प्रतिभाप्रभावसे अर्थात् उत्तम कवि के अनुभव से साधारण पदार्थ अलौकिक सौंदर्य से युक्त होते है। कारण कवि वर्ण्यमान वस्तु को विषयानुरूप सहृदयों को प्रभावित करने वाला अलौकिक 'स्व' से युक्त बनाता है।

कुन्तक ने व्यतिरेक अलंकार के विवेचन प्रसंग में ध्वनिकारिका 'यत्रार्थ. ..' उद्धृत की है। उसने 'ध्वनि' शब्द का उल्लेख मात्र किया है ना कि उसका उपयोजन ! व्यक्ति, प्रतीयमानता, गम्यता, व्यङ्ग्य इत्यादि शब्द का बार-बार प्रयोग उस 'ध्वनितत्त्व' का अध्ययन ही दर्शाता है।

आनन्दवर्धनकृकृत काव्यव्यापारविचार और कुंतककृत कविव्यापारविचार

आनन्दवर्धन ध्वनिकाव्य का विचार काव्यनिर्मिती तथा सहृदय की दृष्टि से किया है। रससंप्रदाय में 'अनुभूति' प्राधान्य है। आनन्दवर्धन ध्वनिवादी हैं परंतु ध्वनि काव्य का रससापेक्षता से विमर्श करने वाले हैं। उनके अनुसार काव्य का प्राणभूत अंश 'भाव' है। भाव के आधार पर ही काव्य सहृदय को आकृष्ट करके उनके चित्त में वासना रूप से स्थित स्थायिभाव को आनन्द में परिणत करते हैं। सारांश, काव्य भाव का व्यापार है।

कुन्तक की काव्यजीवित रूप वक्रोक्ति कविकौशलपर आधारित है। कुंतक ने काव्यविचार कविसापेक्षता के दृष्टि से किया है। वक्रोक्ति केवल वाक्चातुर्य या उक्तिवैचि॥य नही अपि तु कविव्यापार अर्थात् कविकौशल का, काव्यरुपी कला का आधारस्तंभ है। आशय जितना महत्त्वपूर्ण है उतनी ही अभिव्यक्ती की पद्धती भी महत्त्वपूर्ण है। वक्रोक्ति ये अभिव्यक्ती की पद्धती है। काव्यवस्तु रमणीय होनी ही चाहिए। वह तो अवश्यंभावी निष्कर्ष है परन्तु रमणीय काव्यवस्तु का आविष्कार भी उतना ही मनोहर होना चाहिए। स्वभाविकतः यह आविष्कार कविकौशल पर आधारित है तथा कविकौशल प्रतिभाधारित है। वक्रोक्ति में काव्यवस्तु की अपेक्षा सहृदयों को आह्लादक अनुभूति देने वाले धर्म के आविष्कार को महत्त्व है। वक्रोक्ति में 'कल्पना' का स्थान महत्त्वपूर्ण है। कल्पना 'कविगत' है; सहृदयगत नही। वक्रोक्ति- कविव्यापार- मौलिक कल्पना ऐसी

---

7. तत्रैव, 138

कुन्तक की विचारप्रणाली है। ध्वनि की कल्पना 'सहृदयगत' होने से 'व्यक्तिनिष्ठ' है और वक्रोक्ति 'कविकौशल' पर आधारित होने से 'वस्तुनिष्ठ' है।

प्रस्तुत शोधनिबंध के निष्कर्ष इस प्रकार है-

1. आनन्दवर्धन और कुन्तक दोनों को वाच्यार्थ तथा वाचक शब्द इनका क्रमशः उपसर्जन और अतिक्रमण अपेक्षित है। शास्त्र तथा व्यवहारप्रयुक्त शब्दार्थ के प्रसिद्ध प्रयोग से भिन्न 'अप्रसिद्ध अर्थ की विवक्षा' अपेक्षित है।
2. भामह की वक्रोक्ति और आनन्दवर्धन की ध्वनि इन दोनो का अपूर्व संगम कुन्तक के वक्रोक्तिविचार में है। ध्वनि अर्थरूप है वक्रोक्ति उक्तिरूप है। और यह दोनों ही लोकातिक्रांत है। यह दोनों सिद्धांतो की समान विशेषता है।
3. आनन्दवर्धन के मतानुसार ध्वनिकाव्य की आत्मा है, वह स्वसंवेद्य है। परंतु यह आत्मरूप ध्वनि जब उक्तिरूप से आविष्कृत होती है तब वह उक्ति वक्रकृतायुक्त होती है। सारांश, आनन्दवर्धन व्याकृत आत्मरूप ध्वनि का शब्दार्थमय आविष्कार वक्रोक्ति है।
4. आनन्दवर्धन तथा कुन्तक दोनों साहित्यशास्त्रियों को वाच्यवाचक से भिन्न परंतु वाच्यार्थाधारित प्रतीयमान अर्थ का अस्तित्व मान्य है। आनन्दवर्धन वाच्यार्थ से भिन्न प्रतीयमानार्थ का अस्तित्व 'लावण्य' शब्द से प्रतिपादन करते है और कुन्तक 'अभिजात्य' शब्द की योजना करते है।
5. ध्वनिसिद्घांत का आधार 'व्यंजना' शक्ति है, तथा वक्रोक्ति सिद्घांत का आधार 'विचित्र अभिधा' है। परंतु कुन्तक को अभिधा में द्योतना और व्यंजना का विनिवेश अभिप्रेत होते के कारण कुन्तक को अप्रत्यक्ष रूप से व्यंजना व्यापार मान्य है, ये सूचित होता है।
6. प्रतीयमानार्थ प्रतिभाजन्य है और सहृदयश्लाघ्यता ही उसका निष्कर्ष है। इस विषय पर दोनों आलंकारिकों का ऐकमत्य है। कुन्तक ने आनन्दवर्धन की ध्वनिकारिका उद्घृत कर प्रसंगवश व्यक्ति, प्रतीयमानता, गम्यता, व्यङ्ग्य इन शब्दों की योजना करके प्रतीयमानार्थता की सुविशद समझ दिखाकर वक्रोक्ति काव्य को प्रतीयमानार्थ की विवक्षा सूचित की है।
7. आनन्दवर्धन ने ध्वनिविचार काव्य तथा सहृदय के दृष्टिकोण से किया है। और कुन्तक के वक्रोक्ति विचार कविकौशल के दृष्टिकोण से अर्थात् कवि के दृष्टि से किया है। आनन्दवर्धन ध्वनिकाव्य का रस सापेक्षता से विचार प्रस्तुत करते है। उनके अनुसार काव्य का प्राणभूत अंश 'भाव' है।

